
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः


कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक
हस्तलिखित संग्रह
दाखल क्र M751 विषय वैदिक
नाव. ब्राह्मण ग्रंथ (Mss)
लेखक/लिपीकार महादेवभट बर्वे
पृष्ठ २५९ काळ शके १७६० पूर्ण/अपूर्ण

महादेवभट बर्वे
॥ ब्राह्मणांचे पुस्तकाचे मक पृष्ठ ॥ १ ॥

श्रीगणेशाय नमः॥ आह्मणाचे पुस्तकाची पत्रे संख्या॥ छ ॥

प्रथमपंचिकापत्रे २६ येकंदरपत्रे २५९

द्वितीय० ३६

तृतीय० ३८

चतुर्थ० ४०

पंचम० ३७

षष्ठं० ३१

सप्तम० २८

अष्टम० २३

॥ ॥श्री॥ अथप्रथमपंचिकाप्रारंभः॥ ॥

ब्रा॰ प्र॰
॥१॥
३×ना×

श्रीगणेशाय नमः ॥ हरिः ॐ ॥ अग्निर्वै देवानामवमो विष्णुः परमस्तदंतरेण सर्वा
अन्या देवता आग्नावैष्णवं पुरोळाशं निर्वपंति दीक्षणीयमेकादशकपालं स
र्वाभ्य एवैनं तद्देवताभ्योऽनंतरायं निर्वपंत्यग्निर्वै सर्वा देवता विष्णुः सर्वा देवता एते
वै यज्ञस्यांत्ये तन्वौ यदग्निश्च विष्णुश्च तद्यदाग्नावैष्णवं पुरोळाशं निर्व
पंत्यंतत एव तद्देवानृध्नुवंति तदाहुर्यदे[illegible]कादशकपालः पुरोळाशो द्वा
वग्नाविष्णू केनयोस्तत्र क्लृप्तिः का विभक्तिरित्यष्टाकपाल आग्नेयोऽष्टाक्ष
रा वै गायत्री गायत्रमग्नेश्छंदस्त्रिकपालो वैष्णवस्त्रिर्हीदं विष्णुर्व्यक्रमत
सैनयोस्तत्र क्लृप्तिः सा विभक्तिर्घृते चरुं निर्वपेत यो प्रतिष्ठितो मन्येतास्यां
वाव स न प्रतितिष्ठति यो न प्रतितिष्ठति तद्यद्घृतं तत्स्त्रियै पयो ये तंडुला

न
राम
॥१॥

स्तत्पुंसस्तन्मिथुनं मिथुने[illegible]नैवैनं तत्प्रजया पशुभिः प्रजनयति प्रजात्यै प्र
जायते प्रजया पशुभिर्य एवं वेदारब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमा
साभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि त
स्मिन्बर्हिषि दीक्षेतैषा एका दीक्षा सप्तदश सामिधेनीरनुब्रूयात्सप्तदशो
वै प्रजापतिर्द्वादश मासाः पंच र्तवो हेमंतशिशिरयोः समासेन तावान्संव
त्सरः संवत्सरः प्रजापतिः प्रजात्यायतनाभिरेवाभी राध्नोति य एवं वेद ॥१॥
यज्ञो वै देवेभ्य उदक्रामत्तमिष्टिभिः प्रैषमैच्छन्यदिष्टिभिः प्रैषमैच्छंस्तदिष्टी
नामिष्टित्वं तमन्वविंदन्ननुवित्तयज्ञो राध्नोति य एवं वेदाहूतयो वै नामैता
यदाहुतय एताभिर्वै देवान्यजमानो ह्वयति तदाहुतीनामाहूतित्वमूतयः ख
लु वै ता नाम याभिर्देवा यजमानस्य हवमायंति ये वै पंथानो याः स्रुतय

श्री०१ ॥२॥

स्वा वाऽतयस्त उ एवैतत्स्वर्गयाणाय यजमानस्य भवंति तदाहुर्यदन्यो जुहोत्य
थ यो नु चाह यजति च कस्मात्तं होतेत्याचक्षत इति यद्वाव स तत्र यथाभाज
नं देवता अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वं होता भवति
होतेत्येनमाचक्षते य एवं वेद ॥२॥ पुनर्वा एतमृत्विजो गर्भं कुर्वंति यं दीक्षयं
त्यद्भिरभि षिंचंति रेतो वा आपः सरेतसमेवैनं तत्कृत्वा दीक्षयंति नवनी
तेनाभ्यंजंत्याज्यं वै देवानां सुरभि घृतं मनुष्याणामायुतं पितॄणां नवनीतं ग
र्भाणां तद्यन्नवनीतेनाभ्यंजंति स्वेनै वैनं तद्भागधेयेन समर्धयंत्यां
जंत्येनं तेजो वा एतदक्ष्योर्यदांजनं सतेजसमेवैनं तत्कृत्वा दीक्षयंत्येकविं ४ यं २
शत्या दर्भपिंजूलैः पावयंति शुद्धमेवैनं तत्पूतं दीक्षयंति दीक्षितविमि ॥२॥
तं प्रपादयंति योनिर्वा एषा दीक्षितस्य यद्दीक्षितविमितं योनिमेवैनं त

भ्यस्तमियाद्वा २

त च्च

स्वां प्रपादयंति तस्माद्ध्रुवाद्योनेरास्ते च चरति तस्माद्ध्रुवाद्योनेर्गर्भा धीयंते
च प्र च जायंते तस्माद्दीक्षितं नान्यत्र दीक्षितविमितादादित्योभ्युदियाद्वाभिवा या
भ्यास्तमियाद्वाससा प्रोर्णुवंत्युल्बं वा एतद्दीक्षितस्य यद्वास उल्बेनैवैनं तत्प्रो
र्णुवंति कृष्णाजिनमुत्तरं भवत्युत्तरं वा उल्बाज्जरायु जरायुणैवैनं तत्प्रोर्णु
वंति मुष्टी कुरुते मुष्टी वै कृत्वा गर्भोंतः शेते मुष्टी कृत्वा कुमारो जायते तद्य
न्मुष्टी कुरुते यज्ञं चैव तत्सर्वाश्च देवता मुष्ट्योः कुरुते तदाहुर्न पूर्वदीक्षिणः संस
वोस्ति परिगृहीतो वा एतस्य यज्ञः परिगृहीता देवता नैतस्यार्तिरस्त्यपरदीक्षिण एव
यथा तथेत्युन्मुच्य कृष्णाजिनमवभृथमभ्यवैति तस्मान्मुक्ता गर्भा जरायो
र्जायंते सहैव वाससाभ्यवैति तस्मात्सहैवोल्बेन कुमारो जायते ॥३॥ त्वमग्ने
सप्रथा असि सोम यास्ते मयोभुव इत्याज्यभागयोः पुरोनुवाक्ये अनुब्रूया

श्री०१ ॥२॥

यः पूर्वमनीजानस्यात्तस्मैत्वयायज्ञंवितन्वतइतियज्ञमेवास्माएतद्वितनो
त्यग्निः प्रत्नेनमन्मनासोमगीर्भिष्ट्वावयमितियः पूर्वमीजानस्यात्तस्मैप्रत्नमि ३
तिपूर्वंकर्माभिवदतितत्तंनादृत्यमग्निर्वृत्राणिजंघनत्त्वंसोमासिसत्पति
रितिवार्त्रघ्नावेवकुर्याद्वृत्रंवाएषहंतियंयज्ञउपनमतितस्माद्वार्त्रघ्ना
वेवकर्तव्यावग्निर्मुखंप्रथमोदेवतानामग्निश्चविष्णोतपउत्तमंमहइत्याग्ना
वैष्णवस्यहविषोयाज्यानुवाक्येभवतआग्नावैष्णव्यौरूपसमृद्धेएतद्वैयज्ञ
स्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदत्यग्निश्चहवैविष्णु
श्चदेवानांदीक्षापालौतौदीक्षायाईशातेतद्यदाग्नावैष्णवंहविर्भवतियौ
दीक्षायाईशातेतौप्रीतौदीक्षांप्रयच्छतांयौदीक्षयितारौतौदीक्षयेतामिति ॥२॥
त्रिष्टुभौभवतःसेंद्रियत्वाय॥४॥गायत्र्यौस्विष्टकृतःसंयाज्येकुर्वीततेज राम

स्कामोब्रह्मवर्चसकामस्तेजोवैब्रह्मवर्चसंगायत्रीतेजस्वीब्रह्मवर्चसीभवतिय
एवंविद्वान्गायत्र्यौकुरुतउष्णिहावायुष्कामःकुर्वीतायुर्वाउष्णिक्सर्वमायुर
तियएवंविद्वानुष्णिहौकुरुतेनुष्टुभौस्वर्गकामःकुर्वीतद्वयोर्वाअनुष्टुभोश्चतुःष
ष्टिरक्षराणित्रयइमऊर्ध्वाएकविंशालोकाएकविंशत्यैकविंशत्यैवेमांल्लोकान्रोहतिस्वर्ग
एवलोकेचतुःषष्टितमेनप्रतितिष्ठतिप्रतितिष्ठतियएवंविद्वाननुष्टुभौकुरुतेबृहत्यौ
श्रीकामोयशस्कामःकुर्वीतश्रीर्वैयशश्छंदसांबृहतीश्रियमेवयशआत्मंधत्तेयएवं ए
विद्वान्बृहत्यौकुरुतेपंक्तीयज्ञकामःकुर्वीतपांक्तोवैयज्ञउपैनंयज्ञोनमतियएवंवि
द्वान्पंक्तीकुरुतेत्रिष्टुभौवीर्यकामःकुर्वीतौजोवाइंद्रियंवीर्यंत्रिष्टुबोजस्वींद्रियवा
न्वीर्यवान्भवतियएवंविद्वांस्त्रिष्टुभौकुरुतेजगत्यौपशुकामःकुर्वीतजागता
वैपशवःपशुमान्भवतियएवंविद्वान्जगत्यौकुरुतेविराजावन्नाद्यकामःकुर्वी

ब्रा०अ ४

तान्नंवैविराट् तस्माद्यस्यैवेह भूयिष्ठमन्नं भवति स एव भूयिष्ठं लोके विराजति त
द्विराजो विराट्त्वं विस्वेषु राजति श्रेष्ठः स्वानां भवति य एवं वेद ॥५॥ अथो पंचवीर्यं
वा एतच्छंदो यद्विराड्यत्त्रिपदा तेनोष्णिहा गायत्र्यौ यदस्या एकादशाक्षराणि पदा
नि तेन त्रिष्टुब्यत्त्रयस्त्रिंशदक्षरा तेनानुष्टुब्न वा एकेनाक्षरेण छंदांसि वियंति न द्वाभ्यां
यद्विराट् तत्पंचमं सर्वेषां छंदसां वीर्यमवरुंधे सर्वेषां छंदसां वीर्यमश्नुते सर्वेषां छं
दसां सायुज्यं सरूपतां सलोकतामश्नुतेन्नादोन्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं य एवं वि
द्वान्विराजौ कुरुते तस्माद्विराजावेव कर्तव्ये प्रेष्ठो अग्न इमा अग्न इत्येते ऋतं वाव दी
क्षा सत्यं दीक्षा तस्माद्दीक्षितेन सत्यमेव वदितव्यमथो खल्वाहुः को र्हति मनुष्यः स
र्वं सत्यं वदितुं सत्यसंहिता वै देवा अनृतसंहिता मनुष्या इति विचक्षणवतीं वाचं ॥४॥
वदेच्चक्षुर्वै विचक्षणं वि ह्येनेन पश्यतीत्येतद्ध वै मनुष्येषु सत्यं निहितं यच्चक्षुस्तस्मा

राम्

दाचक्षाणमाहुरद्रागिति स यद्यदर्शमित्याहाथास्य श्रद्दधति यद्यु वै स्वयं पश्यति न बहू
नां चनान्येषां श्रद्दधाति तस्माद्विचक्षणवतीमेव वाचं वदेत्सत्योत्तरा हैवास्य वागुदि
ता भवति भवति ॥६॥ इति प्रथमोध्यायः ॥ स्वर्गं वा एतेन लोकमुपप्रयंति यत्प्रायणीय
स्तत्प्रायणीयस्य प्रायणीयत्वं प्राणो वै प्रायणीय उदान उदयनीयः समानो होता भ
वति समानो हि प्राणोदानौ प्राणानां क्लृप्त्यै प्राणानां प्रतिप्रज्ञात्यै यज्ञो वै देवेभ्य उद
क्रामत्ते देवा न किंचनाशक्नुवन्कर्तुं न प्राजानंस्तेब्रुवन्नदितिं त्वयेमं यज्ञं प्रजा
नामेति सा तथेत्यब्रवीत्सा वै वो वरं वृणा इति वृणीष्वेति सैतमेव वरमवृणीत मत्प्रा
यणा यज्ञाः संतु मदुदयना इति तथेति तस्मादादित्यश्चरुः प्रायणीयो भवत्यादित्य

यनी

उदयनीयो वरवृतो ह्यस्या अथो एतं वरमवृणीत मयैव प्राचीं दिशं प्रजानाथाग्निना
दक्षिणां सोमेन प्रतीचीं सवित्रोदीचीमिति पथ्यां यजति यत्पथ्यां यजति तस्मा
दसौ पुर उदेति पश्चास्तमेति पथ्यां ह्येषानु संचरत्यग्निं यजति यदग्निं यजति

ब्रा० प्र
॥ ५ ॥

स्माद्दक्षिणतोग्न ओषधयः पच्यमाना आयंत्याग्नेय्यो ह्योषधयः सोमं यजति यत्सोमं
यजति तस्मात्प्रतीच्योप्यापो बह्व्यः स्यंदंते सौम्या ह्यापः सवितारं यजति यत्सवि
तारं यजति तस्मादुत्तरतः पश्चादयं भूयिष्ठं पवमानः पवते सवितृप्रसूतो ह्येष एत
त्पवत उत्तमामदितिं यजति यदुत्तमामदितिं यजति तस्मादसाविमां वृष्ट्याभ्यु
नत्त्यभिजिघ्रति पंचदेवता यजति पांक्तो यज्ञः सर्वा दिशः कल्पंते यज्ञोपि तस्यै जं कल्पते त
नतायै कल्पते यत्रैवं विद्वान्होता भवति ॥ ७ ॥ यस्तेजो ब्रह्मवर्चसमिच्छेत्प्रयाजाहु
२ तिभिः प्राङ् यायात्तेजो वै ब्रह्मवर्चसं प्राची दिक् तेजस्वी ब्रह्मवर्चसी भवति य एवं वि
द्वान्प्राङेति यो न्नाद्यमिच्छेत्प्रयाजाहुतिभिर्दक्षिणा स इयादन्नादो वा एषोन्नपति
र्यदग्निरन्नादो न्नपतिर्भवत्यश्नुते प्रजयान्नाद्यं य एवं विद्वान्दक्षिणेति यः पशू
निच्छेत्प्रयाजाहुतिभिः प्रत्यङ्ङियात्पशवो वा एते यदापः पशुमान्भवति य एवं विद्वा ॥ ८ ॥
न्प्रत्यङेति यः सोमपीथमिच्छेत्प्रयाजाहुतिभिरुदङ् स इयादुत्तरा ह वै सोमो राजा

पीथ

प्र सोमं मान्न इति य एवं विद्वानुदङेति स्वर्ग्यैवोर्ध्वा दिक्सर्वासु दिक्षु राध्नोति सम्यंचो
वा इमे लोकाः सम्यंचो स्मा इमे लोकाः श्रियै दीद्यति य एवं वेद पथ्यां यजति यत्पथ्यां य
ष्ट × जति वाचमेव तद्यज्ञमुखे संभरति प्राणापानावग्नीषोमौ प्रसवाय सविता प्रतिष्ठि
त्या अदितिः पथ्यामेव यजति यत्पथ्यामेव यजति वाचैव तद्यज्ञं पंथामपिनयति
चक्षुषी एवाग्नीषोमौ प्रसवाय सविता प्रतिष्ठित्या अदितिश्चक्षुषा वै देवा यज्ञं प्र
षा जानंश्चक्षुषा वा एतत्प्रज्ञायते यदप्रज्ञेयं तस्मादपि मुग्धश्चरित्वा यदेवानुष्ठ्या च
ना क्षुषा प्रजानात्यथ प्रजानाति यद्वेव तद्देवा यज्ञं प्राजानन्नस्यां वाव तत्प्राजानन्नस्यां सम भ
रन्नस्यै वै यज्ञस्तायते अस्यै क्रियते अस्यै संभ्रियत इयं ह्यदितिस्तदुत्तमामदितिं यजति
यदुत्तमामदितिं यजत्यस्य प्रज्ञात्यै स्वर्गस्य लोकस्यानुख्यात्यै ॥ ८ ॥ देवविशः
कल्पयितव्या इत्याहुस्ताः कल्पमाना अनु मनुष्यविशः कल्पंत इति सर्वा विशः क
ल्पंते कल्पते यज्ञोपि तस्यै जनतायै कल्पते यत्रैवं विद्वान्होता भवति स्वस्ति नः पथ्या

ब्रा०प्र ॥६॥

सुधन्वस्विस्तन्वाहस्वस्त्यप्सु वृजने स्वर्वति ॥ स्वस्ति नः पुत्रकृथेषु योनिषु स्वस्ति राये मरु-
तो दधातनेति मरुतो वै देवानां विशः स्ता एवैतद्यज्ञमुखेऽनोकॢप्तः सर्वै … श्छंदोभि-
र्यजेदित्याहुः सर्वै … र्वै छंदोभिरिष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमानः सर्वै-
श्छंदोभिरिष्ट्वा स्वर्गं लोकं जयति स्वस्ति नः पथ्यासु धन्वसु ॥ स्वस्तिरिद्धि प्रपथे श्रे-
ष्ठेति पथ्यायां स्वस्ति त्रिष्टुभावग्ने नय सुपथा राये अस्मानादेवानामपि पंथामग-
न्म … यदग्ने त्रिष्टुभौ त्वं सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्या-
मिति सोमस्य त्रिष्टुभावा विश्वदेवं सत्पतिं य इमा विश्वा जातानीति सवितुर्गायत्र्या ता
सुत्रामाणं पृथिवीं द्यामनेहसं महीमूषु मातरं सुव्रतानामित्यदितेर्जगत्यावेता-
न्येवावसर्वाणि छंदांसि गायत्रं त्रैष्टुभं जागतमन्वन्यान्येतानि हि यज्ञे प्रतमामि- ॥६॥
व क्रियंत एतैर्ह वा अस्य छंदोभिर्यजतः सर्वैश्छंदोभिरिष्टं भवति य एवं वेद ॥ ९ ॥ रामः

तावा एताः प्रवत्यो नेतमेयः पथिमत्यः स्व…स्तिमत्य एतस्य हविषो याज्यानुवाक्या
एताभिर्वा इष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैतद्यजमान एताभिरिष्ट्वा स्वर्गं लोकं
जयति तासु पदमस्ति स्वस्ति राये मरुतो दधातनेति मरुतो ह वै देवविशोंतरिक्ष-
लो० का० भाजना स्तेभ्यो ह यो निवेद्य स्वर्गमेती श्वरा हैनं नि वा रोद्धोर्वि वा मथितोः स यदाह
दाह स्वस्ति राये मरुतो दधातनेति मरुद्भ्यो … देववि … ऽवैयजमानं निवे-
दयति न हवा एनं मरुतो देवविशः स्वर्गं लोकं यंतं निरुंधते न विमथ्नंते
स्वस्ति हैनमत्यर्जंति स्वर्गं लोकमभि य एवं वेद विराजो वा एतस्य हविषः स्विष्ट-
कृतः संयाज्ये स्यातां ये त्रयस्त्रिंशदक्षरे ॥ सेदग्निरग्नींरत्यस्त्वन्यान्सेदग्नि-
र्यो वनुष्यतो निपातीत्येते विराजौ वा इ… ष्ट्वा देवाः स्वर्गं लोकमजयंस्तथैवैत-
द्यजमानो विराजाविष्ट्वा स्वर्गं लोकं जयति ते त्रयस्त्रिंशदक्षरे भवतस्त्रयस्त्रिं-
शद्वै देवा अष्टौ वसव एकादश रुद्रा द्वादशादित्याः प्रजापतिश्च वषट्कारश्च तत्स

श्री

श्री०प्र
॥७॥

ध्रुवमेव यज्ञमुखे देवता अक्षरभाजः करोत्यक्षरेणाक्षरेणैव तद्देवतां प्रीणाति देवपा
त्रेणैव तद्देवतास्तर्पयति ॥ १० ॥ प्रयाजवदननुयाजं कर्तव्यं प्रायणीयमित्याहुर्ही
नमिव वा एतदीङ्खितमिव यत्प्रायणीयस्यानुयाजा इति तत्तन्नादृत्यं प्रयाज
वदेवानुयाजवत्कर्तव्यं प्राणा वै प्रयाजा अपाना अनुयाजा यत्प्रयाजाननंतरियात्प्रा
णांस्तद्यजमानस्यांतरियाद्यदनुयाजाननंतरियादपानांस्तद्यजमानस्यांतरियात्तस्मा
त्प्रयाजवदेवानुयाजवत्कर्तव्यं पत्नीर्न संयाजयेत्संस्थितयजुर्न जुहुयात्तावतैव
यज्ञोऽसंस्थितः प्रायणीयस्य निष्कासं निदध्यात्तमुदयनीयेनाभिनिर्वपे
द्यज्ञस्य संतत्यै यज्ञस्याव्यवच्छेदायाथो खल्वाहुर्यस्यामेव स्थाल्यां प्रायणीयं निर्व
पेत्तस्यामुदयनीयं निर्वपेत्तावतैव यज्ञः संततोऽव्यवच्छिन्नो भवत्यमुष्मिन्वा
एतेन लोके राध्नुवंति नास्मिन्नित्याहुर्यत्प्रायणीयमिति प्रायणीयमिति निर्व
पंति प्रायणीयमिति चरंति प्रयंत्येवास्माल्लोकाद्यजमाना इत्सविपर्ययेवनदा

य
॥७॥
राम

ज्या

ह्वयंति षड्जेद्यानुवाक्या याः प्रायणीयस्य पुरोनुवाक्यास्ता उदयनीयस्य याज्याः कुर्या
द्या उदयनीयस्य पुरोनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात्तद्व्यतिषजत्यु
भयोर्लोकयोरृद्ध्या उभयोर्लोकयोः प्रतिष्ठित्या उभयोर्लोकयोरृध्नोत्युभ
योर्लोकयोः प्रतितिष्ठति प्रतितिष्ठति य एवं वेदादितिः प्रायणीयो भव
त्यादित्य उदयनीयो यज्ञस्य धृत्यै यज्ञस्य बर्सनद्धैय यज्ञस्याप्रस्रंसाय तद्यथैवा
द इति ह स्माह तेजन्या उभयतो तयारभस्त्रं साय बर्सौ नह्यत्येवमेवैतद्यज्ञस्या
भयतो तयारभस्त्रं साय बर्सौ नह्यति यदादित्यश्चरुः प्रायणीयो भवत्यादित्य उ
दयनीयः पथ्यायै स्वस्तिः प्रयंति पथ्यां स्वस्तिमभ्युद्यंति स्वस्त्येवतः प्रयंति
स्वस्त्युद्यंति स्वस्त्युद्यंति ॥ ११ ॥ इति द्वितीयोऽध्यायः ॥ प्राच्यां वै दिशि
देवाः सोमं राजानमक्रीणंस्तस्मात्प्राच्यां दिशि क्रीयते तं त्रयोदशान्मासाद
क्रीणंस्तस्मात्त्रयोदशो मासो नानुविद्यते न वै सोमविक्रय्यनुविद्यते पापो

म

ब्रा०प्र ॥५॥

हिसोविक्रयीतस्यक्रीतस्यमनुष्यानभ्युपावर्तमानस्यदिशोवीर्याणींद्रियाणिव्यु
दसीदंस्तान्येकयर्चावारुरुत्संततानिनाशकुवंस्तानिद्वाभ्यांतानितिसृभिस्ता
निचतसृभिस्तानिपंचभिस्तानिषड्भिस्तानिसप्तभिर्नैवावारुंधततान्यष्टा
भिरवारुंधताष्टाभिराश्नुवतयदष्टाभिरवारुंधताष्टाभिराश्नुवततदष्टानामष्ट
त्वमश्नुतेयद्यत्कामयतेयएवंवेदतस्मादेतेषुकर्मस्वष्टावष्टावनूच्यंतेइंद्रि
याणांवीर्याणामवरुध्यै॥१२॥सोमायक्रीतायप्रोह्यमाणायानुब्रूहीत्याहा
ध्वर्युर्भद्रादभिश्रेयःप्रेहीत्यन्वाहायंवावलोकोभद्रस्तस्मादसावेवलोकःश्रेयान्
स्वर्गमेवतल्लोकंयजमानंगमयतिबृहस्पतिःपुरएतातेअस्त्वितिब्रह्मवै
बृहस्पतिर्ब्रह्मैवास्माएतत्पुरोगवमकर्णब्रह्म॰ण्वद्विष्ट्यथेमवस्यवरआ
पृथिव्याइतिदेवयजनंवैवरंपृथिव्यैदेवयजनएवैनंतदवसाययत्यारेशत्रूंन्कृ
णुहिसर्ववीरइतिद्विषंतमेवास्मैतत्पाप्मानंभ्रातृव्यमपबाधतेधरंपादयति

र को ॥६॥ राम

सोमयास्तेमयोभुवइतितृचंसौम्यंगायत्रमन्वाहसोमेसजनिप्रोह्यमाणेस्वयैवैनंत
द्देवतयास्वेनछंदसासमर्धयतिसर्वेनंदंतियशसागतेनेत्यन्वाहयशोवैसोमोरा
जासर्वोहवाएतेनक्रीयमाणेननंदंतियश्चयज्ञेलप्स्यमानोभवतियश्चनसभासा
हेनसख्यासखायइ॰त्येषवैब्राह्मणानांसभासाहःसखायत्सोमाराजाकिल्बिष
स्पृदित्येषउएवकिल्बिषस्पृद्योवैभवतियःश्रेष्ठतामश्नुतेसकिल्बिषंभवतित
स्मादाहुर्मानुब्रोचोमाप्रचारीःकिल्बिषंनुमायातयंनितिपितुषणिरित्यन्नंवै
पितुदक्षिणावैपितुतामनेनसनोत्यन्नसनिमेवैनंतत्करोत्यरंहितोभवतिवा
जिनायेतींद्रियंवैवीर्यंवाजिनमाजरसंहास्मैवाजिनेनापच्छितयएवंवेदागं
देवइत्यन्वाहागतोहिसतर्हिभवत्यृतुभिर्वर्धतुक्षयमित्यृतवोवैसामस्य

य

आ॰प्र॰ ॥१०॥

राज्ञोराजभ्रातरोयथामनुष्यस्यैतेरेवैनंतत्सहागमयतीदधातुनःसवितासुप्रजामिष
मित्याशिषमाशास्तेसनःक्षपाभिरहभिश्चजिन्वत्विसहानिवाअहानिरात्रयःक्षपा
अहोरात्रैरेवास्माएतामाशिषमाशास्तेप्रजावंतंरयिमस्मेसमिन्वत्वित्याशिष
मेवाशास्तेयातेधामानि[illegible]हविषायजंतीत्यन्वाहतांतविश्वापरिभूरस्तुयज्ञं॥ग
यस्फानःप्रतरणःसुवीरइतिगवांनस्फावयितापतारयितेत्येवतदाहावीरहा
प्रचरासोमदुर्यानितिगृहावैदुर्याबिभ्यतिवैसोमाद्राज्ञआयतोयजमानस्य
गृहाःसयदेतामन्वाहशांत्यैवैनंतच्छमयतिसास्यशांतानप्रजान्पशून्हिनस्ती
मांधियं[illegible]शिक्षमाणस्यदेवेतिवारुण्यापरिदधातिवरुणदेवत्योवाएषतावद्
यावदुपनद्धोयावत्परिश्रितानिप्रपद्यतेस्वयैवैनंतद्देवतयास्वेनछंदसासमर्ध
यतिशिक्षमाणस्यदेवेतिशिक्षतेवाएषयोयजतेक्रतुंदक्षंवरुणसंशिशाधी

॥१०॥ रामः

त

तिवीर्यंप्रज्ञानंवरुणसंशिशाधीत्येवैतदाहययातिविश्वादुरितातरेमसुतर्माणमधि
नावंरुहेमेतियज्ञोवैसुतर्मानौःकृष्णाजिनंवैसुतर्मानौर्वाग्वैसुतर्मानौर्वाचमेव
तदारुह्यतयास्वर्गंलोकमभिसंतरतितापएताअष्टावन्वाहरूपसमृद्धाएतद्वैय
ज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदतितासांत्रिःप्रथमा
मन्वाहत्रिरुत्तमांताद्वादशसंपद्यंतेद्वादशवैमासाःसंवत्सरःसंवत्सरःप्रजाप
तिःप्रजापत्यायतनाभिरेवाभीराध्नोतियएवंवेदत्रिःप्रथमांत्रिरुत्तमामन्वाह
यज्ञस्यैवतद्बर्सौनह्यतिस्थेम्नेबलायाविस्रंसाय॥९३॥अन्यतरोनड्वान्युक्त
स्यादन्योऽयुक्तो विमुक्तोथराजानमुपावहरेयुर्यदुभयोर्विमुक्तयोरुपावहरेयुःपितृ
ग देवत्यंराजानंकुर्युर्यद्युक्तयोरयोगक्षेमःप्रजाविंदेत्ताःप्रजाःपरिप्लवेरन्योनड्वा
न्विमुक्तस्तच्छालासदांप्रजानांरूपंयोयुक्तस्तत्क्रियाणांतेयद्युक्तेऽन्यवि

श्री
१०

मुक्तेन्य उपावहरंस्सुभावेवंतेक्षेमयो गौकस्यंति देवासुरा वा एषु लोकेषु समयतंत तत ए
तस्यां प्राच्यां दिश्ययतंत तांस्ततोसुरा अजयंस्ते दक्षिणस्यां दिश्ययतंत तांस्ततोसु
रा अजयंस्ते प्रतीच्यां दिश्ययतंत तांस्ततोसुरा अजयंस्तउदीच्यां दिश्ययतंत तांस्ततो
स्ततोसुरा अजयंस्तउदीच्यां प्राच्यां दिश्ययतंत ते ततो नपराजयंत सैषा दिगपरा
जिता तस्मादेतस्यां दिशि यतेत वा यातयेद्वेश्वरो हानृणाकर्तोस्ते देवा अब्रुवन्नरा
जतया वै नो जयंति राजानं करवामहा इति तथेति ते सोमं राजानमकुर्वंस्ते सोमेन न
राज्ञा सर्वा दिशो जयन्नेष वै सोमराज्ञा यो यजते प्राचि तिष्ठत्याद धति तेन प्रा
चीं दिशं जयति तं दक्षिणा परिवहंति तेन दक्षिणां दिशं जयति तं प्रत्यंचमावृ
तेयंति तेन प्रतीचीं दिशं जयति तमुदीच्यस्तिष्ठत उपावहरंति तेनोदीचीं दिशं
जयति सोमेन राज्ञा सर्वा दिशो जयति य एवं वेद ॥१४॥ हविरातिथ्यं निरुप्यते सोमे
राजन्यागते सोमो वै राजा यजमानस्य गृहानागच्छति तस्मा एतद्धविरातिथ्यं निरुप्यते

॥१०॥
राम

तद्धा आतिथ्यस्यातिथ्यत्वं नवकपालो भवति नव वै प्राणाः प्राणानां क्लृप्त्यै प्राणा
नां प्रतिप्रज्ञात्यै वैष्णवो भवति विष्णुर्वै यज्ञः स्वयैवैनं तद्देवतया स्वेन छंदसा सम
र्धयति सर्वाणि वाव छंदांसि च पृष्ठानि च सोमं राजानं क्रीतमन्वायंति यावंतः
खलु वै राजानमनुयंति तेभ्यः सर्वेभ्य आतिथ्यं क्रियतेग्निं मंथंति सोमे राजन्याग
ते तद्यथैवादो मनुष्यराज आगतेन्यस्मिन्वार्हत्युक्षाणं वा वेहतं वा क्षदंत एवमेवा
स्मा एतत्क्षदंते यदग्निं मंथंत्यग्निर्हि देवानां पशुः ॥१५॥ अग्नये मथ्यमानाया
नुब्रूहीत्याहाध्वर्युरभि त्वा देव सवितरिति सावित्रीमन्वाह तदाहुर्यदग्नये म
थ्यमानायानुवाचाहाथ कस्मात्सावित्रीमन्वाहेति सविता वै प्रसवानामीशे
सवितृप्रसूता एवैनं तन्मंथंति तस्मात्सावित्रीमन्वाह मही द्यौः पृथिवी च न
इति द्यावापृथिवीयामन्वाह तदाहुर्यदग्नये मथ्यमानायानुवाचाहाथ क

बौ

ब्रा० १
११

स्मा द्यावापृथिवीयामन्वाहेति द्यावापृथिवीभ्यां वा एतं जातं देवाः पर्यगृह्णंस्ताभ्यामेवाद्यापि परिगृहीतस्तस्मा द्यावापृथिवीयामन्वाह त्वामग्ने पुष्करादध्यथर्वा निरमन्थतेति रूपसमृद्धं एतद्यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति स यदि न जायेत यदि चिरं जायेत राक्षोघ्न्यो गायत्र्योऽनूच्या अग्ने हंसि न्यत्रिणमित्येता रक्षसामपहत्यै रक्षांसि वा एनं तर्ह्यालभन्ते यर्हि न जायते यर्हि चिरं जायते स यद्येकस्यामेवानूक्तायां जायेत यदि द्वयोरथो खल्वाहुर्जातवदिति जाताय जातवतीमभिरूपामनुब्रूयाद्यद्यज्ञेऽभिरूपं तत्समृद्धमारब्धहस्त्येन खादिनामिति हस्ताभ्यां ह्येनं मथ्नन्ति शिशुं जातमिति शिशुरिव वा एष प्रथमजातो यदग्निर्विभ्रति विशामग्निं

त

राम

११
राम

हि

स्वध्वरमिति यद्वै देवानां नेति तदेषामोमिति प्रदेवं देववीतये भरता वसुवित्तममिति प्रह्रियमाणायाभिरूपाय यद्यज्ञेऽभिरूपं तत्समृद्धमास्ये योनौ निषीदतीत्येष ह वा अस्य स्वो योनिर्यदग्निरग्नेरा[illegible] जातं जातवेदसीति जातो ह्येष जातवेदा इत्यग्निं प्रियं शिशीतातिथिमित्येष ह वा अस्य प्रियोऽतिथिर्यदग्निरग्नेः स्योन आ गृहपतिमिति शान्त्यामेवैनं तद्दधात्यग्निनाग्निः समिध्यते कविर्गृहपतिर्युवा॥ हव्यवाड्जुह्वास्य इत्यभिरूपाय यद्यज्ञेऽभिरूपं तत्समृद्धं त्वं ह्यग्ने अग्निना विप्रो विप्रेण सन्त्सतेति विप्रइतरो विप्रइतरः [illegible] सन्नितरः सन्नितरः सखा सख्या समिध्यस इत्येष ह वा अस्य स्वः सखा

स

र्ज

ब्रा०१ ॥१२॥

यदभिरग्नेरस्तंमर्थंतसुक्रतुं पुरोयावानमाजिषु ॥ स्वेषु क्षयेषु वाजिनमित्ये
षहवा अस्य स्वःक्षयो यदग्निरग्नेर्यज्ञेनयज्ञमयजंत देवा इत्युत्तमयाप
रिदधातियज्ञेनवैतद्देवायज्ञमयजंतयदग्निनाग्निमयजंततेस्वर्गंलोकमा
यंस्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वे
साध्याःसंतिदेवाइति छंदांसिवैसाध्यादेवास्तेग्रेग्निनाग्निमयजंततेस्व
र्गंलोकमायन्नादित्याश्चैवेहासंनंगिरसश्चतेग्रेग्निनाग्निमयजंतते
स्वर्गंलोकमायन्त्सैषास्वर्ग्याहुतिर्यदग्न्याहुतिर्यदिहवा अप्यब्राह्मणोक्तो
यदिदुरुक्तोक्तोयजतेथहैषाहुतिर्गच्छत्येवदेवान्नपाप्मनासंसृज्यतेग ॥१२॥
दै च्छत्यस्याहुतिर्नास्याहुतिःपाप्मनासंसृज्यतेयएवंवेदताएतास्त्र राम

योदशान्वाहरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रि
यमाणमृगभिवदतितासांत्रिःप्रथमामन्वाहत्रिरुत्तमांताःसप्तदश
संपद्यंतेसप्तदशोवैप्रजापतिर्द्वादशमासाःपंचर्तवस्तावान्त्संवत्सरःसं
वत्सरःप्रजापतिःप्रजापत्यायतनाभिरेवाभीराध्नोतियएवंवेदत्रिःप्र ति
थमांत्रिरुत्तमामन्वाहयज्ञस्यैवतद्बर्सौनह्यतिस्थेम्नेबलायाविस्रं
साय ॥१६॥ समिधाग्निंदुवस्यताप्यायस्वसमेतुतइत्याज्यभागयोः
ते पुरोनुवाक्ये भवत आतिथ्यवत्यौरूपसमृद्धेएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धं
यत्कर्मक्रियमाणमृगभिवदतिसैषाग्नेय्यातिथिमतीनसौम्यातिथिमत्यस्ति
यत्सौम्यातिथिमतीस्याछन्दस्तत्स्यादेतत्वैषातिथिमतीयदापीनवतीयदा
वै

ऐ०१
॥१३॥

वा अतिथिं परिवेविषत्याापीन इव वै स तर्हि भवति तयोर्जुषाणेनैव यजतीदं वि
ष्णुर्विचक्रमे तदस्य प्रियमभि पाथो अश्यामिति वैष्णव्यौ त्रिपदामनूच्य चतु
ष्पदया यजति सप्त पदानि भवंति शिरो वा एतद्यज्ञस्य यदातिथ्यं सप्त वै शी
र्षन्प्राणाः शीर्षन्नेव तत्प्राणान्दधाति होतारं चित्ररथमध्वरस्य प्रप्रायमग्नि
र्भरतस्य शृण्व इति स्विष्टकृतः संयाज्ये भवतः आनिध्यवत्यौ रूपसमृ
द्धे एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृगभिवदति त्रि
ष्टुभौ भवतः सेंद्रियत्वाय इळांतं भवतीळांतेन वा एते न देवा अराध्नुवन्य
दातिथ्यं तस्मादिळांतमेव कर्तव्यं प्रयाजान्नेवात्र यजंति नानुयाजान्प्रा
णा वै प्रयाजानुयाजास्त इमे शीर्षन्प्राणास्ते प्रयाजा ये वांचस्तेनुयाजाः

॥१३॥
रामः

योनुयाजेषु॥२

थे

स योत्रानुयाजान्यजेद्यथेमान्प्राणानालुप्य शीर्षन्धित्सेत्तादृक्तदतिरिक्तं तत्स उ
वा इमे प्राणा विद्रुह्ये चेमे ये चेमे तद्यदेवात्र प्रयाजान्यजंति नानुयाजांस्तत्र स का
म उपाप्तो योनुयाजेषु॥ १७॥ इति प्रथमपंचिकायां तृतीयोध्यायः॥
यज्ञो वै देवेभ्य उदक्रामन्न वोहमन्नं भविष्यामीति नेति देवा अब्रुवन्नन्नमे
व नो भविष्यसीति तं देवा विमेथिरे स हैभ्यो विहृतो न प्रबभूव ते होचुर्देवा न
वै न इ[illegible]त्थं विहृतोलं भविष्यतीहंतेमं यज्ञं संभरामेति तथेति तं संजभ्रुस्तं
संभृत्योचुरश्विनाविमं भिषज्यतमित्यश्विनौ वै देवानां भिषजावश्वि
नावध्वर्यू तस्मादध्वर्यू घर्मं संभरतस्तं संभृत्याहतुर्ब्रह्मन्प्रवर्ग्येण प्र
चरिष्यामो होतरभिष्टुहीति॥ १८॥ ब्रह्म जज्ञानं प्रथमं पुरस्तादिति प्रति

पद्यते ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भि षंतीयं पित्रेराघ्नेय सग्र इति वाग्वैरा
ष्ट्री वाचमेवास्मिंस्तद्दधाति महान्महो अस्तभाय द्विजात इति ब्राह्मणस्प
त्यं ब्रह्म वै बृहस्पतिर्ब्रह्मणैवैनं तद्भिषज्यत्यभित्यं देवं सवितारमोण्यो
रिति सावित्री प्राणो वै सविता प्राणमेवास्मिंस्तद्दधाति संसीदस्वम
हां असीत्येवैनं समसादयन्नं जति यं प्रथयंतो न विप्रा इत्यज्यमाना
याभिरूपाय यद्यज्ञे भिरूपं तत्स मृध्यं पतंगमक्तमसुरस्य मायया यो
नः सनुत्यो अभिदासदग्ने भवा नो अग्ने सुमना उपेता विति हुतेभि
रूपं यद्यज्ञे भिरूपं तत्समृध्यं कृणुष्व पाजः प्रसितिं न पृथ्वीमिति पंच
राक्षोघ्न्यो रक्षसामपहत्यै परि त्वा गिर्वणो गिर इत्थि ह्र्योर दधा उवथ्यं

ज्य

॥१४॥

राम

वच्चः शृक्रं ते अन्यद्यज्ञतं ते अन्यदपश्यं गोपाम निपद्यमानमिति चतस्र ए
कपातिन्यस्ता एकविंशतिर्भवंत्येकविंशोयं पुरुषो दश हस्त्या अंगुल्यो दश
पाद्या आत्मैकविंशस्तामिममात्मानमेकविंशं संस्कुरुते॥१९॥ स्त्वं के इ
सस्य धमतः समस्वरन्निति नव पावमान्यो नव वै प्राणाः प्राणानेवास्मिंस्त
द्दधात्ययं वेन स्श्चोदयत्पृश्नि गर्भा इत्ययं वै वेनोस्माद्वा ऊर्ध्वा अन्ये प्राणा वे
नंत्यवांचो अन्ये तस्माद्वेनः प्राणो वा अयं सन्नाभेरिति तस्मान्नाभिस्त
न्नाभेर्नाभित्वं प्राणमेवास्मिंस्तद्दधाति पवित्रं ते विततं ब्रह्मणस्पते त
पोष्पवित्रं विततं दिवस्पद इत्यत्सपवित्रं धिषणा अतन्वतेति पूतवंतः
प्राणास्त इमेवांचोरतस्यां मूत्र्यः पुरीष्य इत्येतानेवास्मिंस्तद्दधाति॥२०॥

स्या

श्री० १
१७

गणानांत्वागणपतिंहवामहइतिब्राह्मणस्पत्यंब्रह्मवैबृहस्पतिर्ब्रह्मणैवैनं
तद्भिषज्यतिप्रथश्चयस्यसप्रथश्चनामेतिघर्मतन्वःसतनुमेवैनंतत्स
रूपंकरोतिरथंतरमाजभारावसिष्ठः।भरद्वाजोबृहदाचक्रेअग्नेरि
तिबृहद्रथंतरवंतमेवैनंतत्करोत्यपश्यंत्वामनसाचेकितानमितिप्र
जावान्प्राजापत्यःप्रजामेवास्मिंस्तद्दधातिकाराधद्ध्वोअश्विनावामि
तिनवविच्छंदसऋत्वेतद्यज्ञस्यांतस्तस्यविक्षुद्रमिववाअंतस्यमणीयइ
वचरण्वीयइवचतस्मादेताविच्छंदसोभवंत्येताहिआश्विनोःकक्षीवा
न्प्रियंधामोपागच्छत्सपरमंलोकमजयदुपाश्विनोःप्रियंधामग
च्छतिजयतिपरमंलोकंयएवंवेदाभात्यग्निरुषसामनीकमितिसूक्तं

भि
१५

पीपिवांसमश्विनाघर्ममच्छेत्यभिरूपंयद्यज्ञेभिरूपंतत्समृद्धंतदुत्रैष्टुभंवीर्यंवैत्रि
ष्टुब्वीर्यमेवास्मिंस्तद्दधातिग्रावाणेवतदिदर्थंजरेथेइतिसूक्तमक्षीइवकर्णाविव
नासेवेत्यंगसमाख्यायमेवास्मिंस्तदिंद्रियाणिदधातितदुत्रैष्टुभंवीर्यंवै
त्रिष्टुब्वीर्यमेवास्मिंस्तद्दधातीमेद्यावापृथिवीपूर्वचित्तयइतिसूक्तमाग्निंघ
र्मंसुरुचंयामन्निष्टयइत्यभिरूपंयद्यज्ञेभिरूपंतत्समृद्धंतदुजागतंजागता
वैपशवःपशूनेवास्मिंस्तद्दधातियाभिरमुमावतंयाभिरमुमावतमित्येता
वतोहात्राश्विनौकामांददृशतुस्तानेवास्मिंस्तद्दधातितैरेवैनंतत्समर्धयत्यरू
रुचदुषसःपृश्निरग्रियइतिरुचितवतीरुचमेवास्मिंस्तद्दधातिद्युभिरक्तुभिः
परिपातमस्मानित्युत्तमयापरिदधात्यरिष्टेभिरश्विनासौभगेभिः॥तन्नो

रु

ब्रा०१
॥१६॥

मित्रोवरुणोमामहंतामदितिःसिंधुःपृथिवीउतद्यौरित्येतैरेवैनंतत्कामैःसमर्धय
तीतिनुपूर्वेपटले॥२१॥अथोत्तरमुपह्वयेसुदुघांधेनुमेतांहिंकृण्वतीवसु
पत्नीवसूनामभित्वादेवसवितःसमीवत्संनमातृभिःसंवत्सइवमातृभिर्यस्ते
स्तनःशशयोयोमयोभूर्गौरमीमेदनुवत्संमिषंतंनमस्येदुपसीदतसंजा
नानाउपसीदन्नभिज्ञुदशभिर्विवस्वतोदुहंतिसप्तैकांसमिद्धोअग्निरश्विना
समिद्धोअग्निर्वृषणारतिर्दिवस्तदुप्रयक्षतममस्यकर्मात्मन्वन्नभोदुह्यतेघृ
तंपयउत्तिष्ठब्रह्मणस्पतेअधुक्षत्पिप्युषीमिषमुपद्रवपयसागोधुगोषमासिंचते
सिंचतश्रियमानूनमश्विनोर्ऋषिःसमुत्यमहतीरपइत्येकविंशतिरभिरूपा
यद्यज्ञेभिरूपंतत्समृद्धमुदुष्यदेवःसविताहिरण्ययेत्यनूत्तिष्ठतिप्रैतुब्रह्म

दि
॥१६॥
राम

णस्पतिरित्यनुप्रेतिगंधर्वइत्थापदमस्यरक्षतीतिखरमवेक्षतेनाकेसुपर्णमु
पयत्पतंतमित्युपविशतितप्तोवांघर्मोनक्षतिस्वहोतोभापिबतमश्विनेति
पूर्वाह्णेयजत्यग्नेवीहीत्यनुवषट्करोतिस्विष्टकृद्भाजनंयदुस्त्रियास्वाहुतंघृतंप
योस्यपिबतमश्विनेत्यपराह्णेयजत्यग्नेवीहीत्यनुवषट्करोतिस्विष्टकृद्भाजनं
त्रयाणांहवेहविषांस्विष्टकृतेननसमवद्यंतिसोमस्यघर्मस्यवाजिनस्येतिस
यदनुवषट्करोत्यग्नेरेवस्विष्टकृतोनंतरित्यैविश्वाआशादक्षिणसादितिब्रह्मा
जपतिस्वाहाकृतःशुचिर्देवेषुघर्मःसमुद्रादूर्मिमुदियर्तिवेनोद्रप्सःसमुद्रमभिय
ज्जिगातीति॥स्रक्वेसुरवायमभ्यावदृत्सोर्ध्वऊषुणऊतयऊर्ध्वोनःपाह्यंहसस्तंघेमि
त्थानमस्विनइत्यभिरूपायद्यज्ञेभिरूपंतत्समृद्धंपावकशोचेतवहिक्षयंपरीतिभक्ष

से

माकांक्षेतेहतंहविर्मधुहविरिंद्रमेग्नावश्यामतेदेवघर्म ॥ मधुमतः पितुमतो
वाजवतोंगिरस्वतोनमस्तेअस्तुमामाहिंसीरितिघर्मस्यभक्षयतिश्येनोनयो
निंसदनंधियाकृतमायस्मिन्सप्तवासवाइतिसंसाद्यमानायान्वाहहविर्हविष्मो
महिसद्मदैव्यमितियदहरुत्सादयिष्यंतोभवंतिसूयवसाद्भगवतीहिभूयाइत्यु
तमयापरिदधातितद्देतद्देवमिथुनंयद्घर्मःसयोघर्मस्तच्छिश्नंयौशफौतौशफौयो
पयमनीतेश्रोणिकपालेयत्पयस्तद्रेतस्तदिदमग्नौदेवयोन्यांप्रजननेरेतःसिच्य
तेऽग्निर्वैदेवयोनिःसोऽग्नेर्देवयोन्याआहुतिभ्यःसंभवत्यृङ्मयोयजुर्मयःसाम
मयोवेदमयोब्रह्ममयोऽमृतमयःसंभूयदेवताअप्येतियएवंवेदयश्चैवंविद्वा
नेतेनयज्ञक्रतुनायजते ॥ २२ ॥ देवासुरावाएषुलोकेषुसमयतंततेवाअसु

राइमानेवलोकान्पुरोकुर्वतयथौजीयांसोबलीयांसएवंतेवाऽअयस्मयीमेवेमाम्
कुर्वतरजतामंतरिक्षंहरिणींदिवंतेतथेमांल्लोकान्पुरोकुर्वततेदेवाअब्रुवन्पुरो
वाइमेसुराइमांल्लोकान्क्रतपुरइमांल्लोकान्प्रतिकरवामहाइतितथेतितेसद
एवास्याःप्रत्यकुर्वताग्नीध्रमंतरिक्षाद्धविर्धानंदिवस्तेतथेमांल्लोकान्पुरःप्रत्य
कुर्वततेदेवाअब्रुवन्नुपसदउपायामोपसदावैमहापुरंजयंतीतितथेतितेयामेव
प्रथमामुपसदमुपायंस्तयैवैनानस्माल्लोकादनुदंततयांद्वितीयांतयांतरिक्षाद्यां
तृतीयांतयादिवस्तांस्तथैभ्योलोकेभ्योनुदंततेवाएभ्योलोकेभ्योनुत्ताअसुरा
ऋतूनश्रयंततेदेवाअब्रुवन्नुपसदएवोपायामेतितथेतितइमास्तिस्रःसती
रुपसदोद्विर्द्विरेकैकामुपायंस्ताःषट्समपद्यंतषड्वाऋतवस्तान्वाऋतुभ्यो

ब्रा०१
॥३९॥

नुदंततेवाऋतुभ्योनुत्ताअसुरामासानश्रयंततेदेवाअब्रुवन्नुपसदएवोपाया
मेतितथेतितइमाःषट्सतीरुपसदोद्विर्द्विरेकैकामुपायंस्ताद्वादशसमपद्यंत
द्वादशवैमासास्तान्वैमासेभ्योनुदंततेवैमासेभ्योनुत्ताअसुराअर्धमासानश्रयं
ततेदेवाअब्रुवन्नुपसदएवोपायामेतितथेतितइमाद्वादशसतीरुपसदोद्विर्द्वि
रेकैकामुपायंस्ताश्चतुर्विंशतिःसमपद्यंतचतुर्विंशतिर्वाअर्धमासास्तान्वाअर्ध
मासेभ्योनुदंततेवाअर्धमासेभ्योनुत्ताअसुराअहोरात्रेअश्रयंततेदेवाअब्रु
वन्नुपसदावेवोपायामेतितथेतितयामेवपूर्वाह्णउपसदमुपायंस्तयैवैनान
ह्नोनुदंततयामपराह्णेनयारात्रेस्तांस्तथोभाभ्यामहोरात्राभ्यामंतरायंस्तस्मा
त्पूर्वाह्णएवपूर्वयोपसदाप्रचरितव्यंस्वपराह्णेपरयातावंतमेवतद्द्विषतेलोकं

॥३९॥
राम

परिशिनष्टि॥२३॥जितयोवैनामैतायदुपसदोसपत्नांवाएताभिर्देवाविजितिंव्य
जयंतासपत्नांविजितिंविजयतेयएवंवेदयांदेवाएषुलोकेषुयामृतुषुयांमासे
षुयामर्धमासेषुयामहोरात्रयोर्विजितिंव्यजयंततांविजितिंविजयतेयएवंवेद
तेदेवाअबिभयुरस्माकंविप्रेमाणमन्विदमसुराआभविष्यंतीतितेव्युत्क्रम्या
मंत्रयंताग्निर्वसुभिरुदक्रामदिंद्रोरुद्रैर्वरुणआदित्यैर्बृहस्पतिर्विश्वैर्देवैस्तेतथा
व्युत्क्रम्यामंत्रयंततेब्रुवन्हंतयाएवनइमाःप्रियतमास्तन्वस्ताअस्यवरुणस्यरा
ज्ञोगृहेसन्निदधामहैताभिरेवनःसनसंगृणतैयोनएतदतिक्रामाद्यआलु
लोभयिषादितितथेतितेवरुणस्यराज्ञोगृहेतनूःसन्यदधततेयद्वरुणस्यराज्ञो
गृहेतनूःसन्यदधततत्तानूनप्त्रमभवत्तत्तानूनप्त्रस्यतानूनप्त्रत्वंतस्मादाहुर्न

ब्रा०१ ॥११॥

सनान्नूनत्रिणेद्व्रागधव्यमितितस्माद्धिदमसुरानान्वाभवंति ॥ २४ ॥ शिरोवाएतद्य
ज्ञस्ययदातिथ्यंग्रीवाउपसदः समानबर्हिषीभवतः समानंहिशिरोग्रीवमिषुंवा
एतांदेवाः समस्कुर्वतयदुपसदस्तस्या अग्निरनीकमासीत्सोमः शल्यंविष्णुस्ते
जनंवरुणःपर्णानितामाज्यधन्वानोव्यसृजंस्तयापुरोभिंदंत आयंस्तस्मादेता आ
ज्यहविषोभवंतिचतुरोग्रस्तनान्व्रतमुपेत्युपसत्सुचतुःसंधिर्ह्येषुरनीकंशल्य
त्री स्ते जनंपर्णानिन्स्तनान्व्रतमुपेत्युपसत्सुत्रिषंधिर्ह्येषुरनीकंशल्यंस्तेजनं ॥
द्वौस्तनौव्रतमुपेत्युपसत्सु द्विषंधिर्ह्येषुः शल्यंश्चह्येवतेजनं चैकंस्तनंव्रतमुपे
त्युपसत्स्वेकाह्येवेषुरित्याख्यायतएकयावीर्यंक्रियतेपरोवरीयांसोवाइमेलो ॥३१॥
काअर्वागंहीयांसः परस्तादर्वाचीरुपसदउपैत्येषामेवलोकानामभिजित्याउ राम

पसद्यायमीह्वुषइमांमेअग्नेसमिधमिमामुपसदंवनेरितितिस्त्रः स्तिस्त्रः सामिधे
न्योरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवद
तिजघ्निवृत्रीयाज्यानुवाक्याः कुर्यादग्निर्वृत्राणिजंघनदघउग्रइववशार्यहात्वंसो
मासिसत्पतिर्गयस्फानो अमीवहेदंविष्णुर्विचक्रमेत्रीणिपदाविचक्रमइत्येताविप ×च
र्यस्ताभिरपरांह्णयजतिघ्नंनंतोवाएताभिर्देवाः पुरोभिंदंत आयन्यदुपसदः
सछंदसः कर्तव्यानविछंदसोयद्धिछंदसः कुर्याद्वीवासुतङ्डंदध्यादी
श्वरोग्लावोजनितोस्तस्मात्सछंदसएवकर्तव्यानविछंदसस्तद्धस्माहापाविर्जी स
नश्रुतेयउपसदांकिलवैतद्ब्राह्मणंयस्मादप्यश्लीलस्यश्रोत्रियस्यमुखंव्येव
ज्ञायतेतृप्तामिवरेभतीवेत्याज्यहविषाह्युपसदोग्रीवारूमुखमध्यादि

ऋ०१
॥२०॥

तं तस्माद्यस्मात्तदाह ॥२५॥ देववर्म वा एतद्यत्प्रयाजाश्चानुयाजाश्च प्रयाजमननु
याजं भवत्येवे संशित्या अप्रतिशराय सकृदतिक्रम्याश्रावयति यज्ञस्याभिक्रा
त्या अनपक्रमाय तदाहुः क्रूरमिव वा एतत्सोमस्य राज्ञोंतेचरंति यदस्य घृतेना
तेचरंति घृतेन हि वज्रेणेंद्रो वृत्रमहंस्तद्यदंशुरंशुष्टे देव सोमाप्यायतामिंद्रायै
कधनविद आतुभ्यमिंद्रः प्यायतामात्वमिंद्राय प्यायस्वाप्याययास्मान्त्सखीन्त्स ॥ न
सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति राजानमाप्याययंति यदे
वास्य तत्क्रूरमिवांतेचरंति तदेवास्यैतेनाप्याययंत्यथो एनं वर्धयंत्येव द्यावा
पृथिव्योर्वा एष गर्भो यत्सोमो राजा तद्यदेष्टा रायः एष्टा वामानि प्रेषे भगाय ॥ ॥२०॥
ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति प्रस्तरे निह्नुवते द्यावापृथिवीभ्या राम्

मेव तन्नमस्कुर्वंत्यथो एने वर्धयंत्येव वर्धयंत्येव ॥२६॥ इति प्रथमपंचिकायां चतु
र्थोध्यायः ॥ सोमो वै राजा गंधर्वेष्वासीत्तं देवाश्च ऋषयश्चाभ्यध्यायन्कथमयमस्मा
न्त्सोमो राजागच्छेदिति सा वागब्रवीत्स्त्रीकामा वै गंधर्वा मयैव स्त्रिया भूतया पणध्व
मिति नेति देवा अब्रुवन्कथं वयं त्वदृते स्यामेति साब्रवीत्क्रीणीतैव यर्हि वाव वो
मयार्थो भविता तर्ह्येव वोहं पुनरागंतास्मीति तथेति तया महानग्न्या भूतया सोमं नं
राजानमक्रीणंस्तामनुकृतिमस्कन्नां वत्सतरीमाजंति सोमक्रयणीं तया सोमं
राजानं क्रीणंति तां पुनर्निष्क्रीणीयात्पुनर्हि सा तानागच्छत्तस्मादुपांशु वाचा चरि
तव्यं सोमे राजनि क्रीते गंधर्वेषु हि तर्हि वाग्भवति साग्नावेव प्रणीयमाने पुनरा
गच्छति ॥२७॥ अग्नये प्रणीयमानायानुब्रूहीत्याहाध्वर्युः प्र देवं देव्या धिया भ

ब्रा० १

॥२१॥

रंताजातंचेदसं॥ हव्यानोवक्षदानुषगितिगायत्रींब्राह्मणस्यानुब्रूयाद्गायत्रोवैब्राह्म
णस्तेजोवैब्रह्मवर्चसंगायत्रीतेजसैवैनंतद्ब्रह्मवर्चसेनसमर्धयतीमंमहेविदथ्याय
शूषमितित्रिष्टुभंराजन्यस्यानुब्रूयात्त्रैष्टुभोवैराजन्यओजोवाइंद्रियंवीर्यंत्रिष्टुबोज
सैवैनंतदिंद्रियेणवीर्येणसमर्धयतिशश्वत्कृत्वईड्यायप्रजभ्रुरितिस्वानामेवै
नंतच्छ्रैष्ठ्यंगमयतिशृणोतुनोदम्येभिरनीकैःशृणोत्वग्निर्दिव्यैरजस्रइत्याजरसंहा
स्मिन्नजस्रोदीदाययएवंवेदायमिहप्रथमोधायिधातृभिरितिजगतींवैश्यस्यानुब्रू
याज्जागतोवैवैश्योजागताःपशवःपशुभिरेवैनंतत्समर्धयतिवनेषुचित्रंविभ्वंविशेवि
शइत्यभिरूपायद्यज्ञेभिरूपंतत्समृद्धमयमुष्यप्रदेवयुरित्यनुष्टुभंवाचंविसृज ॥२१॥
तेवाग्वाअनुष्टुब्वाच्येवतद्वाचंविसृजतेऽयमुष्यइतिपदाहायमुष्यागमंयापुरागं राम

धर्वेषवाक्समित्येवतद्वाक्समृद्धंतेयमग्निरुरुष्यतीत्ययंवाअग्निरुरुष्यत्यमृतादि
वजन्मनइत्यमृतत्वमेवास्मिंस्तद्दधातिसहसश्चित्सहीयान्देवोजीवातवेकृतइति
देवोह्येषएतज्जीवातवेकृतोयदग्निरिळायास्त्वापदेवयंनाभापृथिव्याअधीति
तद्धाइळायास्पदंयदुत्तरवेदीनाभिर्जातवेदोनिधीमहीतिनिधास्यन्तोह्येनंभवंत्य
ग्नेहव्यायवोढवइतिहव्यंहिवक्ष्यन्भवत्यग्नेविश्वेभिःस्वनीकदेवैरूर्णावन्तंप्र
थमःसीदयोनिमितिविश्वैरेवैनंतद्देवैःसहासादयतिकुलायिनंघृतवन्तंसवित्र
इतिकुलायमिवह्येतद्यत्क्रियन्तेयत्सैतुदारवाःपरिधयोगुग्गुलूर्णास्तुकाःसुगन्धि गुं
तेजनानीतियज्ञंनययजमानायसाध्वितियज्ञमेवतदृजुधाप्रतिष्ठापयतिसीदहोतः
स्वउलोकेचि[कि]त्वानित्यग्निर्वैदेवानांहोतातस्यैषस्वोलोकोयदुत्तरवेदीनाभिःसा

श्री० १

॥२२॥

दधायज्ञंसुकृतस्ययोनावितियजमानोवैयज्ञोयजमानायैवैतामाशिषमाशास्ते
देवावीर्देवान्हविषायजास्यग्नेबृहद्यजमानेवयोधाइतिप्राणोवैवयः प्राणमेवत
द्यजमानेदधातिनिहोताहोतृषदनेविदानइत्यग्निर्वैदेवानांहोतातस्यैतद्धोतृषदनं
यदुत्तरवेदीनाभिस्त्वेषोदीदिवाँअसदत्सुदक्षइत्यासन्नोहिसतर्हिभवत्यदब्ध
व्रतप्रमतिर्वसिष्ठइत्यग्निर्वैदेवानांवसिष्ठः सहस्रंभरःशुचिजिह्वोअग्निरित्येषा
हवाअस्यसहस्रंभरतायदेनमेकंसंतंबहुधाविहरंतिप्रहवैसाहस्रंपोषमाप्नोति
यएवंवेदत्वंदूतस्त्वमुनःपरस्पाइत्युत्तमयापरिदधातित्वंवस्यआवृषभप्रणेता॥
अग्नेतोकस्यनस्तनेतनूनामप्रयुच्छंदीद्यद्बोधिगोपाइत्यग्निर्वैदेवानांगोपाअग्नि
मेवतत्सर्वतोगोप्तारंपरिदत्तआत्मनेचयजमानायचयत्रैवंविद्वानेतयापरिद

२२

राम

धात्यथोसंवत्सरीणामेवैतांस्वस्तिंकुरुतेताएताअष्टावन्वाहरूपसमृद्धाएतद्वैय
ज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदतितासांत्रिःप्रथमामन्वाहत्रि
रुत्तमांताद्वादशसंपद्यंतेद्वादशवैमासाःसंवत्सरःसंवत्सरःप्रजापतिःप्रजापत्या
यतनाभिरेवाभीराध्नोतियएवंवेदत्रिःप्रथमांत्रिरुत्तमामन्वाहयज्ञस्यैवतद्बर्सौ
नह्यतिस्थेम्नेबलायाविस्रंसाय॥२८॥हविर्धानाभ्यांप्रो[illegible]ह्यमाणाभ्यामनु
ब्रूहीत्याहाध्वर्युर्युजेवांब्रह्मपूर्व्यंनमोभिरित्यन्वाहब्रह्मणावाएतेदेवाअयुंज
तयद्धविर्धानेब्रह्मणैवैनेएतद्युङ्क्तेनवैब्रह्मण्वद्रिष्यतिप्रेतांयज्ञस्यशंभुवेतितृ
चंद्यावापृथिवीयमन्वाहतदाहुर्यद्धविर्धानाभ्यांप्रोह्यमाणाभ्यामनुवाचाहा
थकस्मात्तृचंद्यावापृथिवीयमन्वाहेतिद्यावापृथिवीवैदेवानांहविर्धानेआ

ब्रा० १
॥२२॥

स्तीर्णे ते ऽउ एवाद्यापिह विर्धाने ते ही दमंतरेण सर्वं हविर्यदिदं किंच तस्मात्स्व चंद्यावापृ
थिवीयमन्वाह यमेद्वयतमानेयंदेतमितियमेड्वह्येतेयतमानेप्रबाकुगितः प्रवांभ
रन्मानुषादेवयंतइतिदेवयंतोह्येनेमानुषाः प्रभरंस्यासीदतं स्वमुलोकं विदाने॥ स्वास
स्थ भवतमिंदवेनइतिसोमोवैराजेंदुः सोमायैवैनेएतद्राजन्आसदे चीक्रूपदधि
द्वयोरदधाउवथ्यंवचइतिद्वयोर्ह्येतत्तृतीयंछदिरधिनिधीयतउवथ्यंवचइतियदा
हयज्ञियंवैकर्मोवथ्यंवचोयज्ञमेवैतेनसमर्धयतियुतस्तुचामिथुनायासपर्यतः॥
असंयत्तोव्रतेतेक्षेतिपुष्यतीतियदेवादः पूर्वंयत्तवसदमाहतदेवैतेनशांत्याश
मयति भद्राशक्तिर्यजमानायस्न्वतइत्याशिषमाशास्तेविश्वारूपाणिप्रतिमु
चतेकविरितिविश्वरूपामन्वाहसरराद्यामीक्षमाणोनुब्रूयाद्धिम्घमिवहिरूपं

॥२२॥
रामः

रराद्यायाः शक्लमिवचकृष्णामिवचविश्वंरूपमवरुंधआत्मनेचयजमानायचयत्रै
वंविद्वानेतांररराद्यामीक्षमाणोन्वाहपरित्वागिर्वणोगिरइत्यन्वमयापरिदधाति
सयदेवहविर्धानेसंपरिश्रितेमन्येतायपरिदध्यादनग्नंभावुकाहहोतुश्चयज
मानस्यचभार्याभवंतियत्रैवंविद्वानेतयाहविर्धानयोः संपरिश्रितयोः परिदधा
तियजुषावाएतेसंपरिश्रियेतेयदध्वविर्धानेयजुषैवैनेएतत्परिश्रयंतितोयदेवा
ध्वर्युश्वप्रतिप्रस्थाताचोभयतोमेथ्यौनिहन्यातामथपरिदध्यादन्वहितेसंपरिश्रि
तेभवतस्ताएताअष्टावन्वाहरूपसमृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्क
र्मक्रियमाणमृगभिवदतितासांत्रिः प्रथमामन्वाहत्रिरुत्तमांताद्वादशसंपद्यं
तेद्वादशवैमासाः सवत्सरः संवत्सरः प्रजापतिः प्रजापत्यायतनाभिरेवाभीरा

ब्रा० १
॥२४॥

ध्नोतियएवंवेद॥त्रिः प्रथमांत्रिरुत्तमामन्वाहयज्ञस्यैवतद्बर्सौनह्यतिस्थेम्नेबलायाविस्त्रंसाय॥२९॥अग्नीषोमाभ्यांप्रणीयमानाभ्यामनुब्रूहीत्याहाध्वर्युःसावीर्हिदेवप्रथमायपित्रइतिसावित्रीमन्वाहतदाहुर्यदग्नीषोमाभ्यांप्रणीयमानाभ्यामनुवाचाहाथकस्मात्सावित्रीमन्वाहेतिसविताविप्रसवानामीशेसवितृप्रसूताएवैनोतत्प्रणयंतितस्मात्सावित्रीमन्वाहप्रैतुब्रह्मणस्पतिरितिब्राह्मणस्पत्यामन्वाहतदाहुर्यदग्नीषोमाभ्यांप्रणीयमानाभ्यामनुवाचाहाथकस्माद्ब्राह्मणस्पत्यामन्वाहेतिब्रह्मवैबृहस्पतिर्ब्रह्मैवाभ्यामेतत्पुरोगवमकर्णवैब्रह्मण्वद्रिष्यतिप्रदेव्येतुसूनृतेतिसस्नृतमेवतद्यज्ञंकरोतितस्माद्ब्राह्मणस्पत्यामन्वाहहोतादेवोअमर्त्यइतितृचमाग्नेयंगायत्रमन्वाहसोमेराजनिप्रणीयमानेसोमंवै

॥२४॥
राम

राजानंप्रणीयमानमंतरेणैवसदोहविर्धानान्यसुरारक्षांस्यजिघांसंस्तमग्निर्मायययात्यनयत्पुरस्तादेतिमाययेतिमाययाहिसतमत्यनयत्तस्माद्दूस्याग्निंपुरस्तात्धरंत्युपत्वाग्नेदिवेदिवउपप्रियंपनिप्नतमितितिस्रश्चैकांचान्वाहेऽध्वरोहवाएतौसंयंतौयजमानंहिंसितोर्यश्चासौपूर्वउद्धृतोभवतियमुचैमपरंप्रणयंतितद्यत्तिस्रश्चैकांचान्वाहसंजानानावेवैनौतत्संगमयतिप्रतिष्ठायामेवैनौतत्प्रतिष्ठापयत्यात्मनश्चयजमानस्यचाहिंसायाअग्नेजुषस्वप्रतिहर्यतद्वचइत्याहुत्यांहूयमानायामन्वाहाग्नयएवतज्जुष्टिमाहुतिंगमयतिसोमोजिगातिगातुविदितितृचंसौम्यंगायत्रमन्वाहसोमेराजनिप्रणीयमानेस्वयैवैनंतद्देवतयास्वेनछंदसासमर्धयतिसोमःसधस्थमासदमित्यासन्नस्यन्हिस

न

आ०१ ॥२५॥

तर्हिभवतिनदतिक्रोम्येवानुब्रूयात्सष्ठतद्वाग्नीध्रंकृत्वातमस्यराजावरुणस्तम
श्विनंतिवैष्णवीमन्वाहक्रतुंसचंतमारुतस्यंवेधसः॥दाधारदक्षमुत्तमम
हर्विदंव्रजंचविष्णुःसखिवाँ॥अपोर्णुतइतिविष्णुर्वैदेवानांद्वारपःसएवास्मा
एतद्वारंविवृणोत्यंतश्वप्रागाअदितिर्भवासीँप्रपाद्यमानेन्वाहश्येनोनयोनिं ति
सदनंधियाकृतमित्यासन्नेहिरण्ययमासदंदेवएषतीतिहिरण्मयमिवहवा
एषएतंद्देवेभ्यश्छदयतियत्कृष्णाजिनेतस्माद्देतामन्वाहास्तभ्नाद्यामसुरो
विश्ववेदाइतिवारुण्यापरिदधातिवरुणदेवत्योवाएषतावद्यावदुपनद्धोया
वत्सशिश्रितानिप्रपद्यतेस्वयैवैनंतद्देवतयास्वेनछंदसासमर्धयतितंयदुपवा य॥२६
धावेयुरभयंवेछरन्नेवावंदस्ववरुणंबृहंतमित्येतयापरिदध्याद्यावेऽभो राम

हाभयमिछतियावद्वासोहाभयंध्यायतितावद्वासोहाभयंभवतियत्रैवंविद्वानेत
यापरिदधातितस्मादेवंविद्वानेतयैवपरिदध्यात्ताएताःसप्तदशान्वाहरूपस
मृद्धाएतद्वैयज्ञस्यसमृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदतितासां
त्रिःप्रथमामन्वाहत्रिरुत्तमांता[illegible]एकविंशतिःसंपद्यंतएकविंशोवैप्रजाप
तिर्द्वादशमासाःपंचर्तवस्त्रयइमेलोकाअसावादित्यएकविंशउत्तमाप्रतिष्ठा
तद्देवंक्षत्रंसाश्रीस्तदाधिपत्यंतद्ब्रध्नस्यविष्टपंतत्प्रजापतेरायतनंतत्स्वारा
ज्यमृध्नोत्यैनमेवैताभिरेकविंशत्यैकविंशत्या॥३०॥७॥ ७॥
श्रीगजाननप्रसन्न॥ ॥इतिप्रथमपंचिकासमाप्तः॥श्रीकृष्णार्पणम
स्तु॥सान्यापनामकसदाशिवात्मजबल्लाळेनलिखितं॥शके१७६०विलं॥
हरिःॐम्॥यज्ञेनवैदेवाऽऊर्ध्वाः॥ ७॥ ७॥ ७॥

श्रो०श्र

॥२६॥

॥ इति प्रथमपंचिकासमाप्तः ॥ ॥

॥२६॥
हेरंब

॥ अथ श्राद्धत्वाद्वितीयपंचिकाप्रारंभः ॥

श्रीगणेशायनमः॥ हरिः ॐ म॥ यज्ञेनवैदेवाऊर्ध्वाःस्वर्गंलोकमायंस्तेबिभयुरि
मंनोदृष्ट्वामनुष्याश्चऋषयश्चानुप्रज्ञास्यंतीतितंवैयूपेनैवायोपयंस्तंयद्यूपेनै
वायोपयंस्तद्यूपस्ययूपत्वंतमवाचीनाग्रंनिमि त्योर्ध्वाउदायंस्ततोवैमनुष्याश्च
ऋषयश्चदेवानांयज्ञवास्त्वभ्यायन्यज्ञस्यकिंचिदेषिष्यामः प्रज्ञात्याइतितेवै
यूपमेवाविंदन्नवाचीनाग्रंनिमितंतेविदुरनेनवैयज्ञमयूयुपंनितितमुत्खायो देवा ५
र्ध्वंन्यमिन्वंस्ततोवैतेप्रय ज्ञमजानन्प्रस्वर्गंलोकंतद्यद्यूपऊर्ध्वोनिमीयतेय
ज्ञस्यप्रज्ञात्यैस्वर्गस्यलोकस्यानुख्यात्यैवज्रोवाएषयद्यूपःसोष्टाश्रिःकर्तव्यो
ष्टाश्रिर्वैवज्रःस्तंतंप्रहरतिद्विषतेभ्रातृव्यायवधंयोस्यस्तृत्य स्तस्मैस्तर्तवै

ब्रा०२
॥१॥

वज्रोवैयूपःसएषद्विषतोवधउद्यतस्तिष्ठतितस्माधाप्येतर्हियोद्वेष्टितस्याप्रियं
भवत्यमुष्यायंयूपोमुष्यायंयूपइतिदृष्ट्वाखादिरंयूपंकुर्वीतःस्वर्गकामःखादि
रेणवैयूपेनदेवाःस्वर्गंलोकमजयंस्तथैवैतद्यजमानःखादिरेणयूपेनस्वर्गंलो
कंजयतिबैल्वंयूपंकुर्वीतान्नाद्यकामःपुष्टिकामःसमांसमांवैबिल्वोगृभीतः
स्तदंनाद्यस्यरूपमामूलाच्छाखाभिरनुचितस्तत्पुष्टेःपुष्यतिप्रजांचपशूंश्च
यएवंविद्वान्बैल्वंयूपंकुरुतेयदेवबैल्वां॥बिल्वंज्योतिरितिवाऽआचक्षतेज्यो
तिस्वेषुभवतिश्रेष्ठस्वानांभवतियएवंवेदपालाशंयूपंकुर्वीततेजस्कामोब्रह्मव
र्चसकामस्तेजोवैब्रह्मवर्चसंवनस्पतीनांपलाशस्तेजस्वीब्रह्मवर्चसीभवतिय ॥१॥
एवंविद्वान्पालाशंयूपंकुरुतेयदेवपालाशो॥सर्वेषांवाएषवनस्पतीनांयो

निर्यत्पलाशस्तस्मात्पलाशस्यैवपलाशेनाचक्षतेमुष्यपलाशममुष्यपलाशमिति
सर्वेषांहास्यवनस्पतीनांकामउपाप्तोभवतियएवंवेद॥१॥अंज्मोयूपमनुब्रूही
त्याहाध्वर्युरंजंतित्वामध्वरेदेवयंतइत्यन्वाहाध्वरेदेवयंतोंजंतिवनस्पतेमधुना ह्येनं ३
दैव्येनेत्येतद्वैमधुदैव्यंयदाज्यंयदूर्ध्वस्तिष्ठाद्द्रविणेहधत्ताद्यद्वाक्षयोमातुर
स्याउपस्थइतियदिचतिष्ठासियदिचशयासैद्रविणमेवास्मासुधत्तादित्येवतदा
होच्छ्रयस्ववनस्पतइत्युच्छ्रीयमाणायाभिरूपायद्यज्ञेभिरूपंतत्समृद्धंवर्ष्मन्पृ
थिव्याऽअधीत्येतद्वैवर्ष्मपृथिव्यैयत्रयूपमुन्मिन्वंतिसुमितीमीयमानोवर्चोधा
यज्ञवाहसइत्याशिषमाशास्तेसमिद्धस्यश्रयमाणःपुरस्तादितिसमिद्धस्य
ह्येषएतत्पुरस्ताच्छ्रयतेब्रह्मवन्वानोऽजरंसुवीरमित्याशिषमेवाशास्तेऽआ

ब्रा०२
॥२॥

रेऽअस्मदमतिंबाधमानइत्यशनायावैपाप्मामतिस्तामेवतदारान्नुदतेयज्ञायज्ञियजमा
नाच्छोध्रुयस्वमहतेसौभगायेत्याशिषमेवाशास्त्तेऊर्ध्वऊषुणऊतयेतिष्ठादेवोनस
वितेतियथैवदेवानांनीतितदेषामोऽमितितिष्ठदेवइवसवितेत्येवतदाहोर्ध्वोवाजस्य
सनितेतिवाजसनिमेवैनंतत्धनसांसनोतियदंजिभिर्वाघद्भिर्विह्वयामहइतिछंदां
सिवाऽअंजयोवाघतस्तैरेतद्देवान्यजमानाविह्वयंतेममयज्ञमागच्छतममय
ज्ञमितियदिहवाअपिबहवइवयजंतेथहास्यदेवायज्ञमेवगच्छंतियत्रैवंविद्वान्नता
ह
मन्वाहोर्ध्वोनःपाह्यंहसोनिकेतुनाविश्वंसमत्रिणंदहेतिरक्षांसिवैपाप्माऽत्रिणोरक्षां
सिपाप्मानंदहेत्येवतदाहकृधीनऊर्ध्वाञ्चरथायजीवसइतियदाहकृधीनऊर्ध्वा
॥२॥
चरणायजीवसइत्येवतदाहयदिहवाऽअपिनीतइवयजमानोभवतिपरिहैवैनं
रा.मू.

तत्संवत्सरायददातिविदादेवेषुनोदुवइत्याशिषमेवाशास्तेजातोजायतेसुदिनत्वेऽ
अह्नामितिजातोह्येषएतज्जायतेसमर्यऽआविदथेवर्धमानइतिवर्धयंत्येवैनंतसु
नंतिधीराअपसोमनीषेतिपुनंत्येवैनंतद्देवयाविप्रउदियर्तिवाचमितिदेवेभ्यएव
युवा
वैनंतन्निवेदयतियुवासाःपरिवीतऽआगादित्युत्तमयापरिदधातिप्राणोवैयुवासु
वासाःसोयंशरीरैःपरिवृतःसउश्रेयान्भवतिजायमानइतिश्रेयान्श्रेयान्ह्येषए
तद्भवतिजायमानस्तंधीरासःकवयउन्नयंतिस्वाध्योमनसादेवयंतइतियेवाऽअ
नूचानास्तेकवयस्तएवैनंतदुन्नयंतितिताएताःसप्तान्वाहरूपसमृद्धाएतद्वैयज्ञस्य
समृद्धंयद्रूपसमृद्धंयत्कर्मक्रियमाणमृगभिवदतितासांत्रिःप्रथमामन्वाहत्रिरुत्तमां
ताएकादशसंपद्यंतएकादशाक्षरावैत्रिष्टुप्त्रिष्टुबिंद्रस्यवज्रऽइंद्रोयतनाभिरेवा

ब्रा०२
॥३॥

भीराध्नोतियएवंवेदत्रिःप्रथमांत्रिरुत्तमामन्वाहयज्ञस्यैवतद्बर्सौनह्यतिस्थेम्नेबला
याविस्रंसाय ॥२॥ तिष्ठद्यूपा३अनुप्रहरे३त्इत्याहुस्तिष्ठेत्पशुकामस्यदेवेभ्यो
वैपशवोन्नाद्यायालंभायनातिष्ठंततपक्रम्यप्रतिवावदतीतिष्ठन्नास्मानाल
प्स्यध्वेनास्मानितिततोवैदेवाएतंयूपंवज्रमपश्यंस्तमेभ्यउदश्रयंस्तस्माद्बिभ्य
तउपावर्तंततमेवाद्याप्युपावृत्तास्ततोवैदेवेभ्यःपशवोन्नाद्यायालंभायातिष्ठंतति
ष्ठंतेस्मैपशवोन्नाद्यायालंभाययएवंवेदयस्यचैवंविदुषोयूपस्तिष्ठत्यनुप्रहरे
त्स्वर्गकामस्यतमुहस्मैतंपूर्वेन्वेवप्रहरंतियजमानोवैयूपोयजमानःप्रस्तरोग्नि
र्वैदेवयोनिःसोग्नेर्देवयोन्याआहुतिभ्यःसंभूयहिरण्यशरीरऊर्ध्वःस्वर्गंलो
कमेष्यतीत्यथयेतभ्योवरआसंस्तएतंस्वरुमपश्यंन्यूपशकलंतंतस्मिन्काल

॥३॥
रामः

३

नुप्रहरेत्तत्रसकाममुपाप्तोयोनुप्रहरणेतत्रसकाममुपाप्नोयस्थाणौसर्वाभ्योवाएषदेव
ताभ्यऽआत्मानमालभतेयोदीक्षतेग्निःसर्वादेवताःसोमःसर्वादेवताःसयदग्नीषो
मीयंपशुमालभतेसर्वाभ्यऽएवतद्देवताभ्योयजमानऽआत्मानंनिष्क्रीणीतेतदाहु
र्द्विरूपोग्नीषोमीयःकर्तव्योद्विदेवत्योहीतितत्तन्नादृत्यंपीवइवकर्तव्यःपीवोरूपा
वैपशवःकृशितइवखलुवैयजमानोभवतितद्यत्पीवापशुर्भवतियजमानमेवतत्स्वे
नमेधेनसमर्धयतितदाहुर्नाग्नीषोमीयस्यपशोरश्नीयात्पुरुषस्यवाएषोश्नातियो
ग्नीषोमीयस्यपशोरश्नातियजमानोह्येतेनात्मानंनिष्क्रीणीतेतद्इतितत्तन्नादृत्यंवा
र्त्रघ्नंवाएतद्धविर्यदग्नीषोमीयोग्नीषोमाभ्यांवाइंद्रोवृत्रमहंस्तावेनमब्रूतामा
वाभ्यांवैवृत्रमवधीर्वरंतेवृणावहाइतिवृणाथामितितावेतमेववरमवृणातां

श्री०२

॥४॥

श्वःसुत्यायांपशुंसएनयोरेषोच्युतोवरवृतोह्येनयोस्तस्मात्तस्याशितव्यंचैवली
प्सितव्यंच॥३॥आप्रीभिराप्रीणातितेजोवैब्रह्मवर्चसमाप्रियस्तेजसैवैनंतद्ब्रह्मवर्च
सेनसमर्धयतिसमिधोयजतिप्राणावैसमिधःप्राणाहीदंसर्वंसमिंधतेयदिदंकिं
चप्राणानेवतत्प्रीणातिप्राणान्यजमानेदधातितनूनपातंयजतिप्राणोवैतनूनपात्स
हितन्वःपातिप्राणमेवतत्प्रीणातिप्राणंयजमानेदधातिनराशंसंयजतिप्रजावै
नरोवाक्शंसःप्रजांचैवतद्वाचंचप्रीणातिप्रजांचवाचंचयजमानेदधातीळोय
जत्यन्नंवाइळोन्नमेवतत्प्रीणात्यन्नंयजमानेदधातिबर्हिर्यजतिपशवोवैबर्हिःप
शूनेवतत्प्रीणातिपशून्यजमानेदधातिदुरोयजतिवृष्टिर्वैदुरोवृष्टिमेवतत्प्रीणा
तिवृष्टिमन्नाद्यंयजमानेदधात्युषासानक्तायजत्यहोरात्रेवाउषासानक्ताहोरात्रे

न

॥४॥ राम

एवतत्प्रीणात्यहोरात्रयोर्यजमानंदधातिदैव्याहोतारायजतिप्राणापानौवैदैव्याहोताराप्राणा
पानावेवतत्प्रीणातिप्राणापानौयजमानेदधातितिस्रोदेवीर्यजतिप्राणोवाअपानोव्यानस्ति
स्रोदेव्यस्ताएवतत्प्रीणातितायजमानेदधातित्वष्टारंयजतिवाग्वैत्वष्टावाग्घीदंसर्वंता
ष्टीवबाचमेवतत्प्रीणातिवाचंयजमानेदधातिवनस्पतिंयजतिप्राणोवैवनस्पतिःप्राण
मेवतत्प्रीणातिप्राणंयजमानेदधातिस्वाहाकृतीर्यजतिप्रतिष्ठावैस्वाहाकृतयःप्रति
ष्ठायामेवतद्यज्ञमंततःप्रतिष्ठापयतिताभिर्यथऋष्याप्रीणीयाद्यद्यथऋष्याप्रीणा
तियजमानमेवतद्बंधुतायानोत्सृजति॥४॥पर्यग्नयेक्रियमाणायानुब्रूहीत्या
हाध्वर्युरग्निर्होतानोअध्वरइतितृचमाग्नेयंगायत्रमन्वाहपर्यग्निक्रियमाणेस्वयै
वैनंतद्देवतयास्वेनछंदसासमर्धयतिवाजीसन्परिणीयतइतिवाजिनमिवह्येनं

त्य

ब्रा०२ ॥५॥

संतंपरिणयंतिपरित्रिर्विस्त्यध्वर्युराग्नीरथीरिंधेत्येषहिरथीर्यद्वाध्वर्युःपर्यग्निपरिवाज्ज
पतिःकविरित्येषहिवाजानांपतिरतउपप्रेष्यहोतर्हव्यादेवेभ्यइत्याहाध्वर्युरेजेद
ग्निरसनद्वाजमितितिमैत्रावरुणउपप्रैषंप्रतिपद्यतेतदाहुर्यदध्वर्युर्होतारमुपप्रे
ष्यत्यथकस्मान्मैत्रावरुणउपप्रैषंप्रतिपद्यतइतिमनोवैयज्ञस्यमैत्रावरुणोवा
ग्यज्ञस्यहोतामनसावाइषितावाग्वदतियांह्यन्यमनावाचंवदत्यसुर्यावैसावा
गदेवजुष्टानेद्यन्मैत्रावरुणउपप्रैषंप्रतिपद्यतेमनसैवतद्वाचमीरयतितन्मन
सेरितयावाचादेवेभ्योहव्यंसंपादयति ॥ ५ ॥ दैव्याःशमितारआरभध्वमुत
मनुष्याइत्याहयेचैवदेवानांशमितारोयेचमनुष्याणांतानेवतत्संशास्त्युपनय
तमेध्याइरुआशासानामेधपतिभ्यांमेधमितिपशुर्वै [illegible] मेधोयजमानोमेधपति

य ॥५॥ राम

यजमानमेवतत्स्वेनमेधेनसमर्धयत्यथोखल्वाहुर्यस्यैवावकस्यैचदेवतायैपशुरालभ्य
तेसैवमेधपतिरितिसयद्येकदेवत्यःप[illegible]शुःस्यान्मेधपतयइतिब्रूयाद्यदिद्विदेवत्योमे
धपतिभ्यामितियदिबहुदेवत्योमेधपतिभ्यइत्येतदेवस्थितंप्रास्माअग्निंभरते
तिपशुर्वैनीयमानःसमृत्युंप्रापश्यत्सदेवान्नान्वकामयतैतुंतंदेवाअब्रुवन्नेहि
स्वर्गंवैत्वालोकंगमयिष्यामइतिसतथेत्यब्रवीत्तस्यवैमेयुष्माकमेकःपुरस्ता
दैत्वितितथेतितस्याग्निःपुरस्तादैत्सोग्निमनुप्राच्यवततस्मादा[illegible]हुराग्नेयोवाव
सर्वःपशुरग्निंहिसोनुप्राच्यवततेतितस्माद्धस्याग्निंपुरस्ताद्धरंतिस्तृणीतबर्हि
रित्योषध्यात्मोवैपशुःपशुमेवतत्सर्वात्मानंकरोत्यन्वेनंमातामन्यतामनुपिता
नुभ्रातासगर्भ्योनुसखासयूथ्यइतिजनित्रैरेवैनंतत्समनुमतमालभंतउ

श्री०२
||६||

दीचीनां अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादंतरिक्षम
सुं दिशः श्रोत्रं पृथिवीं शरीरमित्येष्वेवैनं तल्लोकेष्वादधात्येकधास्य त्वचमाछ्य
तात्पुरा नाभ्या अपिशसो वपामुत्खिदतादंतरेवोष्माणं वारयध्वादिति पशु
ष्वेव तत्प्राणान्दधाति श्येनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोषणी कश्य
पेवांसाछिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्रयस्ता अ
नुष्ठ्योच्यावयताद्गात्रं गात्रमस्यानूनं कृणुतादित्यंगान्येवास्य तद्गात्रा
णि प्रीणात्यूवध्यगोहं पार्थिवं खनतादित्याहौषधं वा ऊवध्यमियं वा ओष
धीनां प्रतिष्ठा तदेनत्स्वायामेव प्रतिष्ठायामंततः प्रतिष्ठापयति ॥ ६ ॥

राम
||६||

अस्ना रक्षः संसृजतादित्याह तुषैर्वै फलीकरणैर्देवा हविर्यज्ञेभ्यो रक्षांसि निर
भजन्नस्ना महायज्ञात्स यदस्ना रक्षः संसृजतादित्याह रक्षांस्येव तत्स्वेन भाग अ
धेयेन यज्ञान्निरवदयते तदाहुर्न यज्ञे रक्षसां कीर्तयेत्कानि रक्षांसि ऋतरक्षा वै
यज्ञ इति तदु वा आहुः कीर्तयेदेव यो वै भागिनं भागान्नुदते चयते वैनं स यदि
वैनं न चयतेथ पुत्रमथ पौत्रं चयते त्वेवैनमिति स यदि कीर्तयेदुपांशु कीर्त
येत्तिर इव वा एतद्वाचो यदुपांशु तिर इव वैतद्यद्रक्षांसि यथ यदुच्चैः कीर्तये
दीश्वरो हास्य वाचो रक्षो भाषो जनितोर्यो यं राक्षसीं वाचं वदति स यां वै दृप्तो
वदति यामुन्मत्तः सा वै राक्षसी वाङ् नात्मना दृप्यति नास्य प्रजायां जायते ह्मत्रा
य एवं वेद वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोकं तनये रविता रव

श्री०२
॥ ७ ॥
कृ

छमितारइतिये चैवदेवानांशमितारोयेचमनुष्याणांतेभ्यएवैनंतत्परिददात्य
ध्रिगोशमीध्वंसुशमिशमीध्वंशमीध्वमध्रि गा३उ इतित्रिर्ब्रूयादपापेतिचाध्रिगु
र्वैदेवानांशमितापापोनिग्रभीताशमितृभ्यश्चैवैनंतन्निग्रभीतृभ्यश्चसंप्रयछ
तिशमितारोयदत्रसुकृतंणवथास्मासुतद्यद्दुष्कृतमन्यत्रतदित्याहाग्निर्वैदे
वानांहोतासीत्सएनंवाचाव्यशाद्वाचावाएनंहोताविशास्तितद्यदर्वाग्वस
रःकृतंतंतियदुल्बणंयद्विथुरंक्रियतेशमितृभ्यश्चैवैनत्तन्निग्रभीतृभ्यश्च
समनुदिशतिस्वस्त्येवहोतोन्मुच्यतेसर्वायुःसर्वायुत्वायसर्वमायुरेति
यएवंवेद ॥ ७ ॥ पुरुषंवैदेवाःपशुमालभंततस्मादालब्धान्मेधउदक्रा
मत्सोश्वंप्राविशत्तस्मादश्वोमेध्योभवदथैनमुत्क्रांतमेधमत्यार्जंतस

राम
॥ ७ ॥

किंपुरुषोभवत्तेश्वमालभंतसोश्वादालब्धादुदक्रामत्सगांप्राविशत्तस्माद्गौ
र्मेध्योभवदथैनमुत्क्रांतमेधमत्यार्जंतसगौरमृगोभवत्तेगामालभंतस
गोरालब्धादुदक्रामत्सोविंप्राविशत्तस्मादविर्मेध्योभवदथैनमुत्क्रांतमेध
मत्यार्जंतसगवयोभवत्तेविमालभंतसोवेरालब्धादुदक्रामत्सोजंप्राविश
त्तस्मादजोमेध्योभवदथैनमुत्क्रांतमेधमत्यार्जंतस३उष्ट्रोभवत्सोजेज्यो
क्तमामिवारमततस्माद्देषएतेषांपशूनांप्रयुक्ततमोयदजस्तेजमालभं
तसोजादालब्धादुदक्रामत्सइमांप्राविशत्तस्मादियंमेध्याभवदथैनमु
त्क्रांतमेधमत्यार्जंतसशरभोभवत्तएतउत्क्रांतमेधा [illegible] अमेध्याःप
शवस्तस्मादेतेषांनाश्नीयात्तमस्यामन्वगच्छंत्सोनुगतोव्रीहिरभवत्त

ब्रा० २

॥ ९ ॥

घसंशोपुरोळाशा मनुनिर्वपंतिसमेधेननःपशुनेष्टमसत्केवलेननःपशुने
ष्टमसदितिसमेधेनहास्यपशुनेष्टंभवतिकेवलेनहास्यपशुनेष्टंभवतियए
वंवेद ॥ ९ ॥ सवाएषपशुरेवालभ्यतेयत्पुरोळाशस्तस्ययानिकिंशारूणिता
निरोमाणियेतुषाःसात्वग्येफलीकरणास्तदसृग्यत्पिष्टंकिक्नसास्तन्मां
संयत्किंचित्कंसारंतदस्थिसर्वेषांवाएषपशूनांमेधेनयजतेयःपुरोळाशे
नयजतेतस्मादाहुःपुरोळाशसत्त्रंलोक्यमितियुवमेतानिदिविरोचना
न्यग्निश्चसोमसक्रतूअधत्तं ॥ युवंसिंधूंरभिशस्तेरवद्यादग्नीषोमाव
मुंचतंगृभीतानितिवपायैयजतिसर्वाभिर्वाएषदेवताभिरालब्धोभवति

कृष्ण

॥ ९ ॥

योदीक्षितोभवतितस्मादाहुर्नदीक्षितस्याश्नीयादितिसयदग्नीषोमा

वमुंचतंगृभीतानितिवपायैयजतिसर्वाभ्यएवतद्देवताभ्योयजमानंप्रमुं
चतितस्मादाहुरशितव्यंवपायांहुतायांयजमानोहिसतर्हिभवतीत्यान्यं
दिवोमातरिश्वाजभारेतिपुरोळाशस्ययजत्यमथ्नादन्यंपरिश्येनोऽअ
द्रेरितीतइवचह्येषइतइवचमेधःसमाहृतोभवतिस्वदस्वहव्यासमिषो
दिदीहीतिपुरोळाशःस्विष्टकृतोयजतिहविरेवास्माएतत्स्वदयतीषमूर्ज
मात्मंधत्तइळामुपह्वयतेपशवोवाइळापशूनेवतदुपह्वयतेपशून्यजमा

य

नेदधाति ॥ १० ॥ मनोतायैहविषोवदीयमानस्यानुब्रूहीत्याहाध्वर्युस्त्वं
ह्यग्नेप्रथमोमनोतेतिसूक्तमन्वाहतदाहुर्यदन्यदेवत्यउतपशुर्भवत्यथ
कस्मादाग्नेयीरेवमनोतायैहविषोवदीयमानस्यान्वाहेतितिस्रोवैदेवा

ऋ॰ ०२

॥१॥

नांमनोतास्तासुहितेषांमनांस्योतानिवाग्वैदेवानांमनोतातस्यांहितेषांमनां
स्योतानिगौर्वैदेवानांमनोतातस्यांहितेषांमनांस्योतान्यग्निर्वैदेवानांमनो
तातस्मिन्हितेषांमनांस्योतान्यग्निःसर्वामनोताअग्नौमनोताःसंगच्छंतेत
स्मादाग्नेयीरेवमनोतांतोयेहविषोवदीयमानस्यान्वाहाग्नीषोमाहविषः
प्रस्थितस्येतिहविषायजतिहविषइतिरूपसमृद्धाप्रस्थितस्येतिरूपसमृद्धा
सर्वाभिर्हास्यसमृद्धिभिःसमृद्धंहव्यंदेवानप्येतियएवंवेदवनस्पतिंयज
तिप्राणोवैवनस्पतिर्जीवंहास्यहव्यंदेवानप्येतियएवंविद्वान्वनस्पतिं

श

यजतिस्विष्टकृतंयजतिप्रतिष्ठावैस्विष्टकृत्प्रतिष्ठायामेवतद्यज्ञमंततःप्रति

हरंबु

५६॥

ष्ठापयतीळामुपह्वयतेपशवोवाइळापशूनेवतदुपह्वयतेपशून्यजमाने

दधातिदधाति॥१०॥प्रथमोध्यायः॥ ॥देवावैयज्ञमतन्वततांस्तन्वानानसु
राअभ्यायन्यज्ञवैशसमेषांकरिष्याम इतितानाप्रीतेपशौपुरइवपर्यग्नेर्यूपंप्रतिपु
रस्तादुपायंस्तेदेवाःप्रतिबुध्याग्निमयीःपुरस्त्रिपुरंपर्यास्यंतयज्ञस्यचात्मनश्च
गुप्त्यैताएषामिमाऽग्निमय्यःपुरोदीप्यमानाभ्राजमानाऽतिष्ठंस्ताअसु
राऽअनपधृष्येवापाद्रवंस्तेग्निनैवपुरस्तादसुररक्षांस्यपाघ्नताग्निनापश्चात्त
थैवैतद्यजमानायत्पर्यग्निकुर्वंत्यग्निमयीरेवतत्पुरस्त्रिपुरंपर्यस्यंतेयज्ञस्य
चात्मनश्चगुप्त्यैतस्मात्पर्यग्निकुर्वंतितस्मात्पर्यग्नये ■■■ न्वाहतंवाएतंपुशुमा
प्रीतंसंतंपर्यग्निकृतमुदंचंनयंतितस्योल्मुकंपुरस्ताद्धरंतियजमानोवाएष
निदानेनयत्पशुस्तेनैवज्योतिषायजमानःपुरोज्योतिःस्वर्गंलोकमेष्यतीति

ब्रा०२
॥१०॥

तेनज्योतिषायजमानः पुरोज्योतिःस्वर्गंलोकमेतितंयत्रनिहनिष्यंतोभवंतितद
शस्त्वा मरुत्वतीयया यजति यथाभागं तद्देवताः प्रीणाति ये त्वाहि

८

रामः
॥३४॥

हत्ये मघवन्नवर्धन्ये शांबरे हरिवो ये गविष्टौ ॥ ये त्वा नूनमनुमदंति वि
प्राः पिबेंद्र सोमं सगणो मरुद्भिरिति यत्र यत्रैवैभिर्व्यजयत यत्र यत्र वी
र्यमकरोत्तद्देवैतत्समनुवेद्य ब्रूणेनान्त्सोमपीथान्करोति ॥ २० ॥
इंद्रो वै वृत्रं हत्वा सर्वा विजितीर्विजित्याब्रवीत्प्रजापतिमहमेतदसा
नि यत्र महं महानसानीति स प्रजापतिरब्रवीदथ कोऽहमिति यदेवैतदवो
चऽइत्यब्रवीत्ततो वै को नाम प्रजापतिरभवत्को वै नाम प्रजापतिर्य
न्महानिंद्रोऽभवत्तन्महेंद्रस्य महेंद्रत्वं स महान्भूत्वा देवताऽअब्रवी
दुद्धारं मऽउद्धरतेति यथाप्येतर्हिच्छति यो वै भवति यः श्रेष्ठताम
श्नुते स महान्भवति तं देवाऽअब्रुवन्त्स्वयमेव ब्रूष्व यत्ते भविष्यतीति

पति

ब्रा.तृ.
॥१५॥

सऽएतं माहेंद्रं ग्रहमभ्रूत माध्यंदिनं सवनानां निष्केवल्यमुक्थानां त्रि
ष्टुभं छंदसां पृष्ठं साम्नां तमस्माऽउत्थारमुदहरन्नुदस्माऽउद्धारं हरंति य
ऽएवं वेद तं देवाऽअब्रुवन्त्सर्वं वाऽअवोचथाऽअपि नोऽत्रास्त्विति स
नेत्यब्रवीत्कथं वोऽपिस्यादिति तमब्रुवन्नप्येव नोऽस्तु मघवन्निति ता
नीक्षतेव ॥२१॥ ते देवाऽअब्रुवन्नियं वाऽइंद्रस्य प्रिया जाया वावा
ता प्रासहा नामास्यामेवेच्छामहाऽइति तथेति तस्यामैच्छन्त सेना
नब्रवीत्प्रातर्वः प्रतिवक्तास्मीति तस्मात्स्त्रियः पत्याविच्छंते त
स्मादु स्त्र्यनुरात्रं पत्याविच्छते तां प्रातरुपायन्त्सेतदेव प्रत्यपद्य
त यद्वा वान पुरुतमं पुराषाट्कावत्रहेंद्रो नामान्यप्राः॥ अचेति प्रा

रा.मू.
॥१५॥

विष्मा

सहस्पतिस्तुविष्माणिति तींद्रो वै प्रासहस्पतिस्तुविष्मान्यदीमुश्मसि कर्त्तवे क
रत्तदिति यदेवैतद्वोऽवामाकरचादित्येवैनांस्तदब्रवीत्ते देवाऽअब्रुव
न्नप्यस्याऽइहास्तु या नोऽस्मिन्न वैकमविदददिति तथेति तस्याऽअप्य
त्राकुर्वंस्तस्मादेषात्रापि शस्यते यद्वा वान पुरुतमं पुराषाळिति से
ना वाऽइंद्रस्य प्रिया जाया वावाता प्रासहा नाम कोनाम प्रजापतिः श्व
शुरस्तं स्याऽअर्धोत्तिष्ठं स्तृणामुभयतः परिच्छिद्येतरांसे नामभ्यस्य
तु प्रासहे कस्त्वापश्यतीति तद्यथैवादस्नुषाश्वशुराल्लज्जमानानि
लीयमानैत्येवमेव सा सेनाभज्यमानानि लीयमानैति यत्रैवं विद्वांस्त
णामुभयतः परिच्छिद्येतरांसे नामभ्यस्यति प्रासहे कस्त्वापश्यतीति

×द्यास्यकामेसेनाजयेत्त ×४

ब्रा·तृ·
॥१६॥

तानिंद्रऽउवाचापि वोऽत्रास्त्विति ते देवाऽअब्रुवन्विराड्याज्यास्तु निष्केवल्यस्य
या त्रयस्त्रिंशदक्षरा॥ त्रयस्त्रिंशद्वै देवाऽअष्टौ वसवऽएकादश रुद्रा द्वाद
शादित्याः प्रजापतिश्च वषट्कारश्च देवताऽअक्षरभाजः करोत्यक्षरम
क्षरमेव तद्देवताऽअनुप्रपिबंति देवपात्रेणैव तद्देवतास्तृप्यंति यं का
मयेतानायतनवान्स्यादित्यविराजास्य यजेद्गायत्र्या वा त्रिष्टुभा वान्ये
न वा छंदसा वषट्कुर्यादनायतनवंतमेवैनं तत्करोति यं कामयेताय
तनवान्स्यादिति विराजास्य यजेत्पिबा सोममिंद्र मंदतु त्वेत्येतयायत
नवंतमेवैनं तत्करोति॥२२॥ ऋक्च वाऽइदमग्रे साम चास्तां सैव
नामऽर्गासीदमो नाम साम सा वाऽऋक्सामोपावदन्मिथुनं संभ

राम
॥१६॥

वाव प्रजात्याऽइति नेत्यब्रवीत्साम ज्यायान्वाऽअतो मम महिमेति ते द्वे भू
त्वोपावदतां तेन प्रति चन समवदत तास्तिस्रो भूत्वोपावदंस्तत्तिसृभिः
समभवद्यत्तिसृभिः समभवत्तस्मात्तिसृभिः स्तुवंति तिसृभिरुद्गा
यंति तिसृभिर्हि साम संमितं तस्मादेकस्य बह्व्यो जाया भवंति नैक
स्यै बहवः सहपतयो यद्वै तत्सा चामश्च समभवतां तत्सामाभवत्तत्
साम्नः सामत्वं सामन्भवति यऽएवं वेद यो वै भवति यः श्रेष्ठतामश्नुते
स सामन्भवत्यसामन्यऽइति हि निंदंति ते वै पंचान्यद्भूत्वा पंचान्यद्भूत्वा
कल्पेतामाहावश्च हिंकारश्च प्रस्तावश्च प्रथमा चऽर्गुद्गीथश्च म
ध्यमा च प्रतिहारश्चोत्तमा च निधनं च वषट्कारश्च ते यत्पंचान्य

ब्रा॰ तृ॰ ॥१७॥

द्रूखापंचान्यद्रूखांकल्पेतांतस्मादाहुःपांक्तोयज्ञःपांक्ताःपशवऽइति
यदुविराजंदशिनीमभिसमपद्येतांतस्मादाहुर्विराजयज्ञोदशिन्यां
प्रतिष्ठितऽइत्यात्मावैस्तोत्रियःप्रजानुरूपःपत्नीधाय्यापशवःप्रगा
थोगृहाःसूक्तंसवाऽअस्मिंश्चलोकेऽमुष्मिंश्चप्रजयाचपशुभिश्च
गृहेषुवसतियऽएवंवेद॥२३॥स्तोत्रियंशंसत्यात्मावैस्तोत्रियस्तं
मध्यमयावाचाशंसत्यात्मानमेवतत्संस्कुरुतेऽनुरूपंशंसतिप्रजावाऽ
अनुरूपःसऽउच्चैस्तरामिवानुरूपःशंस्तव्यःप्रजामेवतच्छ्रेयसीमा
त्मनःकुरुतेधाय्यांशंसतिपत्नीवैधाय्यासानीचैस्तरामिवधाय्या
शंस्तव्या प्रतिवादिनीहास्यगृहेषुपत्नीभवतियत्रैवंविद्वान्नी

रामू ॥१७॥

चैस्तरांधाय्यांशंसतिप्रगाथंशंसतिस्वरवत्यावाचाशंस्तव्यःपशवोवै
स्वरःपशवःप्रगाथःपशूनामवरुध्याऽइंद्रस्यनुवीर्याणिप्रवोचमिति
सूक्तंशंसतितद्वाऽएतत्प्रियमिंद्रस्यसूक्तंनिष्केवल्यंहैरण्यस्तूपमे
तेनवैसूक्तेनहिरण्यस्तूपऽआंगिरसऽइंद्रस्यप्रियंधामोपागच्छत्स
परमंलोकमजयदुपेंद्रस्यप्रियंधामगच्छतिजयतिपरमंलोकंयऽए
वंवेदगृहावैप्रतिष्ठासूक्तंतत्प्रतिष्ठिततमयावाचाशंस्तव्यंतस्माद्य
द्यपिदूरऽइवपशूँल्लभतेगृहानेवैनानाजिगमिषतिगृहाहिप
शूनांप्रतिष्ठाप्रतिष्ठा॥२४॥इतिद्वितीयोध्यायः॥सोमोवैराजामु
ष्मिंल्लोकऽआसीत्तंदेवाश्चऽऋषयश्चाभ्यध्यायन्कथमयमस्मा

त्सोमो राजा गच्छेदिति ते ब्रुवंश्छंदांसि यूयं नऽइमं सोमं राजानमाहरतेति
तथेति ते सुपर्णा भूत्वोदपतंस्ते यत्सुपर्णा भूत्वोदपतंस्तदेतत्सौपर्ण
मित्याख्यानविदऽआचक्षते छंदांसि वै तत्सोमं राजानमच्छाचरंस्ता
नि ह तर्हि चतुरक्षराणि चतुरक्षराण्येव छंदांस्यासन्त्सा जगती चतु
रक्षरा प्रथमोदपतत्सा पतित्वार्धमध्वनो गत्वाश्राम्यत्सा परास्य त्रीण्य
क्षराण्येकाक्षरा भूत्वा दीक्षां च तपश्च हरंती पुनरभ्यवापतत्तस्मात्त
स्य वित्ता दीक्षा वित्तं तपो यस्य पशवः संति जागता हि पशवो जगती हि
तानाहरदथ त्रिष्टुबुदपतत्सा पतित्वा भूयोऽर्धादध्वनो गत्वाश्राम्यत्सा
परास्यैकमक्षरं त्र्यक्षरा भूत्वा दक्षिणा हरंती पुनरभ्यवापतत्त

स्मान्मध्यंदिने दक्षिणा नीयंते त्रिष्टुभो लोके त्रिष्टुभि ताऽआहरत् ॥२५॥
ते देवाऽअब्रुवन् गायत्रीं त्वं नऽइमं सोमं राजानमाहरेति सा तथेत्य
ब्रवीत्तां वै मा सर्वेण स्वस्त्ययनेनानुमंत्रयध्वमिति तथेति सोद
पतत्तां देवाः सर्वेण स्वस्त्ययनेनान्वमंत्रयंत प्रेहि चेहि चेत्येतद्वै स
र्वं स्वस्त्ययनं यत्प्रेहि चेहि चेति तद्योऽस्याप्रियः स्यात्तमेतेनानुमं
त्रयेत प्रेहि चेहि चेति स्वस्त्येव गच्छति स्वस्ति पुनरागच्छति सा पति
त्वा सोमपालान् भीषयित्वा पद्भ्यां च मुखेन च सोमं राजानं सम
गृभ्णाद्यानि चेतरे छंदसीऽअक्षराण्यजहितां तानि चोपसम
गृभ्णात्तस्याऽअनुविसृज्य कृशानुः सोमपालः सव्यस्य पदो न

ब्रा॰ तः
१९ थ×

खमच्छिद्रंत छल्य कोऽभवत्तस्मात्सनखमिव यद्दृढमसम्बवत्सा वशाभवत्
तस्मात्सा हविरिवायः शल्यो यदनीकमासीत्स सर्पो निर्दश्य भवत्स
हस्तस्वजो यानि पर्णानि ते मंथावला यानि स्नावानि ते गंडूपदा यत्ते
जनं सो धाहि: सो सातथेषुरभवत् ॥ २६ ॥ सा य दक्षिणे न पदा समग
गभ्यात्तस्मात्तः सवनमभवत्तद्गायत्री स्वमायतनमकुरुत तस्मा
त्तत्समृध्यतमं मन्यंते सर्वेषां सवनानामग्निर्यो मुख्यो भवति श्रेष्ठतां
मश्नुते य एवं वेदाथ यत्सव्येन पदा समगग भ्यात्तन्माध्यंदिनं सव
नमभवत्तद्धि स्नं स ततं द्विस्त्रस्तं नान्वाप्नोत्पूर्वं सवनं ते देवाः प्राजि
ज्ञासंत तस्मिंस्त्रिष्टुभं छंद सामदधुरिंद्रं देवतानां तेन तत्समाव

राम
॥१२॥

द्वीर्यमभवत्पूर्वेण सवनेनोभाभ्यां सवनाभ्यां समावद्वीर्याभ्यां समाव
ज्जामीभ्यां राध्नोति य एवं वेदाथ यन्मुखेन समगगभ्यात्तत्तृतीय
सवनमभवत्तस्य पतं तीरसमधयत्तक्षीतरसं नान्वाप्नोत्पूर्वे स
वने ते देवाः प्राजिज्ञासंत तस्मिन्पशुषु पश्यंस्तद्यदाशिरमवनयंत्याज्ये
न पशुनाचरंति तेन तत्समावद्वीर्यमभवत्पूर्वाभ्यां सवनाभ्यां सर्वैः
सवनैः समावद्वीर्यैः समावज्जामिभी राध्नोति य एवं वेद ॥ २७ ॥ तेवा
इमे इतरे छंदसी गायत्रीमभ्यवदंतां वित्तं नावक्षराण्यनुपर्यागु
रिति नेत्यब्रवीद्गायत्रीयथावित्तमेवन इति ते देवेषु प्रश्नमैतां ते दे
वा अब्रुवन्यथावित्तमेव व इति तस्माद्धाप्येतर्हि वित्तं व्याकुर्यथा

श्री·तः
||२०||

विहृतमेवनइति ततो वाऽअष्टाक्षरा गायत्र्यभवत्र्यक्षरा त्रिष्टुबेका
क्षरा जगती साष्टाक्षरा गायत्री प्रातःसवनमुदयछन्नाशक्नोत्त्रिष्टु
प्त्र्यक्षरा माध्यंदिनं सवनमुद्यंतुं तां गायत्र्यब्रवीदायान्यपि मेत्रा
स्त्विति सा तथेत्यब्रवीत्त्रिष्टुप् तां वै मे तैरष्टाभिरक्षरैरुपसंधेहीति
तथेति तामुपसमदधात्देतद्धैतद्गायत्र्यै मध्यंदिने यन्मरुत्वतीयस्यो
त्तरे प्रतिपदो यश्चानुचरः सैकादशाक्षरा भूत्वा माध्यंदिनं सवन
मुदयछन्नाशक्नोज्जगत्येकाक्षरा तृतीयसवनमुद्यंतुं तां गायत्र्य
ब्रवीदायान्यपि मेत्रास्त्विति सा तथेत्यब्रवीज्जगती तां वै मे तै
रेकादशभिरक्षरैरुपसंधेहीति तथेति तामुपसमदधात्देतद्धै

राम
||२०||

तद्गायत्र्यै तृतीयसवने यद्वैश्वदेवस्योत्तरे प्रतिपदो यश्चानुचरः सा द्वा
दशाक्षरा भूत्वा तृतीयसवनमुदयछत्ततो वाऽअष्टाक्षरा गायत्र्यभव
देकादशाक्षरा त्रिष्टुप् द्वादशाक्षरा जगती सर्वैश्छंदोभिः समावद्वीर्यैः
समावज्जामिभी राध्नोति यऽएवं वेदैकं वै सत्त्रेधाभवत्तस्मादाहुर्दा
तव्यमेवंविदुषऽइत्येकं हि सत्त्रेधाभवत् ॥२८॥ ते देवाऽअब्रुवन्ना
दित्यान्युष्माभिरिदं सवनमुद्यछामेति तथेति तस्मादादित्यारंभणं
तृतीयसवनमादित्यग्रहः पुरस्तात्तस्य यजत्यादित्यासोऽअदिति
र्मादयंतामिति मद्वत्या रूपसमृद्धया मद्वद्वै तृतीयसवनस्य रूपं ना
नुवषट्करोति न भक्षयति संस्था वाऽएषा यदनुवषट्कारः संस्था

ऐ॰ तृ॰
॥२१॥

भक्षः प्राणाऽआदित्या नेतं प्राणान्त्संस्थापयानीति तऽआदित्याऽअब्रुवन्त्सवि
तारं त्वयेदं सह सवनमुपयच्छामेति तथेति तस्मात्सावित्री प्रतिपद्भवति वैश्वदे
वस्य सावित्र ग्रहः पुरस्तात्तस्य यजति दमूना देवः सविता वरेण्यऽइति मद्वत्या
रूपसमृद्धया मद्वद्वै तृतीयसवनस्य रूपं नानुवषट्करोति न भक्षयति सं
स्था वाऽएषा यदनुवषट्कारः संस्था भक्षः प्राणः सवितानेत्प्राणं संस्था
पयानीत्युभे वाऽएषऽएते सवने विपिबति यत्सविता प्रातःसवनं च तृती
यसवनं च तद्यत्सविबवत्सावित्र्यै निविदः पदं पुरस्ताद्भवति मद्वदुपरिष्टादु
भयोरेवैनं तत्सवनयोराभजति प्रातःसवने च तृतीयसवने च बह्व्याः
प्रातर्वायव्याः शस्यंतऽएकां तृतीयसवने तस्मादूर्ध्वाः पुरुषस्य भूयांसः
प्राणा यच्चावाञ्चो द्यावापृथिवीयं शंसति द्यावापृथिवी वै प्रतिष्ठेऽइयं

राम
॥२१॥

×नग्निर्वसुभिः प्रातःसवनादनुदत तेभ्यो माध्यंदिने सवने वाचिकल्पयिषंस्ता ×३
मेवेह प्रतिष्ठासावमुत्र तद्यद्द्यावापृथिवीयं शंसति प्रतिष्ठयोरेवैनं तत्प्रति
ष्ठापयति ॥२९॥ आर्भवं शंसत्यृभवो वै देवेषु तपसा सोमपीथमभ्यज
यंस्तेभ्यः प्रातःसवने वाचिकल्पयिषंस्तानिंद्रो रुद्रैर्माध्यंदिनात्सवना
दनुदत तेभ्यस्तृतीयसवने वाचिकल्पयिषंस्तान्विश्वेदेवाऽअनोनु
द्यंत नेह पास्यंति नेहेति स प्रजापतिरब्रवीत्सवितारं तान्वै त्वमुभयतः प
रिपिबेति तान्प्रजापतिरुभयतः पर्यपिबत्तेऽएते धाय्येऽअनिरुक्ते
प्राजापत्ये शस्येतेऽअभितऽआर्भवं सुरूपकृत्नुमूतये यं वेनश्चोदय
त्पृश्निगर्भाऽइति प्रजापतिरेवैनांस्तदुभयतः परिपिबति तस्मादु श्रेष्ठी
पात्रे रोचयत्येव यं कामयते तं तेभ्यो वै देवाऽअपैवाबीभत्संत मनु
×रंतव वाऽइमं ते वासास्त्वमेवैभिः संपिबस्वेति स तथेत्यब्रवीत्सविता ×५

श्री·तृ·
॥२२॥

ष्वगं धाय्ये ऽएते धाय्ये ऽअंतर्दधतये भ्यो मातैवा पितेत्र ऽइति ॥ ३० ॥ वैश्वदेवं
शंसति यथा वै प्रजा ऽएवं वैश्वदेवं तद्यथांतरं जनता ऽएवं सूक्तानि यथा
रण्यान्येवं धाय्यास्तदुभयतो धाय्यां पर्याह्वयते तस्मात्तान्यरण्यानि
संत्यनरण्यानि मृगैश्च वयोभिश्चेति ह स्माह यथा वै पुरुष ऽएवं वैश्व
देवं तस्य यथांतरमंगान्येवं सूक्तानि यथा पर्वाण्येवं धाय्यास्तदु
भयतो धाय्यां पर्याह्वयते तस्मात्पुरुषस्य पर्वाणि शिथिराणि संति दृ
ढानि ब्रह्मणा हि तानि धृतानि मूलं वा ऽएतद्यज्ञस्य यद्धाय्याश्च या
ज्याश्च तद्यदन्या ऽअन्या धाय्याश्च याज्याश्च कुर्युरुन्मूलमेव तद्यज्ञं कु
र्युस्तस्मात्ताः समान्य ऽएव स्युः पांचजन्यं वा ऽएतदुक्थं यद्वैश्वदेवं सर्वे
षां वा ऽएतत्पंचजनानामुक्थं देवमनुष्याणां गंधर्वाप्सरसां सर्पाणां च

राम
॥२२॥

पितॄणां चैतेषां वा ऽएतत्पंचजनानामुक्थं सर्व ऽएनं पंचजना विदुरैनं पंचि
न्यै जनताया ऐहविनो गच्छंति य ऽएवं वेद सर्वदेवत्यो वा ऽएष होता यो वैश्व
देवं शंसति सर्वा दिशो ध्यायेछंसिष्यन्त्सर्वास्वेव तद्दिक्षु रसं दधाति यस्या
मस्य दिशि द्वेष्यः स्यान्न तां ध्यायेदनुहायैवास्य तद्वीर्यमाद्दत्ते दिति
र्द्यौरदितिरंतरिक्षमित्युत्तमया परिदधातीयं वा ऽअदितिरियं द्यौरि
यमंतरिक्षमदितिर्माता स पिता स पुत्र ऽइतीयं वै मातेयं पितेयं पुत्रो
विश्वे देवा ऽअदितिः पंच जना ऽइत्यस्यां वै विश्वे देवा ऽअस्यां पंचज
ना ऽअदितिर्जातमदितिर्जनित्वमितीयं वै जातमियं जनित्वं द्विः प
च्छः परिदधाति चतुष्पादा वै पशवः पशूनामवरुद्ध्यै सकृदर्धर्चशः

श्रा॰ तृ॰
॥२३॥

प्रतिष्ठाया ऽएवैद्धि प्रतिष्ठो वै पुरुषश्चतुष्पादः पशवो यजमानमेव तद्द्वि
प्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति स देवपंचजनीयया परिदध्या
त्तदुपस्पृशन्भूमिं परिदध्यात्तद्यस्यामेवैतत्संभरति तस्यामेवै
नं तदंततः प्रतिष्ठापयति विश्वे देवाः शृणुतेमं हवं म ऽइति वैश्वदेव
मुक्थं शस्त्वा वैश्वदेव्या यजति यथाभागं तद्देवताः प्रीणाति ॥ ३१ ॥
आग्नेयी प्रथमा घृतयाज्या सौमी सौम्ययाज्या वैष्णवी घृतयाज्या त्वं
सोम पितृभिः संविदान ऽइति सौम्यस्य पितृमत्या यजति घ्नंति वा
ऽएतत्सोमं यदभिषुण्वंति तस्यैतामनुस्तरणीं कुर्वंति यत्सौम्यः
पितृभ्यो वा ऽअनुस्तरणी तस्मात्सौम्यस्य पितृमत्या यजत्यवधिषु

राम
॥२३॥

बौ ऽएतत्सोमं यदभ्यसुषवुस्तदेनं पुनः संभावयंति पुनराप्याययंत्युपस
दां रूपेणोपसदां किं रूपं वै तद्रूपं यद्देता देवता ऽअग्निः सोमो विष्णुरिति
प्रतिगृह्य सौम्यं होता पूर्वश्छंदोगेभ्यो वेक्षेत तं है के पूर्वं छंदोगेभ्यो हरं
ति न तथा न कुर्याद्वषट्कर्ता प्रथमः सर्वभक्षान्भक्षयतीति ह स्मा है
तेनैव रूपेण तस्माद्वषट्कर्तैव पूर्वो वेक्षेताथैनं छंदोगेभ्यो हरंति ॥
॥ ३२ ॥ प्रजापतिर्वै स्वां दुहितरमभ्यध्यायद्दिवमित्यन्य ऽआहुरुष
समित्यन्ये तामृश्यो भूत्वा रोहितं भूतामभ्यैत्तं देवा ऽअपश्यन्नकृतं
वै प्रजापतिः करोतीति ते तमैछन्य ऽएनमारिष्यत्येतमन्योन्यस्मिन्ना
विंदंस्तेषां या ऽएव घोरतमास्तन्व ऽआसंस्ता ऽएकधा समभरंस्ताः

संभृताऽएषदेवोभवत्तदस्यैतद्भूतवन्नामभवतिवैसयोस्यैतदेवंनामवे
दतंदेवाऽअब्रुवन्नयंवैप्रजापतिरकृतमकरिमंविध्येतिसतथेत्य
ब्रवीत्सवैवोवरंवृणाऽइतिवृणीष्वेतिसऽएतमेववरमवृणीतप
शूनामाधिपत्यंतदस्यैतत्पशुमन्नामपशुमान्भवतियोस्यैतदेवंनाम
वेदतमभ्यायत्याविध्यत्सविद्धऽऊर्ध्वऽउदप्रपततमेतंमृगऽइत्याचक्षतेयऽ
उऽएवमृगव्याधःसऽउऽएवसयारोहित्सारोहिणीयोऽएवेषुस्त्रिकांडासो
ऽएवेषुस्त्रिकांडातद्वाऽइदंप्रजापतेरेतःसिक्तमधावत्तत्सरोभवत्ते
व देवाऽअब्रुन्मेदंप्रजापतेरेतोदुषदितितन्मादुषमभवत्तन्मादुषस्यमा राम
दुषत्वंमादुषंहवैनामैतद्यन्मानुषंतन्मादुषंसन्मानुषमित्याचक्षतेपरो ॥२४॥
×यदब्रुवन्मेदंप्रजापतेरेतोदुषदिति×२

क्षेणपरोक्षप्रियाऽइवहिदेवाः॥३३॥तदग्निनापर्यादधुस्तन्मरुतोधू
न्वंस्तदग्निर्नप्राच्यावयत्तदग्निनावैश्वानरेणपर्यादधुस्तन्मरुतोधून्वं
स्तदग्निर्वैश्वानरःप्राच्यावयत्तस्ययद्रेतसःप्रथममुददीप्यततद
सावादित्योभवद्यद्द्वितीयमासीत्तद्भृगुरभवत्तंवरुणोन्यगृह्णीतत
स्मात्सभृगुर्वारुणिरथयत्तृतीयमदीदेदिवतऽआदित्याऽअभवन्
येंगाराऽआसंस्तेंगिरसोभवन्यदंगाराःपुनरवशांताऽउददीप्यंत
तद्बृहस्पतिरभवद्यानिपरिक्षाणान्यासंस्तेकृष्णाःपशवोभवन्या
लोहिनीमृत्तिकातेरोहिताऽअथयद्भस्मासीत्तत्परुष्यंव्यसर्पद्गौ
रोगवयऽऋष्यउष्ट्रोगर्दभऽइतियेचैतेरुणाःपशवस्तेचतान्वाऽएष

ऐ॰ ब्रा॰ त॰
॥२५॥

देवोऽभ्यवदत्तं मम वाऽइदं मम वै वास्तुहमिति तिन मेतयर्चानिरवादयंत यैषा रौ
द्री शस्यतेऽआ ते पितर्मरुतां सुम्नमेतु मा नः सूर्यस्य संदृशो युयोथाः॥ त्वं
नो वीरोऽअर्वति क्षमेथाऽइति ब्रूयान्नाभिनऽइत्यनभिमानुको हैष देवः
प्रजा भवति प्रजायेमहि रुद्रिय प्रजाभिरिति ब्रूयान्न रुद्रेत्येतस्यैव नाम्नः
परिहृत्यै तदु खलु शं नः करतीत्येव शंसेच्छमिति प्रतिपद्यते सर्वस्मा
ऽएव शांत्यै नृभ्यो नारिभ्यो गवेऽइति पुमांसो वै नरास्त्रियो नार्यः सर्वस्मा
ऽएव शांत्यै सानिरुक्ता रौद्री शांता सर्वायुः सर्वायुतायै सर्वमायुरेति यऽए
वं वेद सा गायत्री ब्रह्म वै गायत्री ब्रह्मणैवैनं तं नमस्यति॥ ३४॥ वैश्वा
नरीयेणाग्निमारुतं प्रतिपद्यते वैश्वानरो वाऽएतद्रेतः सिक्तं प्राच्याव
यत्तस्माद्वैश्वानरीयेणाग्निमारुतं प्रतिपद्यते न वा नं प्रथमऽऋचं शं

राम
॥२५॥

स्तव्योग्नीन्वाऽएषोऽर्च्छ्य शांतान्प्रसीदं नेति यऽआग्निमारुतं शंसति प्राणे
नैव तदग्नींस्तरत्यधीयन्नुपहन्यादन्यं विवक्तारमिच्छेत्तमेव तत्सेतुं कृत्वा
तरति तस्मादाग्निमारुते न प्रच्छ्यमेषव्यो विवक्ता मारुतं शंसति मरुतो ह वाऽ
एतद्रेतः सिक्तं धून्वंतः प्राच्यावयंस्तस्मान्मारुतं शंसति यज्ञायज्ञा वोऽअग्न
येदिवो वो द्रविणोदाऽइति मध्ये योनिं चानुरूपं च शंसति तद्यन्मध्ये योनिं चा
नुरूपं च शंसति तस्मान्मध्ये योनिर्धृता यदु द्वे सूक्ते शस्त्वा शंसति प्रतिष्ठयो
रेव तदुपरिष्टात्प्रजननं दधाति प्रजात्यै प्रजायते प्रजया पशुभिर्यऽएवं वेद॥
॥३५॥ जातवेदस्यं शंसति प्रजापतिः प्रजाऽअसृजत ताः सृष्टाः पराच्यऽ
एवायंन व्यावर्तंत ताऽअग्निना पर्यगच्छत्ताऽअग्निमुपावर्तंत तमेवाद्याप्युपा
वृत्ताः सोऽब्रवीज्जाता वै प्रजाऽअनेनाविदमिति यदब्रवीज्जाता वै प्रजाऽअनेना

विदमिति तस्माज्जातवेदस्यमभवत्तज्जातवेदसो जातवेदस्त्वं ताऽअग्निना
परिगता निरुद्धाः शोचन्त्यो दीध्यत्योऽतिष्ठंस्ताऽअङ्गिरभ्यषिंचंस्तस्मादुप
रिष्टाज्जातवेदस्यस्यापोहिष्ठीयं शंसति तस्मात्तच्छमयतेव शंसेत्तं
ताऽअङ्गिरभि बिच्यनिजास्यैवामन्यत ताऽसु वाऽअहिनाबुध्न्येन परोक्षा
त्तेजोऽदधादेष हवाऽअहिर्बुध्न्यो यदग्निर्गार्हपत्योऽग्निनैवासुतद्गार्ह
पत्येन परोक्षात्तेजो दधाति तस्मादाहुर्जुह्वद्देवाञ्जुह्वतो वसीयानिति॥
॥३६॥ देवानां पत्नीः शंसत्यनूचीरग्निं गृहपतिं तस्मादनूची पत्नी
गार्हपत्यमास्ते तदाहू राकां पूर्वां शंसेज्जाम्यै वै पूर्वपेयमिति तत्तन्नाद
त्यं देवानामेव पत्नीः पूर्वाः शंसेदेष हवाऽएतत्पत्नीषु रेतो दधाति य

दग्निर्गार्हपत्योऽग्निनैवासु तद्गार्हपत्येन पत्नीषु प्रत्यक्षाद्रेतो दधाति
प्रजात्यै प्रजायते प्रजया पशुभिर्यऽएवं वेद तस्मात्समानोदर्याः स्व
सान्योदर्यायै जायायाऽअनुजीविनी जीवति राकां शंसति राका हवा
ऽएतां पुरुषस्य सेवनीं सीव्यति यैषा शिश्नेऽधि पुमांसोऽस्य पुत्रा जा
यन्ते यऽएवं वेद पावीरवीं शंसति वाग्वै सरस्वती पावीरवी वाच्येव
तद्वाचं दधाति तदाहुर्यामीं पूर्वां शंसे३त्॥ पित्र्यां३ इति॥ यामी
मेव पूर्वां शंसेदिमं यम प्रस्तरमा हि सीदेति राज्ञो वै पूर्वपेयं तस्मा
द्यामीमेव पूर्वां शंसेन्मातली कव्यैर्यमोऽअंगिरोभिरिति काव्या
नामनूचीं शंसत्यवरेणैव वै देवान्काव्याः परेणैव पितॄंस्तस्मात्

पित्र्याः शंस × १

काव्यानामनूचीः शंसत्युदीरतामवरऽउत्परासऽ इत्युन्मध्यमाः पितरः सोम्या
सऽइति ये चैवावमा ये च परमा ये च मध्यमास्तान्त्सर्वाननंतरायं प्रीणा
त्याहं पितॄन्त्सुविदत्रां ऽअवित्सीति द्वितीयां शंसति बर्हिषदो ये स्वधया
सुतस्येत्येतस्य वाऽएषां प्रियं धाम यद्बर्हिषदऽइति प्रियेणैवैनांस्तद्धा
म्ना समर्धयति प्रियेण धाम्ना समृध्यते यऽएवं वेदेदं पितृभ्यो नमो
ऽअस्त्वद्येति नमस्कारवतीमंततः शंसति तस्मादंततः पितृभ्यो नम
स्क्रियते तदाहुर्व्याहावं पित्र्याः शंसे३त् ॥ अव्याहावाँ३ इति ॥ व्या
हावमेव शंसेदसंस्थितं वाऽएष पितृयज्ञं संस्थापयति योऽव्याहावं शं
सति तस्माद्व्याहावमेव शंस्तव्यं ॥ ३७ ॥ स्वादुष्किलायं मधुमाँऽउता
यमितीन्द्रस्यैन्द्रीरनुपानीयाः शंसत्येताभिर्वाऽइन्द्रस्तृतीयसवने

वै पितृयज्ञस्य साध्वसंस्थितं × ३

मन्वपिबत्तदनुपानीयानामनुपानीयात्वं माद्यंतीव वै तर्हि देवता यदेता हो
ता शंसति तस्मादेता सुमद्वतिर्गीर्यै ययोरोजसा स्कभिता रजांसीति
वैष्णुवारुणीमृचं शंसति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं त
योरुभयोरेव शांत्यै विष्णोर्नुकं वीर्याणि प्रवोचमिति वैष्णवीं शंसति
यथा वै मत्यमेवं यज्ञस्य विष्णुस्तद्यथा दुष्कृष्टं दुर्मतीकृतं सुकृष्टं सुम
तीकृतं कुर्वन्नियादेवमेवैतद्यज्ञस्य दुष्टुतं दुःशस्तं सुष्टुतं सुशस्तं कु
र्वन्नेति यदेतां होता शंसति तंतुन्तन्वन्त्रजसो भानुमन्विहीति प्राजा
पत्यां शंसति प्रजा वै तंतुः प्रजामेवास्माऽएतत्संतनोति ज्योतिष्मतः
पथो रक्ष धिया कृतानिति देवयाना वै ज्योतिष्मंतः पंथानस्तानेवास्मा

श्रौ॰ तृ॰ ऽएतद्धि तनोत्यनुल्बणं वयत जोगुवामपो मनुर्भव जनया दैव्यं जनमित्येवैनं तन्मनोः
॥२०॥ प्रजया संतनोति प्रजात्यै प्रजायते प्रजया पशुभिर्यऽएवं वेदेवानःइंद्रो मघवावि
रप्शीत्युत्तमया परिदधाति यं वाऽइंद्रो मघवा विरप्शी करत्सत्या चर्षणीधृ
दनर्वेती यं वै सत्याचर्षणीधृदनर्वा ॥ त्वं राजा जनुषां धेह्यस्मेऽइतीयं वै राजा
जनुषामधिश्रवो माहिनं यज्जरित्रऽइती यं वै माहिनं यज्ञश्रवो यजमानो ज
रिता यजमानायैवैतामाशिषमाशास्ते तदुपस्पृशन् भूमिं परिदध्यात्तद्यस्या
मेव यज्ञं संभरति तस्यामेवैनं तदंततः प्रतिष्ठापयत्यग्ने मरुद्भिः शुभयद्भि
र्ऋक्वभिरित्याग्निमारुतमुक्थ्यं शस्त्वाग्निमारुत्या यजति यथाभागं तद्देव
ताः प्रीणाति प्रीणाति ॥ ५० ॥ इति तृतीयोध्यायः ॥ ॥ देवा वाऽअसु राम्
रैर्युद्धमुपप्रायन्विजयाय तानग्निर्नान्वकामयतैतुं तं देवाऽअब्रुवन्नपि ॥२०॥

त्वमेत्यस्माकं वै त्वमेकोसीति स नास्तुतोन्वेष्यामीत्यब्रवीत्स्तुत नु मेतित
थेति तं ते समुत्क्रम्योपनिवृत्यास्तुवंस्तान्स्तुतोनुप्रैत्स त्रिःश्रेणिर्भूत्वा त्र्य
नीकोसुरान्युद्धमुपप्रायद्विजयाय त्रिःश्रेणिरिति छंदांस्यकुरु
त त्र्यनीकऽइति सवनान्येवानीकानि तानसंभाव्यं पराभावयत्ततो वै देवाऽ
अभवन्परासुराभवत्यात्मना परास्य द्विषन्पाप्मा भ्रातृव्यो भवति यऽएवं
वेद सा वाऽएषा गायत्र्येव यदग्निष्टोमश्चतुर्विंशत्यक्षरा वै गायत्री चतुर्विंश
तिरग्निष्टोमस्य स्तुतशस्त्राणि तद्वै यदिदमाहुः सुधायां ह वै वाजी सुहितो
दधातीति गायत्री वै तन्न ह वै गायत्री क्षमा रमतऽऊर्ध्वा ह वाऽएषा यजमा
नमादाय स्वरेत्यग्निष्टोमो वै तन्न ह वाऽअग्निष्टोमः क्षमा रमतऽऊर्ध्वो

ब्रा० तृ०
॥२९॥

हवाऽएष यजमानमादाय स्वरेति स वाऽएष संवत्सरऽएव यदग्निष्टोमश्चतु
र्विंशस्यर्धमासो वै संवत्सरश्चतुर्विंशतिरग्निष्टोमस्य स्तुतशस्त्राणि
तं यथा समुद्रं स्रोत्याऽएवं सर्वे यज्ञक्रतवोपियंति ॥ ३९ ॥ दीक्षणीये
ष्टिस्तायते तामेवानु याः काश्चेष्टयस्ताः सर्वाऽअग्निष्टोममपियंति इळामु
पह्वयत इळाविधा वै पाकयज्ञाऽइळामेवानु ये के च पाकयज्ञास्ते सर्वेग्नि
ष्टोममपियंति सायंप्रातरग्निहोत्रं जुह्वति सायंप्रातर्व्रतं प्रयच्छंति स्वा
हाकारेणाग्निहोत्रं जुह्वति स्वाहाकारेण व्रतं प्रयच्छंति स्वाहाकारमेवा
न्वग्निहोत्रमग्निष्टोममप्येति पंचदश प्रायणीये सामिधेनीरन्वाह पं
चदश दर्शपूर्णमासयोः प्रायणीयमेवानु दर्शपूर्णमासावग्निष्टोमम

राम्
॥२९॥

पीतः सोमं राजानं क्रीणंत्यौषधो वै सोमो राजौषधिभिस्तं भिषज्यंति यं
भिषज्यंति सोममेव राजानं क्रीयमाणमनु यानि कानि च भेषजानि ता
नि सर्वाण्यग्निष्टोममपियंत्यग्निमातिथ्ये मंथंत्याग्निं चातुर्मास्येष्वा
तिथ्यमेवानु चातुर्मास्यान्यग्निष्टोममपियंति पयसा प्रवर्ग्ये चरंति प
यसा दाक्षायणयज्ञे प्रवर्ग्यमेवानु दाक्षायणयज्ञोग्निष्टोममप्येति पशु
रूपवसथे भवति तमेवानु ये के च पशुबंधास्ते सर्वेग्निष्टोममपियं
ती ळादधो नाम यज्ञक्रतुस्तं दध्ना चरंति दध्ना दधिघर्मे दधिघर्ममेवा
न्विळादधोग्निष्टोममप्येति ॥ ४० ॥ इति नु पुरस्तादथोपरिष्टात्संच
दशोक्थ्यस्य स्तोत्राणि पंचदश शस्त्राणि समासो मासधा संवत्सरो

श्रा·त्रं·
॥३०॥

विहितः संवत्सरोग्निर्वैश्वानरोग्निरग्निष्टोमः संवत्सरमेवानूक्थ्योग्नि
ष्टोममप्येत्युक्थ्यमपियंतमनुवाजपेयोप्येत्युक्थ्यो हि स भवति
द्वादशरात्रैः पर्यायाः सर्वे पंचदशास्ते द्वौद्वौ संपद्य त्रिंशदेकविंश
षोकशिसामत्रिवृत्संधिः सात्रिंशत्समास्त्रिंशन्मासस्य रात्रयो
मासधा संवत्सरो विहितः संवत्सरोग्निर्वैश्वानरोग्निरग्निष्टोमः सं
वत्सरमेवान्वतिरात्रोग्निष्टोममप्येत्यतिरात्रमपियंतमन्वप्तोर्या
मोप्येत्यत्यतिरात्रो हि स भवत्यथ तद्द्वये च पुरस्ताद्ये चोपरिष्टाद्यज्ञक्र
तवस्ते सर्वेग्निष्टोममपियंति तस्य संस्तुतस्य नवतिशतं स्तोत्रियाः
सायानवतिस्ते दश त्रिवृतोऽथ यानवतिस्ते दशाथ या दश ता सामेका

राम
॥३०॥

स्तोत्रियोदेति त्रिवृत्स्य रिशिष्यते सोसायेकविंशोध्याहितस्तत्पतिर्विषुवा
न्वाऽएष स्तोमानां दश वाऽएतस्मादर्वांचस्त्रिवृतो दश परांचो मध्यऽए
षऽएकविंशऽउभयतोध्याहितस्तत्पतितया सोस्तोत्रियोदेति से तस्मि
न्न ध्यूढ्वा स यजमानस्तद्दैवं क्षत्रं सहो बलमश्नुते ह वै दैवं क्षत्रं स
हो बलमेतस्य ह सायुज्यं सरूपतां सलोकतामश्नुते यऽएवं वेद ॥ ४३ ॥
देवा वाऽअसुरैर्विजिग्यानाऽऊर्ध्वाः स्वर्गं लोकमायन्त्सोग्निर्दिविस्पृ
गूर्ध्वऽउदस्थयत सः स्वर्गस्य लोकस्य द्वारमवृणोदग्निर्वै स्वर्गस्य
लोकस्याधिपतिस्तं वसवः प्रथमाऽआगच्छंस्तऽएनमब्रुवन्नति
नोर्जस्याकाशं नः कुर्विति स नास्तुतोतिस्रक्ष्यऽइत्यब्रवीत्स्तुत नु मे

ब्रा·त·
॥२१॥

त्रि तथेति तं तेत्रिवृता स्तोमेनास्तुवंस्तान्स्तुतोत्यार्जत ते यथालोकमगच्छं
स्तरुद्राऽआगच्छंस्तऽएतमब्रुवन्नति नोर्जस्याकाशान्नः कुर्विति स नास्तु
तोति स्त्रक्ष्यऽइत्यब्रवीत्स्तुत नु मेति तथेति तं ते पंचदशेन स्तोमेनास्तु
वंस्तान्स्तुतोत्यार्जत ते यथालोकमगच्छंस्तमादित्याऽआगच्छंस्तऽएन
मब्रुवन्नति नोर्जस्याकाशान्नः कुर्विति स नास्तुतोति स्त्रक्ष्यऽइत्य
ब्रवीत्स्तुत नु मेति तथेति तं ते सप्तदशेन स्तोमेनास्तुवंस्तान्स्तु
तोत्यार्जत ते यथालोकमगच्छंस्तं विश्वे देवाऽआगच्छंस्तऽएनमब्रु
वन्नति नोर्जस्याकाशान्नः कुर्विति स नास्तुतोति स्त्रक्ष्यऽइत्यब्रवी
त्स्तुत नु मेति तथेति तं तऽएकविंशेन स्तोमेनास्तुवंस्तान्स्तुतोत्यार्ज

राम
॥२१॥

तते यथालोकमगच्छन्नेकेकेन वै तं देवा स्तोमेनास्तुवंस्तान्स्तुतोत्या
र्जत ते यथालोकमगच्छन्नथ हैनमेषऽएतैः सर्वैः स्तोमैः स्तौति यो य
जते यश्चैनमेवं वेदातीतुतमर्जीतोऽअति ह वाऽएनमर्जते स्वर्गं लोक
मभियऽएवं वेद॥४२॥ स वाऽएषोग्निरेव यदग्निष्टोमस्तं यदस्तुवंस्त
स्मादग्निस्तोमस्तमग्निस्तोमं संतमग्निष्टोमऽइत्याचक्षते परोक्षे
णपरोक्षप्रियाऽइव हि देवास्तं यच्चतुष्टया देवाश्चतुर्भिः स्तोमैरस्तु
वंस्तस्माच्चतुस्तोमस्तं चतुस्तोमं संतं चतुष्टोमऽइत्याचक्षते परोक्षे
णपरोक्षप्रियाऽइव हि देवाऽअथ यदेनमूर्ध्वं संतं ज्योतिर्भूतमस्तुवं
स्तस्माज्ज्योतिस्तोमस्तं ज्योतिस्तोमं संतं ज्योतिष्टोमऽइत्याचक्षते परो

ब्रा॰ तृ॰
॥३३॥

क्षेणपरोक्षप्रिया ऽइव हि देवाः स वा ऽएषो ऽपूर्वो ऽनपरो यज्ञक्रतुर्यथार
थचक्रमनंतमेवं यदग्निष्टोमस्तस्य यथैव प्रायणं तथोदयनं तदेषाभि ×न
यज्ञगाथा गीयते ॥ यदस्य पूर्वमपरं तदस्य यद्वस्यापरं तद्वस्य पूर्वं ॥
अहेरिव सर्पणं शाकलस्य न विजानंति यतरत्परस्तादिति यथा ह्येवा
स्य प्रायणमेवमुदयनमसदिति तदाहुर्यत्त्रिवृत्प्रायणमेकविंशमुदय
नं केन ते समे ऽइति यो वा ऽएकविंशस्त्रिवृद्वै स यो यद्वुभौ तृचौ तृचिना
विति ब्रूयात्तेनेति ॥ ४३ ॥ यो वा ऽएष तपत्येषो ऽग्निष्टोमः ऽएष साह्न
स्तं सहैवाह्ना संस्थापयेयुः साह्नो वै नाम तेनासंत्वरमाणाश्चरेयुर्य
थैव प्रातःसवन ऽएवं माध्यंदिन ऽएवं तृतीयसवन ऽएवमु ह यज

राम
॥३३॥

मानो ऽप्रमायुको भवति यद्ध वा ऽइदं पूर्वयोः सवनयोरसंत्वरमाणाश्च
रंति तस्माद्धेदं प्राच्यो ग्रामता बहुला विष्टा ऽअथ यद्धेदं तृतीयसव
ने संत्वरमाणाश्चरंति तस्माद्धेदं प्रत्यंचि दीर्घारण्यानि भवंति तथा
ह यजमानः प्रमायुको भवति तेनासंत्वरमाणाश्चरेयुर्यथैव प्रातः
सवन ऽएवं माध्यंदिन ऽएवं तृतीयसवन ऽएवमु ह यजमानो ऽप्रमा
युको भवति स ऽएतमेव शस्त्रेणानुपर्यावर्तेत यदा वा ऽएष प्रा
तरुदेत्यथ मंद्रं तपति तस्मान्मंद्रया वाचा प्रातःसवने शंसेदथ यदाभ्ये ×य
त्यथ बलीयस्तपति तस्माद्बलीयस्या वाचा मध्यंदिने शंसेदथ यदाभि
तरामेत्यथ बलिष्ठतमं तपति तस्माद्बलिष्ठतमया वाचा तृतीय

ब्रा॰ तृ॰ ।।२३।।

सवने शंसेदेवं शंसेद्यदि वाच ऽ ईशीत वाग्घि शस्त्रं यया तु वाचोत्तरोत्तरिण्या
त्साहेन समापनाय तया प्रतिपद्येत तत्सु शस्तं तमभिवभवति स वा ऽ एष न क
दाचनास्तमेति नोदेति तं यदस्तमेतीति मन्यंतेऽह्न ऽ एव तदंतमित्वाथात्मानं
विपर्यस्यते रात्रीमेवावस्तात्कुरुतेऽहः परस्तादथ यदेनं प्रातरुदेतीति म
न्यंते रात्रेरेव तदंतमित्वाथात्मानं विपर्यस्यतेऽहरेवावस्तात्कुरुते रात्रीं प
रस्तात्स वा ऽ एष न कदाचन निम्रोचति न ह वै कदाचन निम्रोचत्येतस्य ह
सायुज्यं सरूपतां सलोकतामश्नुते य ऽ एवं वेद य ऽ एवं वेद ॥४४॥ इति
चतुर्थोऽध्यायः॥ यज्ञो वै देवेभ्योन्नाद्यमुदक्रामत्ते देवा ऽ अब्रुवन्यज्ञो
वै नोन्नाद्यमुदक्रमीदन्विमं यज्ञमन्नमन्विच्छामेति तेऽब्रुवन्कथमन्वि

राम ।।२३।।

छामेति ब्राह्मणेन च छंदोभिश्चेत्यब्रुवंस्ते ब्राह्मणं छंदोभिरदीक्षयंस्तस्यां
तं यज्ञमतन्वतापि पत्नीः समयाजयंस्तस्माद्याप्येतर्हि दीक्षणीयायामिष्टा
यांतमेव यज्ञं तन्वतेऽपि पत्नीः संयाजयंति तमनुन्यायमन्ववायंस्ते प्रायणी
यमतन्वत तं प्रायणीयेन नेदीयोन्वागछंस्ते कर्मभिः समत्वरंत तं शंय्वं
तमकुर्वंस्तस्माद्याप्येतर्हि प्रायणीयं शंय्वंतमेव भवति तमनुन्यायमन्व
वायंस्त ऽ आतिथ्यमतन्वत तमातिथ्येन नेदीयोन्वागछंस्ते कर्मभिः सम
त्वरंत तमिडांतमकुर्वंस्तस्माद्याप्येतर्ह्यातिथ्यमिडांतमेव भवति तम
नुन्यायमन्ववायंस्त ऽ उपसदोतन्वत तमुपसद्भिर्नेदीयोन्वागछंस्ते कर्म
भिः समत्वरंत ते तिस्रः सामिधेनीरनूच्य तिस्रो देवता ऽ अयजंस्तस्माद्याप्ये
तर्ह्युपसत्सु तिस्र ऽ एव सामिधेनीरनूच्य तिस्रो देवता यजंति तमनुन्याय

मन्ववायंस्तऽउपवसथमतन्वत तमुपवसथेऽहन्याप्नुवंस्तस्मात्स्वाहा तं यज्ञम
तन्वता पत्नीः समयाजयंस्तस्मात्स्वाप्येतर्ह्युपवसथऽ आलभेव यत्तं तन्व
ते पत्नीः संयाजयन्तीति तस्मादेतेषु पूर्वेषु कर्मसु शनैस्तरां शनैस्तरामिवा
नुब्रूयादनूत्सारमिव हि तेन मायंस्तस्मादुपवसथे यावत्या वाचा कामयी
त तावत्यानुब्रूयादाप्तो हि स तर्हि भवतीति तमाप्त्वाब्रुवंस्तिष्ठस्व नोऽन्ना
द्यायेति स नेत्यब्रवीत्कथं वस्तिष्ठेयेति तानीक्षतैव तमब्रुवन्ब्राह्मणेन तु
च नश्छंदोभिश्च सयुग्भूत्वान्नाद्यायतिष्ठस्वेति तथेति तस्माद्धाप्येतर्हि
यज्ञः सयुग्भूत्वा देवेभ्यो हव्यं वहति ब्राह्मणेन च च्छंदोभिश्च ॥ ४५ ॥
त्रीणि ह वै यज्ञे क्रियन्ते जग्धं गीर्णं वान्तं तद्धैतद्देवजग्धं यदाशंसमानमार्त्वि

ज्यं कारयतऽउत वा मे दद्यादुत वा मा वृणीतेति तद्धु तत्पराङेव यथा जग्धं

नहैव तद्यजमानं भुनक्त्यथ हैतद्देवगीर्णं यद्बिभ्यदार्त्विज्यं कारयतऽउत वा
मा न बाधेतोत वा मे न यज्ञवेशसं कुर्यादिति तद्धु तत्पराङेव यथा गीर्णं न
हैव तद्यजमानं भुनक्त्यथ हैतद्देववान्तं यदभिशस्यमानमार्त्विज्यं कारय
ते यथा ह वाऽइदं वान्तान्मनुष्या बीभत्सन्तऽएवं तस्माद्देवास्तद्धु तत्पराङेव
यथा वान्तं न हैव तद्यजमानं भुनक्ति सऽएतेषां त्रयाणामाशां नेयात्तं यद्येते
षां त्रयाणामेकं चिदकाममभ्याभवेत्तस्यास्ति वामदेव्यस्य स्तोत्रे प्रायश्चि
त्तिरिदं वाऽइदं वामदेव्यं यजमानलोको मृतलोकः स्वर्गो लोकस्तत्त्रिभिर
क्षरैर्न्यूनं तस्य स्तोत्रेऽउपसृप्य त्रेधात्मानं विगृह्णीयात्पुरुषऽइति सऽएते
षु लोकेष्वात्मानं दधात्यस्मिन्यजमानलोकेऽस्मिन्नमृतलोकेऽस्मिन्त्स्वर्गे लो
के स सर्वां दुरिष्टिमत्येत्यपि यद्दिसमृद्धाऽइव ऋत्विजस्युरिति ह स्माहाथैह

श्रा॰ त॰
॥३५॥

तज्जपेदेवेति॥४६॥ छंदांसि वै देवेभ्यो हव्यमूहुश्श्रांतानि जघनार्धे यज्ञस्य
तिष्ठंति यथाश्वो वाश्वतरो वोहिवांस्तिष्ठेदेवं तेभ्यऽएतं मैत्रावरुणं पशुपुरोळा
शमनु देविकाहवींषि निर्वपेद्धात्रे पुरोळाशं द्वादशकपालं यो धाता स वषट्
कारोनुमत्यै चरुं यानुमतिः सा गायत्री राकायै चरुं या राका सा त्रिष्टुप्सिनीवा
ल्यै चरुं या सिनीवाली सा जगती कुह्वै चरुं या कुहूः सानुष्टुबेतानि वाव सर्वाणि
छंदांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येतानि हि यज्ञे प्रतमामिव
क्रियंतऽएते ह वाऽअस्य छंदोभिर्यजतः सर्वैश्छंदोभिरिष्टं भवति यऽए
वं वेद तद्ध यदिदमाहुः सुधायां ह वै वाजी सुहितो दधातीति छंदांसि वै तत्सु
धायां ह वाऽएनं छंदांसि दधत्यननुध्यायिनं लोकं जयति यऽएवं वेद तदु हऽ

रामू
॥३५॥

आहुर्धातारमेव सर्वासां पुरस्तात्पुरस्तादाज्येन परियजेत्तदासु सर्वासु मिथुनं
दधातीति तदु वाऽआहुर्जामि वाऽएतद्यज्ञे क्रियते यत्र समानीभ्यामृग्भ्यां समाने ह
न्यजतीति यदि ह वाऽअपि बह्व्यऽइव जायाः पतिर्वाव तासां मिथुनं तद्यदासां धाता
रं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधातीति नु देविकानां॥४७॥ अथ देवी
नां सूर्याय पुरोळाशमेककपालं यः सूर्यः स धाता सऽउऽएव वषट्कारो दिवे चरुं
या द्यौः सानुमतिः सोऽएव गायत्र्युषसे चरुं योषाः सा राका सोऽएव त्रिष्टुब्गवे चरुं
या गौः सा सिनीवाली सोऽएव जगती पृथिव्यै चरुं या पृथिवी सा कुहूः सोऽएवा
नुष्टुबेतानि वाव सर्वाणि छंदांसि गायत्रं त्रैष्टुभं जागतमानुष्टुभमन्वन्यान्येता
नि हि यज्ञे प्रतमामिव क्रियंतऽएते ह वाऽअस्य छंदोभिर्यजतः सर्वैश्छंदोभि
रिष्टं भवति यऽएवं वेद तद्ध यदिदमाहुः सुधायां ह वै वाजी सुहितो दधातीति

श्री·तृ·
॥ ३५ ॥

छंदांसि वै तांत्सुधायां हवाऽ एनं छंदांसि दधत्यननुध्यायिनं लोकं जयति यऽ ए
वं वेद तद्धैकेऽ आहुः सूर्यमेव सर्वासांपुरस्तात्पुरस्ताद्दाऽ स्येन परियजेत्तदासु स
र्वासु मिथुनं दधातीति तदु वाऽ आहुर्जामि वाऽ एतद्यज्ञे क्रियते यत्र समानीभ्या
म् ऋग्भ्यां समाने हन्यजतीति यदिह वाऽ अपि बह्व्यऽ इव जायाः पतिर्वाव तासां
मिथुनं नयदासां सूर्यं पुरस्ताद्यजति तदासु सर्वासु मिथुनं दधाति ता वाऽ इ
मास्ताऽ अमूर्याऽ अमूस्ताऽ इमाऽ अन्यतराभिर्वाव तं काममाप्नोति यऽ एता
सूभयीषु ताउभयीर्गेतश्रियः प्रजातिकामस्य संनिर्वपेन्नेत्वेव विव्यमाण
स्य यदेनाऽ एविव्यमाणस्य संनिर्वपेदीश्वरो हास्य वित्तं देवाऽ अरंतोर्यद्वा
ऽ अयमात्मनेलमभूदिति ता ह शुचिवृक्षो गौपालायनो वृद्धद्युम्नस्याभिप्र
तारिणस्योभयीर्यज्ञे संनिरुवाप तस्य ह रथगृत्सं गाहमानं दृष्ट्वोवाचेत्थमह ।

राम
॥ ३५ ॥

मस्य राजन्यस्य देविकाश्च देवीश्चोभयीर्यज्ञे समभाद्दयं यदस्येत्थं रथगृत्सो गाहतऽ
इति चतुःषष्टिं कवचिनः शश्वद्धास्य ते पुत्र नप्तारऽ आसुः ॥ ४८ ॥ अग्निष्टोमं वै
देवाऽ अश्रयंतोक्थान्यसुरास्ते समावद्वीर्याऽ एवासन्न व्यावर्तंत तान्भरद्वाजऽ ऋ
षीणामपश्यदिमे वाऽ असुराऽ उक्थेषु श्रितास्तान्नेषान्न कश्चन पश्यतीति सोग्निमु
दह्वयदेह्यूषु ब्रवाणि तेऽग्नऽ इत्थेतरा गिरऽ इत्यसुर्या ह वाऽ इतरा गिरः सोग्निरुपो
त्तिष्ठन्नब्रवीत्किं स्विदेव मह्यं कृशो दीर्घः पलितो वक्ष्यतीति भरद्वाजो हवै कृ
शो दीर्घः पलितऽ आस सोब्रवीदिमे वाऽ असुराऽ उक्थेषु श्रितास्तान्वै न कश्चन
पश्यतीति तानग्निरश्वो भूत्वाभ्यत्यद्रवद्यदग्निरश्वो भूत्वाभ्यत्यद्रवत्तत्साकम
श्वं सामाभवत्तत्साकमश्वस्य साकमश्वत्वं तदाहुः साकमश्वेनोक्थानि प्रणयेद
प्रणीतानि वाव तान्युक्थानि यान्यन्यत्र साकमश्वादिति प्रमंहिष्ठीयेन प्रणयेदि

ब्रा· तृ·
॥ ९७ ॥

त्याहुः प्रमंहिष्ठीयेन वै देवाऽअसुरानभ्येभ्यः प्राणुदंत तस्मादेव प्रमंहिष्ठीयेन
नयेत्प्रसाकमश्वेन ॥ ४९ ॥ ते वाऽअसुरा मैत्रावरुणस्योक्थमभ्ययंत सोऽब्रवी
दिंद्रः कश्चाहं चेमानितोऽसुरान्नोत्स्यावहाऽइत्यहं चेत्यब्रवीद्वरुणस्तस्मादैंद्राव
रुणं मैत्रावरुणस्तृतीयसवने शंसतींद्रश्च हि तान्वरुणश्च ततो नुदेतां ते वै ततो
पहताऽअसुरा ब्राह्मणाच्छंसिनऽउक्थमभ्ययंत सोऽब्रवीदिंद्रः कश्चाहं चेमानि
तोऽसुरान्नोत्स्यावहाऽइत्यहं चेत्यब्रवीद्बृहस्पतिस्तस्मादैंद्राबार्हस्पत्यं ब्राह्म
णाच्छंसी तृतीयसवने शंसतींद्रश्च हि तान्बृहस्पतिश्च ततो नुदेतां ते वै ततो
पहताऽअसुराऽअच्छावाकस्योक्थमभ्ययंत सोऽब्रवीदिंद्रः कश्चाहं चेमानितो
ऽसुरान्नोत्स्यावहाऽइत्यहं चेत्यब्रवीद्विष्णुस्तस्मादैंद्रावैष्णवमच्छावाकस्तृती
यसवने शंसतींद्रश्च हि तान्विष्णुश्च ततो नुदेतां द्वंद्वमिंद्रेण देवताः शस्यंते

राम
॥ ९७ ॥

द्वंद्वं वै मिथुनं तस्माद्द्वंद्वान्मिथुनं प्रजायते प्रजात्यै प्रजायते प्रजया पशुभिर्यऽ
एवं वेदाथ हैते पोत्रीयाश्च नेष्ट्रीयाश्च चत्वारऽऋतुयाजाः षळृचः सा विराड्द
शिनी तद्विराजि यज्ञं दशिन्यां प्रतिष्ठापयंति प्रतिष्ठापयंति ॥ ५० ॥ ॥ इति
ब्राह्मण तृतीयपंचिका समाप्तः ॥ श्रीकृष्णार्पणमस्तु ॥ ॐ देवा वै प्रथमेनाह्ने ॥
शके १७९१ शुक्लनाम संवत्सरे कार्तिक कृष्ण ८ भृगुवासरे तद्दिने इदं पुस्तकं
समाप्तं ॥ बर्वे उपनामक महादेवेन लिखितं ॥ स्वार्थं परार्थं च ॥ छ ॥
तैलाद्रक्षेज्जलाद्रक्षेद्रक्षेच्छिथिलबंधनात् ॥ मूर्खहस्ते न दातव्यं एवं वदति पु
स्तकं ॥ १ ॥ अदृष्टदोषात्स्मृतिविभ्रमाद्वा यदर्थहीनं लिखितं मयात्र ॥
तन्मार्गयित्वा परिशोधनीयं कोपं न कुर्यात्खलु लेखको वा ॥ २ ॥ छ ॥

ब्रा· तृ·
॥३८॥

॥ इति ब्राह्मणात् तृतीयपंचिका समाप्तः ॥ श्री ॥

राम
॥३८॥

॥ अथ चतुर्थपंचिका प्रारंभः ॥

॥ श्री गणेशाय नमः प्रसन्न ॥

न ह्याहरं तस्माच्चतुर्थे ह ३

श्री० च०
॥२॥

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ हरिः ओं ॥ देवा वै प्रथ
मेनाह्नेंद्राय वज्रं समभरंस्तं द्वितीयेनाह्नासिंचंस्तं तृतीये
नाह्नाप्रायच्छंस्तं चतुर्थे हन् षोडशिनं शंसति वज्रो वा एतं न य
यत्षोडशीति यच्चतुर्थे हन् षोडशिनं शंसति वज्रमेव तत्प्र
हरति द्विषते भ्रातृव्याय वधं योस्य स्तृत्यः स्तस्मै स्तर्तवै व
ज्रो वै षोडशी पशव उक्थानि तं परस्तादुक्थानां पर्यस्य ॥२॥ राम
शंसति तं परस्तादुक्थानां पर्यस्य शंसति वज्रेणैव तत्षो

डशिना पशून्परिगच्छति तस्मात्पशवो वज्रेणैव षोड
शिना परिगता मनुष्यानभ्युपावर्तंते तस्मादश्वो वा पुरुषो
वा गौर्वा हस्ती वा परिगत एव स्वयमात्मनेतप व वाचाभिषिद्ध
उपावर्तते वज्रमेव षोडशिनं पश्यन्वज्रेणैव षोडशिना प
रिगतो वाग्घि वज्रो वाक्षोडशीति तदाहुः किं षोडशिनः षोड
शित्वमिति षोडशः स्तोत्राणां षोडशः शस्त्राणां षोडशभि
रक्षरैरादत्ते षोडशभिः प्रणौति षोडशपदां निविदं द

धातितस्य षोडशिनः षोडशित्वं द्वे वाऽअक्षरे अतिरिच्येते षोडशि
नोऽनुष्टुभमभिसंपन्नस्य वाचो वाव तौ स्तनौ सत्यानृते वाव ते
अवत्येनं सत्यं नैनमनृतं हिनस्ति य एवं वेद ॥१॥ गौरिवीतं षो
डशिसाम कुर्वीत तेजस्कामो ब्रह्मवर्चसकामः तेजो वै ब्रह्म
वर्चसं गौरिवीतं तेजस्वी ब्रह्मवर्चसी भवति य एवं विद्वान्गौरि
वीतं षोडशिसाम कुरुते नानदं षोडशिसाम कर्तव्यमित्याहुरि
न्द्रो वै वृत्राय वज्रमुदयच्छत्तमस्मै प्राहरत्तमभ्यहनत्सोऽभिह

तोऽव्यनदद्यद्व्यनदत्तन्नानदं सामाभवत्तन्नानदस्य नानदत्वम
भ्रातृव्यं वा एतद्भ्रातृव्यहा साम यन्नानदमभ्रातृव्यो भ्रातृव्यहा भ
वति य एवं विद्वान्नानदं षोडशिसाम कुरुते तद्यदि नानदं कुर्यु
र विहृतः षोडशी शंस्तव्यो विहृतास्विहितासु स्तुवते यदि गौरि
वीतं विहृतः षोडशी शंस्तव्यो विहृतास्विहितासु स्तुवते ॥२॥ अ
थातः छंदांस्येव व्यतिषजत्या त्वा वहंतु हरय इत्युपो षु शृणुही गि
र इति गायत्रीश्च पंक्तीश्च व्यतिषजति गायत्रो वै पुरुषः पाङ्क्ताः प

शा० च०
३॥

शावः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्रतिष्ठापयति यदु गायत्री
च पङ्क्तिश्च ते द्वे अनुष्टुभौ ते नो वाचो रूपादनुष्टुभो रूपादूर्जरूपान्नैति य
दिंद्रपत नाज्येयं ते अस्तु हर्यत इत्युष्णिह श्च बृहती च व्यतिषजत्योष्णिह
ह्यो वै पुरुषो बार्हताः पशवः पुरुषमेव तत्पशुभिर्व्यतिषजति पशुषु प्र
तिष्ठापयति यदु ष्णिक्ककुब्बृहती च ते द्वे अनुष्टुभौ ते नो वाचो रूपा
दनुष्टुभो रूपादूर्जरूपान्नैत्याथ पूर्वं से ब्रह्मन्वीरब्रह्म कृतिं जुषाण इ
ति द्विपदां च त्रिष्टुभं च व्यतिषजति द्विपाद्वै पुरुषो वीर्यं त्रिष्टुप्पुरुषमे

३॥ रामे

वतद्वीर्येण व्यतिषजति वीर्ये प्रतिष्ठापयति तस्मात्पुरुषो वीर्ये प्र
तिष्ठितः सर्वेषां पशूनां वीर्यवत्तमोऽय द्विपदा चाविंशत्यक्षरा
त्रिष्टुप् च ते द्वे अनुष्टुभौ ते नो वाचो रूपादनुष्टुभो रूपादूर्जरूपा
न्नैत्येष ब्रह्मा प्रतमं हैविदथे शंसिषं हरी इति द्विपदा च जगती च
व्यतिषजति द्विपाद्वै पुरुषो जागताः पशवः पुरुषमेव तत्पशुभि
लिद र्व्यतिषजति पशुषु प्रतिष्ठापयति तस्मात्पुरुषः पशुषु प्रतिष्ठि
तोऽत्ति चैनानधि च तिष्ठति वशो ह्यस्य प द्विपदा च षोडशाक्षरा

ब्रा॰ च॰
१॥

जगती च ते द्वे अनुष्टुभौ तेनो वा चारूपाद् नुष्टुभौ रूपाद्वत्र रूपा
चैतित्रिकद्रुकेषु महिषोयवाशिरं॥ प्रोथ स्वेपुरोरथमित्यति
छंदसः शंसति छंदसां वै प्योरसो त्यक्षरस्तोति छंद समभ्य
त्यक्षरत्त दति छंदसोति छंदस्वं सर्वेभ्यो वा एष छंदोभ्यः सं-
निर्मितो य एषो ऽकाशीतयघ दति छंदसः शंसति सर्वेभ्य एवैनं तच्छंदो
भ्यः संनिर्मिमीते सर्वेभ्यश्छंदोभ्यः संनिर्मिते न षोडशिना राध्नो राम्
हा तिय एवं वेद॥३॥ ॥ मंना म्नी नामुपसर्गानुपसृजत्यर्थं वै लो ॥५॥

कः प्रथमा महानाम्न्यंतरिक्षं लोको द्वितीयासौ लोकस्तृतीया सर्वे
भ्यो वा एष लोकेभ्यः संनिर्मितो य एषो ऽकाशीतयघ महानाम्नीनामुपस
भ्य ३ र्गानुपसृजति सर्वेभ्य एवैनं तल्लोकेभ्यः संनिर्मिमीते सर्वेभ्यो लोके
भ्यः संनिर्मिते न षोडशिना राध्नोति य एवं वेद प्र प्र वस्त्रिष्टुभमिष
मर्चैतुप्रा र्चत॥ यो व्यतीरफाणयदिति प्र ज्ञाता अनुष्टुभः शंस
ति तद्यथेह चेह चापथेन चरित्वा पंथानं पर्येयात्तादृक्तद्यत्प्र
ज्ञाता अनुष्टुभः शंसति स यो व्या सोग तश्री रिवमन्येता विहतं

ब्रा॰च
५॥

पोळशिनं शंसयेन्नेष्ठं दसांष्ठ घ्रादवपद्यादस्यपः पाप्मान
मपजिघांसेःस्यादिहतंपोळशिनं शंसयेद्व्यतिषक्त इव वैपुरु
षः पाप्मना व्यतिषक्तमेवास्मै तत्पाप्मानं शमलमपहंत्यपपाप्मा
नं हते य एवं वेदो घटद्धन्स्यविष्टपमिल्यक्तमया परिदधाति स्व
र्गो वै लोको ब्रध्नस्य विष्टपं स्वर्गमेव लं लोकं यजमानं गमयत्य
पाः पूर्वेषां हरिवः सुतानामिति यजति सर्वेभ्यो वा एष सवनेभ्यः सं
घनिर्मितो यत्षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति यजति ॥५॥ राम

वीतवद्ध्रातःसवनं प्रातःसवनाद्वैनं तत्संनिर्मिमीते यो इदं मी
सवनं केवलं तद् इति माध्यंदिनं [illegible] वै सवनं केवलं माध्यं
दिनाद्वैनं तत्सवनात्संनिर्मिमीते ममद्धि सोमं मधुमंतमिंद्रेति म
द्वद्धतृतीयसवनं तृतीयसवनाद्वैनं तत्संनिर्मिमीते सत्रा वृषंज
ठर आवृषस्वेति षण्वद्धे पोळशिनो रूपं सर्वेभ्यो वा एष सवनेृ
भ्यः संनिर्मितो यत्षोळशी तद्यदपाः पूर्वेषां हरिवः सुतानामिति
यजति सर्वेभ्य एवैनं तत्सवनेभ्यः संनिर्मिमीते सर्वेभ्यः सवने

ब्रा॰ च॰
॥६॥

भ्यः संनिर्मितेनृषो ऋशिनाराध्नोतिय एवं वेद महानाम्नीनां पंचा
क्षरानुपसर्गानुपसृज्य त्येकादशाक्षरेषु पादेषु सर्वेभ्यो वा ए
षछंदोभ्यः संनिर्मितो यत्षो ऋश्मीतय एन्महानाम्नीनां पं चा
क्षरानुपसर्गानुपसृज्य त्येकादशाक्षरेषु पादेषु सर्वेभ्य एवैनं त
छंदोभ्यः संनिर्मिमीते सर्वेभ्य ष्छंदोभ्यः संनिर्मितेनपो ऋशि
नाराध्नोति य एवं वेद॥ ५॥ अहर्वै देवा अश्रयंत रात्रीमसुरास्ते ॥६॥
समावद्वीर्या एवासन्न व्यावर्तंत सोब्रवीदिंद्रः कश्चाहं चेमानि रात्रि

तोसुरान्रात्रीमन्ववेष्याव इति स देवेषु न प्रत्यविंदं बि[illegible]भयू द १
रात्रेस्तमसो मृत्योस्तस्माध्याप्येतर्हि नक्तं यन्मात्रमिवैवापक्रम्य या २
बिभेति तमइव हि रात्रिर्मृत्युरिव ॥ तं वै छंदांस्येवान्ववायंस्तय छंदां
स्येवान्ववायंस्तस्मादिंद्रश्चैव छंदांसि च रात्रीं वहंति न निविच्छस्य
ते न पुरोरुङ् धाय्या नान्या देवतेंद्रश्च ह्येव छंदांसि च रात्रीं वहंति
तान्वै [illegible] पर्यायैरेव पर्यायमनुदंत यत्
पर्यायैः पर्यायमनुदंत तत्पर्यायाणां पर्यायत्वं तान्वै प्रथमेनै

श्री० च.
॥७॥

वपर्यायेण पूर्वरात्रादनुदंत मध्यमेन मध्यरात्रादुत्तमेना
पररात्रा दपिशर्वर्या अनुस्मसीत्यब्रुवन्नपिशर्वराणि खलु
वा एतानि छंदांसीति ह स्माहैतानि हींद्रं रात्रेस्तमसो मृत्योर्बिभ्य
तमत्यपारयंस्तदपिशर्वराणामपिशर्वरत्वं ॥५॥ ॥ पांतमा वो अं
धस इत्यंधस्वत्यानुष्टुभा रात्रिं प्रतिपद्यते आनुष्टुभी वै रात्रिरे
तद्रात्रिरूपमंधस्वत्यः पीतवत्यो मद्वत्यस्त्रिष्टुभो याज्या भवं
त्यभिरूपा यद्यज्ञेभिरूपं तत्समृद्धं प्रथमेन पर्यायेण स्तुवते प्र

भि ॥७॥ रामः

थमान्येव पदानि पुनराददते यदेवैषाम[illegible]श्वा गाव आसंस्त
देवैषां तेनाददते मध्यमेन पर्यायेण स्तुवते मध्यमान्येव पदानि पुनरा
ददते यदेवैषां मनोरथा आसंस्तदेवैषां तेनाददत उत्तमेन पर्याये
ण स्तुवत उत्तमान्येव पदानि पुनराददते यदेवैषां वासो हिरण्यं मणि
रध्यात्ममासीत्तदेवैषां तेनाददत आ द्विषतो वसु दत्ते निरेनमेभ्यः स
र्वेभ्यो लोकेभ्यो नुदते य एवं वेद पवमानवदहरित्याहुर्न रात्रिः पव
मानवती कथमुभे पवमानवती भवतः केन ते समावद्भाजौ भवत इति
यदेवेंद्राय मद्वने सुतमिदं वसो सुतमंध इदं ह्यन्वोजसा सुतमिति

ब्रा॰च॰
९६॥

स्तुवंति च शंसंति च तेन रात्रिः पवमानवतीति नोभे पवमानवती
भवतस्तेन ते समाव द्भाजौ भवतः पंचदशस्तोत्रमहरित्याहुर्न रात्रिः
पंचदशस्तोत्रा कथमुभे पंचदशस्तोत्रे भवतः केन ते समावद्भाजौ भवत
इति द्वादशस्तोत्राण्यपिशर्वराणीति स्तुभि देवताभिः संधिना राथंतरे
ण स्तुवते तेन रात्रिः पंचदश स्तोत्रा ते नोभे पंचदशस्तोत्रे भवतस्तेन ते
समावद्भाजौ भवतः परिमितं स्तुवंत्यपरिमितमनुशंसति परिमितं वै
भूतमपरिमितं भव्यमपरिमितस्यावरुध्या इत्यति शंसति स्तोत्रमति वै
प्रजात्मानमति पशवस्तद्यत्स्तोत्रमति शंसति ये देवास्या त्या मानं त

देवास्यैतेनावरुंध्येवरुंधे ॥६॥ इति चतुर्थपंचिकायां प्रथमोध्यायः॥
॥छ॥ प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं तस्यै सर्वे
देवा वरा आगच्छंस्तस्या एतत्सहस्रं वहतुमन्वाकरोद्यदेतदाश्विन
मित्याचक्षते नाश्विनं हैव तद्यदर्वाक्सहस्रं तस्मात्तत्सहस्रं वैव शंसे
द्भूयो वा प्रक्रय्य द्वितं शंसेद्यथाह वा इदमनो रथो वा त्तो वर्तेत एवं हैवा
त्तो वर्तते शकुनिरिवोत्पतिष्यन्नारुह्यी ततस्मिन्देवा न समजानंत ममे
दमस्तु ममेदमस्त्विति ते संजानाना अब्रुवन्नाजिमस्यायामहै स यो न उ

वा

श्री· च·
ऋ

ज्जेष्यति तस्येदं भविष्यतीति ते ग्नैरेवाधिगृहपतेरादित्यं का
ष्ठामकुर्वत तस्मादाग्नेयी प्रतिपद्भवत्याश्विने स्याग्निर्होता गृ
हपतिः स राजेति तदुक्त आहुरग्निं मन्ये पितरमग्निमापिमित्येत
या प्रतिपद्येत दिविशुक्रं यजतं सूर्यस्येति प्रथमयैव ऋचा
काष्ठामाप्नोतीति तत्तं न्वादित्यं यतनं तत्र ब्रूयादग्निमग्निमिति
वै प्रत्यपाद्यैमाप स्यतीति शश्वत्तथा स्यात्तस्मादग्निर्होता गृ
हपतिः स राजेत्येतयैव प्रतिपद्येत गृहपतिवती प्रजोति म

ह·
ग्नि
॥ ऋ
राम

तीशांता स सर्वायुः सर्वायुत्वाय सर्वमायुरेति य एवं वेद
॥ ६ ॥ तासां वै देवतानामाजिं धावंतीनामभिसृष्टानामग्नि
र्मुखं प्रथमः प्रत्यपद्यत तमश्विनावन्वागच्छतां तमब्रूता
मपोदिह्यावां वा इदं जेष्याव इति स तथेत्यब्रवीत्तस्य
वै मम हाप्यास्त्विति तथेति तस्मा अप्यत्राकुरुतां तस्मादा
ग्नेयमाश्विने शस्यते ता उषसमन्वागच्छतां तामब्रूताम

ना

श्री·च·
।।२०।।

पोदिद्याचांवाऽइदंज्येष्ठावइतिसातथेत्यब्रवीत्तस्यैवै
ममेहाप्यस्त्वितितथेतितस्याअप्यत्राकुरुतांतस्मादुषस्य
माश्विनेशस्यतेलाविंद्रमन्वागच्छतांतमब्रूतामावांवा
इदंमघवंज्येष्ठावइतिनेहतंदध्रेपतुरपोदिहीतिवत्तुंस
तथेत्यब्रवीत्तस्यवैममेहाप्यस्त्वितितथेतितस्माअप्यत्रा
कुरुतांतस्मादैंद्रमाश्विनेशस्यतेतदश्विनाउदजयताम
श्विनावाश्नुवातांयदश्विनाउदजयतामश्विनावाश्नु

।।२०।।
राम

वातांतस्मादेतदाश्विनमित्याचक्षतेश्नुतेयद्यत्कामयते
यएवंवेदतदाहुर्यच्छस्यतआग्नेयंशस्यतउषस्यंशस्यत
ऐंद्रमथकस्मादेतदाश्विनमित्याचक्षतइत्यश्विनौहि
तदुदजयतामश्विनावाश्नुवातांयदश्विनाउदजयताम
श्विनावाश्नुवातांतस्मादेतदाश्विनमित्याचक्षतेश्नुतेय
द्यत्कामयतेयऽएवंवेद ।।८।। अश्वतरीरथेनाग्निराजिम
धावत्तासांप्राजमानोयोनिमकूलयत्तस्मात्तानविंदा

श्रौ०च०
११

यं ते गोभिररुणैरुषा आजिमधावत्तस्मादुषस्यागता
यामरुणमिवैव प्रभात्युषसो रूपमश्वरथेनेंद्र आजिम
धावत्तस्मात्स उच्चैर्घोष उपब्दिमान्क्षत्रस्य रूपमैंद्रो हि स
गर्दभरथेनाश्विना उदजयतामश्विनावाश्नुवातां यदश्वि
ना उदजयतामश्विनावाश्नुवातां तस्मात्स सृतजवो दुग्ध
दोहः सर्वेषामेतर्हि वाहनानामनाशीरेतस्क्ष्वस्य वीर्येंना
हरतां तस्माद्द्विरेता वाजी तदाहुः स सप्तसौर्याणि प्रति छंदांसि

१२

को

शंसेद्यथैवाग्नेयं यथोषस्यं यथाश्विनं सप्त वै देवलोकाः
सर्वेषु देवलोकेषु राध्नोतीति तत्तन्नादृत्यं त्रीण्येव शंसेत्त्रयो
वा इमे त्रिवृतो लोका एषामेव लोकानामभिजित्यै तदाहुरुदुत्यं जा
तवेदसमिति सौर्याणि प्रतिपद्येतेति तत्तन्नादृत्यं यथैव गत्वा का
ष्ठामपराध्नुयात्तादृक्तत्सूर्यो नो दिवस्पात्वित्येतेनैव प्रतिप
द्येत यथैव गत्वा काष्ठामभिपद्येत तादृक्तदुदुत्यं जातवेदस
मिति द्वितीयं शंसति चित्रं देवानामुदगादनीकमिति तृ

श्री॰च॰
१२

ष्टुभमसौ वा वचित्रं देवानामुदे [illegible] ति तस्मा
देतछंसति नमो मित्रस्य वरुणस्य चक्षस इति जागतं त
द्धाशीः पदमाशिषमेवैतेनाशास्त आत्मने च यजमानाय
च ॥९॥ तदाहुः सूर्यो नातिशंस्यो [illegible] बृहती नातिशं
स्याथ सूर्यमतिशंसेद्ब्रह्मवर्चसमतिपद्येतथ यद्बृहतीमति
शंसेत्प्राणानतिपद्येतेतीद्र क्रतुं न आभरेत्येंद्रं प्रगाथं शंस
ति [illegible] शिक्षाणो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीम

हीत्यसौ वाव ज्योतिस्तेन सूर्यं नातिशंसति यद्बार्हतः प्रगाथः स्ते
न बृहतीं नातिशंसत्यभि त्वा शूर नोनुम इति राथंतरीं योनिं शंसति रा
थंतरेण वै संधिनाश्विनाय स्तुवते तद्यद्राथंतरीं योनिं शंसति रथंतर
स्यैव स योनिस्तायते ईशानमस्य जगतः स्वर्दृशमित्यसौ वाव स्वर्दृक्ते
न सूर्यं नातिशंसति यद्बार्हतः प्रगाथः स्तेन बृहतीं नातिशंसति
बृहद्वेः स्वरचक्षुः सति दे मैत्रावरुणं प्रगाथं शंसत्यहर्वै मित्रो रात्रिर्व
रुण उभे वा एषो अहोरात्रे आरभते यो अतिरात्रमुपैति तद्यन्मैत्रावरुणं प्र

श्री॰ च॰ ॥२३॥

गाथं शंसत्यहोरात्रयोरेवैनं तत्प्रतिष्ठापयाति सूरश्चक्षसा इति ते
न सूर्यं नातिशंसति यदु बार्हतः प्रगाथः स्तेन [illegible] बृहतीं नातिशं
सति मही द्यौः पृथिवी च न स्तेहि द्यावापृथिवी विश्वशंभुवेति द्या
वापृथिवी च शंसति द्यावापृथिवी वै प्रतिष्ठे इयमेवेह प्रतिष्ठासाव
मुत्र तद्द्यावापृथिवीये शंसति प्रतिष्ठयोरेवैनं तत्प्रतिष्ठापयाति देवो
देवी [illegible] धर्मणा सूर्यः शुचिरिति न सूर्यं नातिशंसति यदु गायत्री च
जगती च ते द्वे बृहत्यौ तेन बृहतीं नातिशंसति विश्वस्य देवीमृ ॥२३॥
चयस्य [illegible] जन्मनो न या रोषाति न [illegible] ग्रभदिति द्विपदां शंसति द्वि

गा

घ× ति

राम

---

४ नद्यदेनां द्विपदां होताशंसति निर्ऋत्या एवतस्याशिन्या अधराचः पाशानपास्य ५

घ

तौ [illegible] स्मुक्थमितिह स्म वा एतदाचक्षते यदेतदाश्विनं निर्ऋतिर्
ह स्म पा [illegible] शिन्युपास्ते यदेव होता परिधास्यस्यथ पाशान्प्रति
मोक्ष्यामीति ततो वा एतां बृहस्पतिर्द्विपदामपश्यन्नया रोषाति न
ग्रभदिति तया निर्ऋत्याः पाशिन्या अधराचः पाशानपास्यति स्व
स्त्येव होतोन्मुच्यते सर्वायुः सर्वायुत्वाय सर्वमायुरेति य एवं वेद
मृचयस्य जन्मन इत्य सौ वावमृचयः पतीव तेन सू नातिशंसति य
दु द्विपदा पुरुषछंदसं सा सर्वाणि छंदांस्यभ्यापा तेन बृहतीं नातिशं
सति ॥ ५॥ ब्राह्मणस्पत्यया परिदधाति ब्रह्म वै बृहस्पतिर्ब्रह्मण्ये

यैं

ब्रा॰च॰
॥२४॥

वैनं तदंततः प्रतिष्ठाप [illegible] यत्येवापित्रोव ष्वदेवाय वृष्णइ [illegible]
त्यै [illegible] तयापरिदध्यात्प्रजाकामः परःका
मो बृहस्पतेस्त्वं प्रजावीरवं तइति प्रजयावैस्त्वं प्रजावीरवान्वयं
स्याम पतयोरयीणामिति प्रजावान्परः कामान्रयिमान्वीरवान्भव
तियत्रैवं विद्वानेतयापरिदधाति बृहस्पते [illegible]अतियदर्यो अर्हा
दित्येतयापरिदध्यात्तेजस्कामो ब्रह्मवर्चसकामोतीववान्या
न्ब्रह्मवर्चस [illegible] मर्हतिद्युमदितिद्युमदिववैब्रह्मवर्चसं ॥२४॥
विभातीतिवीववैब्रह्मवर्चसं [illegible] भातियद्दीदयच्छवसऋतप्रजात राम

× यद्वुत्रिष्टुभं त्रिः शंसति सास र्वाणिछंदांस्यभ्याप्नोति न बृहतीं नातिशंसति ४

तेतिदीदायेववैब्रह्मवर्चसं तदस्मासु द्रविणंधेहि चित्रामिति चि
त्रमिववैब्रह्मवर्चसं ब्रह्मवर्चसी ब्रह्मयशसी भवति यत्रैवं विद्वानेत
यापरिदधाति तस्मादेवं विद्वानेतयैवपरिदध्याद्ब्राह्मणस्पत्यां तेन
सूर्यन्नाति शंसति गायत्र्या च त्रिष्टुभा च वषट्कुर्याद्ब्रह्म वै गायत्री
प॰ वीर्यं त्रिष्टुब्ब्रह्मणैव तद्वीर्यं संदधाति ब्रह्मवर्चसी ब्रह्मयशसी वीर्यवा
न्भवति यत्रैवं विद्वान्गायत्र्या च त्रिष्टुभा च वषट्करोत्याश्विनावा
युनायुवं स्कदक्षो भा पिबतमश्विने ति गायत्र्या च विराजा च वषट्कुर्या
द्ब्रह्म वै गायत्र्यन्नं विराड्ब्रह्मणैव तदन्नाद्यं संदधाति ब्रह्म वर्च

ब्रा॰ च॰
२५॥

सीब्रह्मयशसी भवति ब्रह्मणाद्यमन्नमत्ति य एवं विद्वान्गायत्र्या च
विराजा च वषट्करोति तस्मादेवं विद्वान्गायत्र्या चैव विराजा च
वषट्कुर्यात् तृप्रेवामंधांसि मद्यान्यस्थु रुमापिबतमश्विनेत्येता
भ्यां ॥ २१ ॥ चतुर्विंशमेतदहरुपयंत्यारंभणीयमेतेन वै संवत्सरमा
रभंत एतेन स्तोमांश्छंदांसि चैतेन सर्वा देवता अनारब्धं वै तच्छं
दो नारब्धा सा देवता यदेतस्मिन्नहनि नारभंते तदारंभणीयस्या
रंभणीयत्वं चतुर्विंशस्तोमो भवति तच्चतुर्विंशस्य ...तं चतुर्विंशो वै
चतुर्विंशतिर्वा अर्धमासा अर्धमासश एव तत्संवत्सरमारभंते

२५॥
रम

उक्थ्यो भवति पंचदशो वा उक्थानि पंचदशानामवरुध्यै तस्य पंचद
शस्तोत्राणि भवंति पंचदशानि स्तोत्राणि समासो मासश एव तत्संवत्सरमा
रभंते तस्य षष्टिश्च त्रीणि च शतानि स्तोत्रियास्तावंति संवत्सरस्या
वत्स
हान्यहःश एव तत्संवत्सरमारभंतेऽग्निष्टोम एतदहः स्यादित्याहुरग्निष्टो
मो वै संवत्सरो न वा एतदन्योऽग्निष्टोमादहर्दाधार न विव्याचेति स य
ग्निष्टोमः स्यादष्टाचत्वारिंशास्त्रयः पवमानाः स्युश्चतुर्विंशानीतराणि
स्तोत्राणि तदु षष्टिश्चैव त्रीणि च शतानि स्तोत्रियास्तावंति संवत्सर
स्याहान्यहःश एव तत्संवत्सरमारभंत उक्थ्य एव स्यात्पशुसमृद्धो

ब्रा॰च॰
२६

यज्ञः पशवः समृध्यं सत्रं सर्वाभि चतुर्विंशानि स्तोत्राणि प्रत्यक्षाध्ये
तदहश्चतुर्विंशं तस्माद् उक्थ्य एव स्यात् ॥२२॥ बृहद्रथंतरे सामनी
भवत एते वै यज्ञस्य नावौ संपारिण्यौ यद्बृहद्रथंतरे [illegible] ताभ्यामे
व तत्संवत्सरं तरंति पादौ वै बृहद्रथंतरे शिर एतदहः पादाभ्या
मेव तच्छ्रियं शिरोभ्यायंति पक्षौ वै बृहद्रथंतरे शिर एतदहः पक्षा-
भ्यामेव तच्छ्रियं शिरोभ्यायुवते ते उ[illegible]भे न समवसृज्येयं यदुभे स
२ मवसृजेयुर्यथैवाछिन्ना नौर्बंधना तीरं तीरमृच्छंती प्लवेतैवमेवते २६
सत्रिण[illegible] तीरं तीरमृच्छंतः प्लवे[illegible]रन्य उभे समवसृजेयुस्तद्य

द्रथंतरमवसृजेयुर्बृहत्तैवोभे अनवसृष्टे अथ यदि बृहद्वसृ
जेयु रथंतरेणैवोभे अनवसृष्टे यद्रथंतरं तद्रूपं बृहत्तद्रूपं य२
यद्रथंतरं तच्छाकरं यद्बृहत्तद्वैरूपं [illegible] एवमेते उभे अनवसृष्टे भ
वतो य एवं विद्वांस एतदहरुपयंत्याप्नावैते हः राः संवत्सरमा
प्त्वार्धमासांसे आप्त्वा मासानाप्त्वा स्तोमांश्छंदांसि चाप्त्वा
सर्वा देवतास्तर्पयंत एवं तप्यमानाः सोमपीथं भक्षयंतः संवत्स
रमभिषुण्वंत आसते ये वा अतदूर्ध्वं संवत्सरमुपयंति गुरुं वै ते भा
२ रमभिनिंध्यते संवे[illegible] गुरु भारःस्सणात्ययपयन्परस्तात्कर्मभिरुप्ताव

ब्रा॰च॰

१८

ना

स्तादुपैतिसवैस्वस्तिसंवत्सरस्यपारमश्नुते॥१३॥द्वेचतु
र्विंशंतन्महाव्रतंबृहद्दिवेनात्रहोतारेतःसिंचतितदेतोमहाव्रती
येनाह्नाप्रजनयतिसंवत्सरेसंवत्सरेवैरेतःसिक्तंजायतेतस्मा
त्समानंबृहद्दिवोनिष्केवल्यंभवत्येषहवाएनंपरस्तात्कर्मभि
राप्त्वावस्तादुपैतियएवंविद्वानेतदहरुपैतिस्वस्तिसंवत्सरस्यपा
रमश्नुतेयएवंवेदयोवैसंवत्सरस्यावारंचपारंचवेदसवैस्व
स्तिसंवत्सरस्यपारमश्नुतेतिरात्रोवाअस्यप्रायणीयोवारमुदनीयः
पारंस्वस्तिसंवत्सरस्यपारमश्नुतेयएवंवेदयोवैसंवत्सरस्यावरोधनंचो

॥१८॥

राम

द्रोधनंचवेदसवैस्वस्तिसंवत्सरस्यपारमश्नुतेतिरात्रोवाअ
स्यप्रायणीयोवरोधनमुदयनीयउद्रोधनंस्वस्तिसंवत्सरस्यपा
रमश्नुतेयएवंवेदयोवैसंवत्सरस्यप्राणोदानौवेदसवैस्वस्तिसं
वत्सरस्यपारमश्नुतेतिरात्रोवाअस्यप्रायणीयः[illegible]प्राणउदा
नउदयनीयःस्वस्तिसंवत्सरस्यपारमश्नुतेयएवंवेदयएवंवे
द॥१४॥इतिचतुर्थपंचिकायांद्वितीयोध्यायः॥छ॥छ॥ज्योति
र्गौरायुरितिस्तोमाभवं[illegible]त्ययंवैलोकोज्योतिरंतरिक्षंगौरसौलोक

श्री·च आयुः स एवैष उत्तरस्त्र्यहो ज्योतिर्गौरायुरिति त्रीण्यहानि गौरायुर्ज्यो
॥१८॥ तिरिति त्री ण्ययं वै लोको ज्योतिरसौ लोको ज्योतिस्ते एते ज्योतिषी
उभयतः संलोकेते तेनैते नोभयतो ज्योतिषा षडहेन यंति [illegible]
[illegible] तद्यदेते नोभयतो ज्योतिषा षडहेन यंत्यनयोरेव तं लोक
लि योरुभयतः प्रतितिष्ठंतो यंत्यस्मिंश्च लोकेमुष्मिंश्चोभयोः पर्यद्वाएतद्दि
ऋ वचक्रं यदभिप्लवः षडहस्तस्य यावभितो ज्योतिष्टोमौ तौ प्रधीयेच त्वारोम ॥१९॥
ध्यउक्थ्यास्तन्नभ्यं गच्छति वै वर्तमानेन यत्र कामयते तत्स्वस्ति सं राम

वत्सरस्य पारमश्नुते य एवं वेद यो वै तद्वेद यत्प्रथमः षडहः स
वै स्वस्ति संवत्सरस्य पारमश्नुते यस्तद्वेद यद्द्वितीयो यस्तद्वेद य
त्तृतीयो यस्तद्वेद यच्चतुर्थो यस्तद्वेद यत्पंचमः ॥१५॥ प्रथमं षडह
मुपयंति षडहानि भवंति षड्वा ऋतव ऋतुश एव तत्संवत्सरमाप्नुवं
ति त्यृतुशः संवत्सरे प्रतितिष्ठंतो यंति द्वितीयं षडहमुपयंति द्वादशा हा
नि भवंति द्वादश वै मासा मासश एव तत्संवत्सरमाप्नुवंति मासशः
संवत्सरे प्रतितिष्ठंतो यंति तृतीयं षडहमुपयंत्यष्टादशाहानि भ

स्वर्गाश्च लोकानाप्नुवंति प्राणेषु चैव तत्२ ६

श्री. चं

१२१ श्रा

२

वंति तानिहृध्यानवान्यानि नवान्यानि नवै प्राणान वस्वर्गालोकाः
णांश्चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठंतो यंति चतुर्थं षळहमुपयंति
चतुर्विंशतिरहानि भवंति चतुर्विंशतिर्वा अर्धमासा अर्धमासशए
व तत्संवत्सरमाप्नुवंत्यर्धमासशः संवत्सरे प्रतितिष्ठंतो यंति पंचमं
षळहमुपयंति त्रिंशदहानि भवंति त्रिंशदक्षरा वै विराड्विराळन्नाद्यं
विराजमेव तन्मासि मास्यभिसंपादयंतो यंत्यन्नाद्यकामाः खलु वै १२१
सत्रमासत तद्यद्विराजं मासि मास्यभिसंपादयंतो यंत्य[illegible]न्नाद्यमे

ति

राम

६

वतन्मासि मास्यवरुंधानायंत्यस्मै च लोकायामुष्मै चोभाभ्यां
॥१६॥ गवामयनेन यंति गावो वा आदित्या आदित्यानामेव तदय
नेन यंति गावो वै सत्रमासत शफाञ्छृंगाणि सिषासत्यस्ता सां दश
मे मासि शफाः शृंगाण्यजायंत ता अब्रुवन्[illegible]न्य स्मै का
मायादीक्षामह्युपाम तमुत्तिष्ठामेति ता या उदतिष्ठंस्ता एता[illegible]
स[illegible] शृंगिण्यो थ याः समापयिष्यामः संवत्सरमित्यासत तासामश्रद्धय
याशृंगाणि प्रावर्तंत ता एतास्तूपरा ऊर्जं स्वसुन्वंस्तस्मादु ताः सर्वा

सा

ले

ब्रा॰ च

२०।

र्त्सून्प्रापुस्तस्मादुत्तिष्ठंत्यूर्जं ह्यस्याः सत्वंत्सर्वस्य वै गावः प्रेमाणंस
र्वस्य चारुतां गताः सर्वस्य प्रेमाणं सर्वस्य चारुतां गच्छति य एवं
वेदादित्याश्च ह वा अंगिरसश्च स्वर्गे लोके स्पर्धंत वयं पूर्व एष्या
मो वयमिति ते हादित्याः पूर्वे स्वर्गं लोकं जग्मुः पश्चेवांगिरसः षष्ट्यां
वा वर्षेषु यथा वा प्रायणीयोऽतिरात्रश्चतुर्विंश उक्थ्यः सर्वेऽभिप्ल
वाः षळहा आक्ष्यंत्यन्यान्यहानि तदादित्यानामयनं प्रायणीयो
तिरात्रश्चतुर्विंश उक्थ्यः सर्वे पृष्ठ्याः षळहा आक्ष्यंत्यन्यान्य

२०

राम

हानि तदंगिरसामयनं सा यथा स्रुतिरंजसायन्येवमभिप्लवः ष
ळहः स्वर्गस्य लोकस्याथ यथा महापथः पर्याण एवं पृष्ठ्यः षळहः
स्वर्गस्य लोकस्य तद्यदुभाभ्यां यंत्युभाभ्यां वै यन्न रिष्यत्युभयोः का
मयोरुपाप्त्यै यश्चाभिप्लवे षळहे यश्च पृष्ठ्ये ॥१७॥ एकविंशमे
तदहरुपयंति विषुवंतं मध्ये संवत्सरस्यैतेन वै देवा एकविंशेनाद
त्यं स्वर्गाय लोकायोदयच्छंत्स एष इत एकविंशस्तस्य दशावस्तादहा

स्य

नि दिवाकीर्त्यस्य भवंति दश परस्तान्मध्य एष एकविंशो [illegible] उभयतो

श्री॰च॰

२१

विराजिप्रतिष्ठितः उभयतो हि वा एष विराजि प्रतिष्ठितस्तस्मा
देषां [illegible]तरेमा[illegible]ल्लोकान्न्यन्नयपते तस्य वै देवा आदित्यस्य स्वर्गा
ल्लोकादवपाताद बिभयुस्तं त्रिभिः स्वर्गैर्लोकैः रवस्तात्प्रत्यस्तुभ्नुव
स्तोमा वै त्रयः स्वर्गा लोकास्तस्य पराञ्चोतिपाताद बिभयुस्तं त्रि
भिः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवन्स्तोमा वै त्रयः स्वर्गा लोकास्त्र
योवस्ता[illegible]दस्तात्सप्तदशा भवंति त्रय परस्तान्मध्य एष एक २१
विंश उभयतः स्वरसामभिर्धृतः उभयतो हि वा एष स्वरसामभि

र्धृतस्तस्मादेषां तरेमांल्लोकान्न्यन्नयपते तस्य वै देवा आदित्यस्य
स्वर्गाल्लोकादवपाताद बिभयुः स्तं परमैः स्वर्गैर्लोकैः रवस्तात्प्रत्यस्तु
भ्नुवन्स्तोमा वै परमाः स्वर्गा लोकास्तस्य पराञ्चोतिपाताद बिभयुस्तं
परमैः स्वर्गैर्लोकैः परस्तात्प्रत्यस्तभ्नुवन्स्तोमा वै परमाः स्वर्गा लोकाः
स्त्रयोवस्तात्सप्तदशा भवंति त्रयः परस्तात्ते द्वौ द्वौ संपद्य त्रयश्च
तुस्त्रिंशा भवंति चतुस्त्रिंशो वै स्तोमानामुत्तमस्तेषु वा एष एतद
ध्याहितस्तपति तेषु हि वा एष एतदध्याहितस्तपति स वा एष

उत्तरोस्मात्सर्वस्माद्भूताद्भविष्यतः सर्वमेवेदमतिरोचते यदिदं
किं चोत्तरो भवति यस्मादुत्तरो बुभूषति तस्मादुत्तरो भवति यऽए
वं वेद ॥१९॥ स्वरसामान ऽउपयंतीमे वै लोकाः स्वरसामान इमान्वै लो
र कान्स्वरसा[illegible]मभिरस्वरण्वंस्तत्स्वरसाम्नां स्वरसाम
त्वं तद्य स्वरसामान उपयंत्येष्वेवैनं तल्लोकेष्वाभजंति तेषां वै देवाः स
प्तदशानां प्रवृयाद बिभयुः स मा ऽइव वै स्तोमा अविगृह्या ऽइ
वेमेह न प्रवृद्धियेरन्निति तान्त्सर्वैः स्तोमैरवस्तात्पर्यौर्षन्त्सर्वैः ए

ष्ठैः परस्तात्तद्यदभिजित्सर्वस्तोमोऽवस्ताद्भवति विश्वजित्सर्वपृ=
ष्ठः परस्तात्तत्सप्तदशानुभयतः पर्यृ[illegible]षंति धृत्याऽअप्रवृयाय तस्य
वै देवा आदित्यस्य स्वर्गाल्लोकादवपाताद बिभयुस्तं पंचभी रश्मि
भिरु[illegible]दवयन् ॥२०॥ रश्मयो वै दिवाकीर्त्यानि महादिवाकीर्त्यं पृष्ठं भव
ति विकर्णं ब्रह्मसाम भासमग्निष्टोमसामोभे रहद्रथंतरे पवमानयो ब
र्भवतस्तदादित्यं पंचभी रश्मिभिरुद्दयंति धृत्याऽअनव पाताया
दित आदित्ये प्रातरनुवाकमनुब्रूयात्सर्वैस्येवैतद्दिवाकी ह

र्त्यं भवति सौर्यः पशुमन्यं गश्वेतं सवनीयस्योपालंभ्यमालभेरन् सूर्य
देवत्यं ह्येतदहरेकविंशतिं सामिधेनीरनुब्रूयात् [illegible] स्य [illegible]
[illegible] त्यपक्षाध्येतदहरेकविंशमेकपंचाशतं द्विपंचाशतं वा शस्त्वा
मध्ये निविदं दध्याति तावतीरुत्तराः शंसति शतायुर्वै पुरुषः शतवी
र्यः शतेंद्रियऽआयुष्येवैनं तदिंद्रिये दध्याति ॥२९॥ दूरोहणं रोह
ति स्वर्गो वै लोको दूरोहणं स्वर्गमेव तल्लोकं रोहति य एवं वेद यद्देव दू
रोहणं ३ असौ वै दूरोहो योसौ तपति कश्चिद्वा अत्र गच्छति स य दू

रोहणं रोह[illegible]त्येतमेव तद्रोहति हंसवत्या रोहति हंसः शुचिषदित्येष
वै हंसः शुचिषद्वसुरंतरिक्षसदित्येष वै वसुरंतरिक्षसद्धोता वेदिषदित्ये
ष वै होता वेदिषदतिथिर्दुरोणसदित्येष वाऽअतिथिर्दुरोणसंनृषदि
त्येष वै नृषद्वरसदित्येष वै वरसद्वरं वाऽएतत्सद्मनां यस्मिन्नेषऽआस
न्नस्तपत्यृतसदित्येष वै सत्यसद्व्योमसदित्येष वै व्योमस[illegible]द्व्योम वा
एतत्सद्मनां यस्मिन्नेषऽआसन्नस्तपत्यब्जाऽइत्येष वाऽअब्जाऽअद्भ्यो
वाएष प्रातरुदेत्यपः सायं प्रविशति गोजाऽइत्येष वै गोजा ऋतजाइ

ब्रा॰ च॰

॥२४॥

त्येष वै सत्य जा ऽ अदिजा ऽ इत्येष वा ऽ अदिजा ऋतमित्येष वै सत्यमेष
एतानि सर्वाण्येषाह वा ऽ अस्य छंदः सु प्रत्यक्षतमादिव रूपं तस्माद्यत्र
का च दूरोहणं रोहेद्‌ स वस्यैवरोहेत्ताक्ष्यैः स्वर्गकामस्य रोहेत्ताक्ष्यों ह वा ऽ
एतं पूर्वोऽध्वानमेयत्रादो गायत्री सुपर्णो भूत्वा सोममाहरत्तद्यथा क्षे
त्रज्ञमध्वनः पुरएतारं कुर्वीत तादृक् तद्यदेवताक्ष्यं पं वै ताक्ष्यों यो यंप
वतऽ एष स्वर्गस्य लोकस्याभिवोढा त्यमूषु वाजिनं देवजूतमित्येष
वै वाजी देवजूतः सहावानं तरुतारं रथानामित्येष वै होसे वा स्त

॥२४॥ रामू

रुतैष ही मां ल्लोकान्त्सद्यस्तरत्यरिष्टनेमिं एतनाजमाशुमित्ये
ष वा अरिष्टनेमिः पृतनाजिदाशुः स्वस्तय ऽ इति स्वस्तितामाशा
स्तेताक्ष्यमिहा हुवेमेति ह्वयत्येवैनमेतदिंद्रस्येव राति माजोहुवा
नाः स्वस्तय ऽ इति स्वस्तितामेवाशास्ते नावमिवा रुहेमेति समेवैन
मेतदधिरोहति स्वर्गस्य लोकस्य समष्ट्यै संपश्येसंगत्या ऽ उर्वी न पृ
थ्वी बहुले गभीरे मा वामेतौ मा परेतौ रिषामेति मे ऽ एवैतदनुमंत्रय
त आ च परा च मेष्यतः सद्यश्चिद्यः शवसा पंच कृष्टीः सूर्य ऽ इव ज्यो
तिषापस्ततानेति प्रत्यक्षं सूर्यमभिवदति सहस्रसाः शतसा ऽ अस्य रंहि

ब्रा॰ च॰

२५

र्नस्मावरं तेयुवतिन्त्वरार्यामित्याशिषमेवैतेनाशास्तऽआत्मनेचयजमा
नेभ्यश्च ॥२०॥ आहूयदूरोहणंरोहतिस्वर्गोवैलोकोदूरोहणंवागाहावै
ब्रह्मवैवाक्सपदाहृत्यतेतद्ब्रह्मणाहावेनस्वर्गंलोकं [illegible] रोहतिसपच्छः प्र
थमंरोहतीमंतल्लोकमाप्नोत्यथार्धर्च [illegible] शोंतरिक्षंतदाप्नोत्यथात्रि
पद्यामुत्तंल्लोकमाप्नोत्यथकेवल्यातदेतस्मिन्प्रतितिष्ठतियऽएषतप
तित्रिपद्याप्रत्यवरोहतियथाशाखांधारयमाणःस्तद [illegible] मुष्मिंल्लोके
प्रतितिष्ठत्यर्धर्चशोंतरिक्षेपच्छोस्मिंल्लोकेऽआत्मैवतत्स्वर्गंल्लोकंयज
मानाऽअस्मिंल्लोकेप्रतितिष्ठत्यथयऽएककामास्युःस्वर्गकामाःपरां

२५

राम

सूत्ता ति

चमेवतेषांरोहेत्तेऽजयेयुर्हैवस्वर्गंल्लोकंनेत्वेवास्मिंल्लोकेऽज्योगिव
वसेयुर्मिथुनानिशस्यंतेत्रैष्टुभानिचजागतानिचमिथुनंवैपशवः
पशवःछंदांसिपशूनेवावरुंधे ॥२१॥ यथावैपुरुषऽएवंविषुवांस्त
स्ययथादक्षिणोर्धऽएवंपूर्वोर्धोविषुवतोयथोत्तरोर्धऽएवमुत्त
रोर्धोविषुवतस्तस्मादुत्तरऽइत्याचक्षतेप्रबाहुक्सतःशिरऽएवविषु
षुवान्विदलसंहितऽइववैपुरुषस्तस्यापिस्यूमेवमध्येशीर्ष्णोविज्ञा
यतेतदाहुर्विषुवत्येवैतदहःशंसेद्विषुवान्वाऽएतदुक्थानामुक्थं

ब्रा·च·

२६

विषुवान्विषुवानिति ह विषुवंतो भवंति श्रेष्ठतामश्नुवतः इति तत्त
न्माहृत्यं संवत्सरः एव वशो सेंद्रे तो वा एतत्संवत्सरं दधतो यंति यानि वै
पुरा संवत्सराद्रेतांसि जायंते यानि पंच मास्यानि यानि षण्मास्या
नि [illegible] स्रीव्यंति वै तानि न वै तैर्भुंजतेथ यान्येव दशमास्यानि जायंते
यानि सांवत्सरिकाणि तैर्भुंजते तस्मात्संवत्सरः एवैतदहः शो सेन्
संवत्सरो [illegible] ह्येतदहराप्नोति संवत्सरं ह्येतदहराप्नुवंत्येष ह वै संवत्सरेण व
पाप्मानमपहत एष विषुवतांगेभ्यो हैवमासैः पाप्मानमपहते शीर्ष्णो विषुव
ताप संवत्सरेण पाप्मानं [illegible] हते प विषुवताय एवं वेद वैश्वकर्मणमृषभं सव

राम २६

नीय [illegible] स्योपालंभ्यमालभेरन्द्विरूपमुभयत एतं महाव्रतीयेऽहनी
द्रो वै वृत्रं ह[illegible]त्वा विश्वकर्माभवत्प्रजापतिः प्रजाः सृष्ट्वा विश्वकर्माभवत्सं
वत्सरो विश्वकर्मेंद्रमेव तदात्मानं प्रजापतिं संवत्सरं विश्वकर्माण
माप्नुवंतींद्र ए[illegible]व तदात्मनि प्रजापतौ संवत्सरे विश्वकर्मण्यंततः
प्रतितिष्ठंति प्रतितिष्ठति यः एवं वेद यः एवं वेद ॥२२॥ इति चतुर्थपंचि
कायां द्वितीयोध्यायः ॥ ॥ॐ नमः॥ प्रजापतिरकामयत प्रजायेय भू
यान्स्यामिति स तपोतप्यत स तपस्तप्त्वेमं द्वादशाहमपश्यदात्म

श्री·च
२७॥
श्र

नऽएषां गेषु च प्राणेषु च तमा [illegible] त्मन एवांगेभ्यश्च प्राणेभ्यश्च द्वा
दश [illegible] ध्यानिरमिमीत तमाहरत्तेनायजत तेन ततो वै सोऽभ
वदात्मना प्रजया पशुभिरजायत भवत्यात्मना प्र प्रजया पशुभि
र्जायते यऽएवं वेद सोऽकामयत कथन्नु गायत्र्या सर्वतो द्वादशाहं
परिभूय सर्वामृध्यिमृध्नुयामिति तं वै तेजसैव पुरस्तात्पर्यभवच्छं
दोभिर्मध्यतोऽक्षरैरुपरिष्टाद्गायत्र्या सर्वतो द्वादशाहं परिभूय स
सर्वामृध्यिमार्ध्नोत्सर्वामृध्यिमृध्नोति यऽएवं वेद यो वै गायत्रीं

।२७॥
राम

पक्षिणीं चक्षुष्मतीं ज्योतिष्मतीं भास्वतीं वेद गायत्र्या पक्षिण्या
चक्षुष्मत्या ज्योतिष्मत्या भास्वत्या स्वर्गं लोकमेत्येषा वै गायत्री प
क्षिणी चक्षुष्मती ज्योतिष्मती भास्वती यद्द्वादशाहस्तस्य याव
भितोऽतिरात्रौ तौ पक्षौ यावन्तराग्निष्टोमौ ते चक्षुषी येऽष्टौ मध्य उ
क्थ्याः सऽआत्मा गायत्र्या पक्षिण्या चक्षुष्मत्या ज्योतिष्मत्या भा
स्वत्या स्वर्गं लोकमेति यऽएवं वेद ॥२३॥ त्रयश्च वाऽएते त्र्यहाऽआद
शममहरद्वावतिरात्रौ यद्द्वादशाहो द्वादशाहानि दीक्षितो भवति

यज्ञियः एव तेन भवति द्वादश रात्रीरुपसद उपैति शरीरमेव ताभिर्धू
नुते द्वादशाहं प्रसुतो भूत्वा शरीरं धूत्वा शुद्धः पूतो देवता अप्येति
यः एवं वेद षट्त्रिंशदहो वाऽएष यद्द्वादशाहः षट्त्रिंशदक्षरा वै बृह
ती बृहत्या वाऽएतदयनं यद्द्वादशाहो बृहत्या वै देवाऽ इमांल्लोकाना
श्नुवत ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत दशभिरंतरिक्षं दश
भिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिंल्लोके प्रत्यतिष्ठन्प्र
तितिष्ठति यऽ एवं वेद तदाहुर्यदन्यानि छंदांसि वर्षीयांसि भूयोक्षर

तराण्यथ कस्मादेतां बृहतीत्याचक्षत इत्येतया हि देवाऽ इमां
ल्लोकानाश्नुवत ते वै दशभिरेवाक्षरैरिमं लोकमाश्नुवत दशभि
रंतरिक्षं दशभिर्दिवं चतुर्भिश्चतस्रो दिशो द्वाभ्यामेवास्मिंल्लोके प्र
त्यतिष्ठंस्तस्मादेतां बृहतीत्याचक्षतेश्नुते यद्यत्कामयते यऽ एवं वे
द ॥२४॥ प्रजापतियज्ञो वाऽएष यद्द्वादशाहः प्रजापतिर्वाऽएतेना
ग्रेऽयजत द्वादशाहेन सोऽब्रवीदृतूंश्च मासांश्च याजयत मा द्वाद
शाहेनेति तं दीक्षयित्वानपक्रममगमयित्वाब्रुवं देहि नु नोऽथ त्वा

ब्रा॰ च॰

२९।

याजयिष्याम इति तेभ्य इषमूर्जं प्रायच्छत्सैषोर्गृतुषु च मासेषु च
निहिता दद्दतं वै ते तं मयाजयंस्तस्माद्दद्याज्यः प्रति गृह्य तावै ते त
मयाजयंस्तस्मात्प्रतिगृह्य तौ याज्यमुभये राध्नुवंति यः एवं विद्वांस्ता
यजते च याजयति च ते वाऽ इम ऋतवश्च मासाश्च गुरव इवामन्यंत ते द्वा
दशाहे प्रतिगृह्य ते ब्रुवन्प्रजापतिं याजय नो द्वादशाहेनेति स तथे त्य
ब्रवीत्तैवै दीक्षध्वमिति ते पूर्वपक्षाः पूर्वे दीक्षंत ते ते पाप्मानमपाहत तस्मात्ते
दिवेव दिवेव ह्यपहतपाप्मानो परपक्षा अपरे दीक्षंत ते तेन तरां पाप्मानम
पाहत तस्मात्तेतमऽ इव तमऽ इव ह्यनपहतपाप्मानस्तस्मादेवं विद्वां दीक्षमा २९
णेषु पूर्वः पूर्वऽ एव दिदीक्षिषेतापपाप्मानं हते यऽ एवं वेद स्त याऽजयं प्रजा

पतिः संवत्सर ऋतुषु च मासेषु च प्रत्यतिष्ठत्ते वाऽ इम ऋतवश्च मासा त
श्च प्रजापतावेव संवत्सरे प्रत्यतिष्ठंस्तऽ एते न्योन्यस्मिन्प्रतिष्ठिताऽ एवं

दा

ह वा यस ऋत्विजि प्रतितिष्ठति यो द्वादशाहेन यजते तस्मात्कुर्न पुरुषो पापु
याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति ज्येष्ठयज्ञो वाऽ एष यद्द्वादशा
हः स वै देवानां ज्येष्ठो यऽ एतेनाग्रे यजत श्रेष्ठयज्ञो वाऽ एष यद्द्वादशाहः
स वै देवानां श्रेष्ठो यऽ एतेनाग्रे यजत ज्येष्ठश्रेष्ठो यजेत कल्याणी हस्मा
भवति न पापः पुरुषो याज्यो द्वादशाहेन नेदयं मयि प्रतितिष्ठादिति द्रु
यवै देवा ज्यैष्ठ्याय श्रैष्ठ्याय नातिष्ठंत सो ब्रवीद्बृहस्पतिं याजय मा द्वा

ब्रा॰ च॰
॥३०॥
प२

दशाहे नेति तमयाजयत्ततो वै तस्मै दिवाज्यैष्ठ्याय श्रैष्ठ्याया तिष्ठंत
तिष्ठंते स्मै स्वाज्यैष्ठ्याय श्रैष्ठ्याय समस्मिन्स्वा श्रेष्ठतायां जानन्ते यऽएवं वे
दोर्ध्वो वै प्रथमस्याहस्तिर्यङ्मध्यमो वाङ् तमस्य पूर्ध्वः प्रथमस्याह
स्तस्मादसावूर्ध्वः प्रममि रूर्ध्वऽउ दीप्यते ऊर्ध्वा ह्येतस्य दिग्यत्तिर्यं
ङ्मध्यमस्तस्मादयं वा युस्तिर्यङ् पवते तिर्यञ्ची रापो वहंति तिरश्चीह्येतस्य
दिग्यदर्वाङ् तमस्तस्मादसावर्वा ङ् पच्यवाङ् वर्षत्यर्वाञ्चि नक्षत्रा
ण्यर्वाचीह्येतस्य दिक्सम्यंचो वाऽइमे लोकाः सम्यंचऽएते त्र्यहाः सम्यं
चो स्माऽइमे लोकाः श्रियै दीप्यंतियऽएवं वेद॥२५॥ दीक्षावै देवेभ्यो

३०
राम

भ्या

पाक्रामत्तां वासंति काभ्यां मासाभ्यामन्वयुंजतता वासंतिकाभ्यां
मासाभ्यां नोदाप्नुवस्तां ग्रैष्माभ्यां तां वार्षिकाभ्यां तां शारदाभ्यां तां हे
मंतिकाभ्यां मासाभ्यामन्वयुंजत तां हेमंतिकाभ्यां मासाभ्यां नोदा
प्नुवंस्तां शैशिराभ्यां मासाभ्या मन्वयुंजत तां शैशिराभ्यां मा
साभ्यामाप्नुवन्नाप्नोति यमीप्सति नैनं द्विषन्नाप्नोति यऽएवं वेद
तस्माद्य एतासु त्रियादीक्षोपनमेदेतयोरेव शैशिरयोर्मासयोरागतयोर्दी
क्षेत साक्षाद्देवतं दीक्षाप्रामागतायां दीक्षते प्रत्यक्षाद्दीक्षां

परिगृह्णातितस्मादेतयोरेवशीर्ष्णोःशिरस्योर्मांसयोरागतयोर्यैचैव
ग्राम्याःपशवोयेचारण्याअणिमाणमेवतत्पुरुषिमाणंनियंति
दीक्षारूपमेवतदुपनिप्लवतेसपुरस्ताद्दीक्षायाःप्राजापत्यंप
शुमालभतेतस्यस[illegible]दशसामिधेनीरनुब्रूयात्सप्तदशोवै
प्रजापतिःप्रजातेराप्त्यैतस्याप्रियोजामद[illegible]ग्न्योभवं
तितदाहुर्यदन्येषुपशुषुयथऽऋष्याप्रियोभवंत्यथकस्मा
दस्मिन्सर्वेषांजामदग्न्यऽएवेतिसर्वरूपावैजामदग्न्यःसर्व

समृद्धाःसर्वरूपएषपशुःसर्वसमृद्धास्तद्यज्जामद[illegible]ग्न्योभवं
तिसर्वरूपतायैसर्वसमृद्ध्यैतस्यवायव्यःपशुःपु[illegible]रोडाशोभ
वतितदाहुर्यदन्यदेवत्यऽउतपशुर्भवत्यथकस्माद्वायव्यःपशुः
पुरोडाशः[illegible]क्रियतऽइतिप्रजापतिर्वैयज्ञोयज्ञस्यापात
यामतायाऽइतिब्रूयाद्यद्वावायव्यस्तेनप्रजापतेर्नैतिवायुर्ह्ये
वप्रजापतिस्तदुक्तमृषिणापवमानःप्रजापतिरितिसत्रमुच्चै
स्तेन्युप्याग्नीन्यजेरंत्सर्वेदीक्षेरंत्सर्वेसुनुयुर्वसंतमभ्युत्तदव

श्छंदांस्यगमयान्स वीन्कामान

ब्रा·च·

॥३२॥

स्यात्पूर्वै वसंतो इषमेव तदूर्जमभ्युदवस्यति॥२८॥छं
दांसि वा अन्योन्यस्यायतनमभ्यध्यायन्गायत्री त्रिष्टुभश्च
जगत्यै चायतनमभ्यध्यायत्त्रिष्टुब्गायत्र्यै च जगत्यै च जगती गा
यत्र्यै च त्रिष्टुभश्च ततो वा एतं प्रजापतिर्व्यूढछंदसं द्वादशाह
मपश्यत्तमाहरत्तेनायजत तेन स सर्वान्कामानगच्छति य ए
वं वेद छंदांसि व्यूहत्ययातयामतायै छंदांस्येव व्यूहति तद्यथा दे
श्चैर्वा नडुद्भिर्वान्यैरन्यैरश्रांततरैरश्रांततरैरुपविमोकं यात्येवमे
वैतच्छंदोभिरन्यैरन्यैरश्रांततरैरश्रांततरैरुपविमोकं स्वर्गं लोकं

राम

॥३३॥

पूतिप छंदांसि व्यूहती मौ वै लोको सहास्तां तौ व्यैतां नावर्षन्न समतप
त्ते पंचजना न समजानत्त तौ देवाः समनयं स्तौ यंतावब्रूतां देव विवा स
हं व्यवहेतां रथन्तरेणैवेयममूं जिन्वति बृहतासाविमां नौधसेनैवेय
ममूं जिन्वति श्यैतेनासाविमां धूमेनैवेयममूं जिन्वति वृष्ट्यासा
विमां देवयजनमेवेयममुष्यामदधात्पशूनसावस्यामित द्वाऽइ
यममुष्यां देवयजनमदधात् यदेतच्चंद्रमसि कृष्णमिव॥तस्मादा
पूर्यमाणपक्षे पयजंत एतदेवोपेप्सं तऊषानसावस्यां तद्वा

पितुरः कावषेयाः उवाचोषः पोषोजनमे जयकेतितस्माध्याये
तर्हि गथंमीमांसमानाः एछंति संतितत्रीणाः ३ इति॥ ॐ षो हि पोषो सोवैलोकं
इमंल्लोकमभिपर्यावर्तत ततोवैद्यावापृथिवी अभवतां नद्यावा नं तरिक्षा
दूमि॥२७॥ ॥बृहच्चवा इदमग्रेरथंतरं चास्तां वाक्चवैतन्मनश्चास्तां वा
ग्वैरथंतरंमनोबृहत्तद्बृहत्पूर्वंससृजानं रथंतरमत्यमन्यत तद्रथंत
रंगर्भमधत्त तद्वैरूपमसृजत ते द्वे भूत्वा रथंतरं च वैरूपं च बृहदत्यम
न्येतां तद्बृहद्गर्भमधत्त तद्वैराजमसृजत ते द्वे भूत्वा बृहच्च वैराजं च रथं
तरं च वैरूपं चात्यमन्येतां तद्रथंतरं गर्भमधत्त तच्छाकरमसृ

मृ ३
राम

जत तानि त्रीणि भूत्वा रथंतरं च वैरूपं च शाकरं च बृहच्च वैराजं चात्यमन्यं
तत तद्बृहद्गर्भमधत्त तद्रैवतमसृजत तानि त्रीण्यन्यानि त्रीण्यन्यानि षड्
एष्णान्यासंस्तानि ह तर्हि त्रीणि छंदांसि षड् एष्णानि नोदापुर्वं सा गाय
त्री गर्भमधत्त सानुष्टुभमसृजत । त्रिष्टुब्गर्भमधत्त सा पङ्क्तिमसृजत
जगती गर्भमधत्त सातिछंदसमसृजत तानि त्रीण्यन्यानि त्रीण्यन्या
नि षट् छंदांस्यासन् षड् एष्णानि तानि तथा कल्पंत कल्पते यज्ञो
पितस्यै जनतायै कल्पते य एवमेतां छंदसां चैष्णानां च क्लृप्तिं वि
द्वान्दीक्षते दीक्षते॥२९॥ इति चतुर्थपंचिका पां चतुर्थोऽध्यायः॥

ओं॥ अग्निर्वै देवता प्रथममहर्वहति त्रिवृत्स्तोमो रथंतरं साम गायत्री छंदो यथादेवतमेनेन यथास्तोमं यथासाम यथाछंदसं राध्नोति य एवं वेद पंच ॰ ॰ एतिन वैति चत ॰ प्रथमस्याह्नो रूपं यद्युक्तवद्रथवद्यदाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोको ऽभ्युदितो यद्रथंतरं यद्गायत्रं यत्करिष्यदेतानि वै प्रथमस्याह्नो रूपाण्युपप्रयंतो अध्वरमिति प्रथमस्याह्न ॰ आज्यं भवति प्रीति प्रथमे ऽहनि प्रथमस्याह्नो रूपं वायवायाहि दर्शतेति प्रउगमिति प्रथमे ऽहनि प्रथमस्याह्नो रूपमा त्वा रथं यथोतय इ

दं वसो सुतमंधइति मरुत्वतीयस्य प्रतिपदनुचरौ रथवच्चपिबवच्च प्रथमे ऽहनि प्रथमस्याह्नो रूपमिंद्र नेदीय एदिहीतींद्र निहवः प्रगाथः प्रथमे पदे देवता निरुच्यते प्रथमे ऽहनि प्रथमस्याह्नो रूपं प्रैतु ब्रह्मणस्प ॰ तिरिति ब्राह्मणस्पत्यः प्रेति प्रथमे ऽहनि प्रथमस्याह्नो रूपमग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः प्रथमेषु पदेषु देवता निरुच्यंते प्रथमे ऽहनि प्रथमस्याह्नो रूपं प्र व इंद्राय बृहत इति मरुत्वतीयः प्रगाथः प्रेति

ब्रा·च·

३५

प्रथमे ह निप्रथमस्यान्हो रूपमायाहि द्रो वसः उप न इति सूक्तमिति प्रथमे ह निप्रथमस्यान्हो रूपमभित्वा शूर नो नुमो भिच्यो पूर्वपीतय इति रथंतरं पृष्ठं भवति राथंतरे ह निप्रथमे ह निप्रथमस्यान्हो रूपं द्रावानः [illegible] पुरुतमं पुराषाळिति धाय्या वृत्रहेंद्रो नो मान्य प्राद्दत्येति प्रथमे ह निप्रथमस्यान्हो रूपं पिबा सुतस्य र[illegible]तिनः इति सोम प्रगाथः पिबवान् प्रथमे ह निप्रथमस्यान्हो रूपं त्यमूषु वाजिनं देवजूतमिति तार्क्ष्यं पुरस्तात्सूक्तस्य शंसति स्व[illegible] स्त्ययनं वै तार्क्ष्यः स्वस्तितायै स्वस्त्ययनमेवैतत्कुरुते

३५

स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद ॥ २९ ॥ ॥ आ न इंद्रो दूरादा न आसादिति सूक्तमिति प्रथमे ह निप्रथमस्यान्हो रूपं संपातो भवतो निष्केवल्यमरुत्वतीययोर्निविद्धाने वामदेवो वा इमाल्लोकानपश्यत्तान्संपातैः समपतद्यत्संपातैः समपतत्संपातानां संपातत्वं तद्यत्संपातौ प्रथमे ह निशंसति स्वर्गस्य लोकस्य समष्ट्यै संपत्त्यै संगत्यै तत्सवितुर्वृणीमहे द्या नो देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे ह निप्रथमे ह निप्रथमस्यान्हो रूपं युंजते मन उत युंजते धिय इति सावित्रं युक्तवत्प्रथमे ह निप्रथमस्यान्हो रूपं

ब्रा॰ च॰

३६

प्र द्यावा यज्ञैः पृथिवी ऋतावृधेति द्यावापृथिवीयं प्रतिप्रथमेह
नि प्रथमस्याह्नो रूपं मिहेह वो मनसा बंधुता नरः इत्यार्भवं यद्वाए
ति चेत्प्रति चं तत्प्रथमस्याह्नो रूपं तद्धत्येति सर्वमभो विष्यस्ते
षं नैवास्माल्लोकाद्यजमानोऽ इति तद्यदिहेह वो मनसा बंधुता न
रः इत्यार्भवं प्रथमेहनि शंसत्ययं वै लोकः इह हास्मिन्नेव नास्त्लो
के रमयति देवान्हुवे बृहच्छ्रवसः स्वस्तयः इति वैश्वदेवं प्रथमे पदे देव
ता निरुच्यंते प्रथमेहनि प्रथमस्याह्नो रूपं महांतं वा एते ध्वानमे
ष्यंतो भवंति ये संवत्सरं वा द्वादशाहं वाऽसते तं देवान्हुवे बृहच्छ्रव

ष

द

३६

द ३

स्व

सः स्तयः इति वैश्वदेवं प्रथमेहनि शंसति स्वस्तितायै स्वस्त्ययनमे
व तत्कुरुते स्वस्ति संवत्सरस्य पारमश्नुते य एवं वेद येषां चैवं विद्वा
नेतुर्होता देवान्हुवे बृहच्छ्रवसः स्वस्तयः इति वैश्वदेवं प्रथमेहनि शंस
ति वैश्वानराय पृथुपाज[illegible] से विपः इति त्याग्निमारुतस्य प्रतिपत्प्रथ
मे [illegible] पदे देवता निरुच्यंते प्रथमेहनि प्रथमस्याह्नो रूपं प्रत्वक्षसः प्र
तवसो विरप्शिनः इति मारुतं प्रतिप्रथमेहनि प्रथमस्याह्नो रूपं जा
तवेदसे सुनवाम सोममिति जातवेदस्यां पुरस्तात्सूक्तस्य शंसति स्व
स्त्ययनं वै जातवेदस्याः स्वस्तितायै स्वस्त्ययनमेव तत्कुरुते स्वस्ति सं

वत्सरस्यापारमश्नुते यऽएवं वेद प्रतव्यसीं नव्यसीं धीतिमग्न-
यऽइति जातवेदस्यं प्रतिपत्प्रथमेहनि प्रथमस्याह्नो रूपं समानमाग्निमा-
रुतं भवति यच्चाग्निष्टोमे यद्द्वेप ह्नेसमाने क्रियते तस्यै डाऽअनु समनं-
ति तस्मात्समानमाग्निमारुतं भवति ॥ ३० ॥ ॥ इंद्रो वै देवता द्वितीयमह-
र्वहति पंचदशस्तोमो बृहत्साम त्रिष्टुप्छंदो यथा देवतमेनेनै यथा-
स्तोमं यथा सामं यथा छंदसं राध्नोति यऽएवं वेद यदु नेति न प्रेति यत्त-
स्थितं तद्द्वितीयस्याह्नो रूपं यदूर्ध्ववद्यत्प्रतिवद्य[illegible]दंतर्वद्यद्वृषण्व-
द्यद्वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदंतरिक्षमभ्युदितं यद्बा-

र्हतं यत्त्रैष्टुभं यत्कुर्वद् एतानि वै द्वितीयस्याह्नो रूपाण्यग्निं दूतं वृणी-
महेऽइति द्वितीयस्याह्नऽआज्यं भवति कुर्वद्द्वितीयेहनि द्वितीयस्या-
ह्नो रूपं वायो ये ते सहस्रिणऽइति प्रऽउगं सुतः सोम ऋतावृधेति वृध-
न्वद्द्वितीयेहनि द्वितीयस्याह्नो रूपं विश्वानरस्य वस्पतिमिंद्र इत्सोम-
पाऽएकऽइति मरुत्वतीयस्य प्रतिपदनुच रौ वृधन्वंतौ तद्वै [illegible] च्च
द्वितीयेहनि द्वितीयस्याह्नो रूपमिंद्र नेदीयऽएदिहीत्यच्युतः प्रगाथऽ
उत्तिष्ठ ब्रह्मणस्पतेऽइति ब्राह्मणस्पत्यऽऊर्ध्ववान् द्वितीयेहनि द्वितीय-
स्याह्नो रूपमग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यपऽइति धाय्याऽअच्यु-

श्री॰च॰

३८॥

तो॰ब्रह्म दिं द्राय गायतेति मरुत्वती यः प्रगाथो येनज्योतिरजनयन्नृतावृधः इति वृधन्वांद्दिती येहनि द्दिती यस्यान्हो रूपमिंद्र सोमं सोमपते पिबेममिति सू॰ त्तं सजोषा रुद्रैः स्तृप दावृषस्वेति वृषण्वद्दिती येहनि द्दिती यस्यान्हो रूपं त्वाममिद्धि हवामहे त्वं ह्येहि चेरवः इति बृहत्पृष्ठं भवति बार्हतेहनि द्दिती येहनि द्दिती यस्यान्हो रूपं यद्दावानेति धाय्याच्युतो भयं शृणवेच्च न इति साम प्रगाथो [illegible] यच्चेदमद्य यदु च ह्य आसीदिति बार्हतेहनि द्दिती येहनि द्दिती यस्यान्हो रूपं त्यमू षु वाजिनं देवजूतमिति तार्क्ष्यो॥ ३८

च्युतः॥ ३१॥ ॥ यातउ तिरवमायापरमेति सू॰ त्तं जहि वृष्ण्या॥ निकृणुही

परा चः इति वृषण्वद्दिती येहनि द्दिती यस्यान्हो रूपं विश्वो देवस्य नेतुस्तत्सवितुर्वरेण्यमा विश्वदेवं सत्पतिमिति [illegible] वैश्वदेवस्य प्रातिपद् नुचरौ बार्हतेहनि द्दिती येहनि द्दिती यस्यान्हो रूपमुदु ष्य देवः सविता हिरण्ययेति सावित्रं मूर्ध्वव द्दिती येहनि द्दिती यस्यान्हो रूपं ते हि द्यावापृथिवी विश्व

रा॰यल

शंभुवेति द्यावापृथिवीयं स्कज न्मनी धिषणे अंतर्दूस्यं तर्व द्दिती येहनि द्दितीयस्यान्हो रूपं तक्षन्रथं स्त [illegible] वृतं विद्म नापसः इत्यार्भवं तक्षन्हरीः इंद्र वाहावृषण्वसू इति वृषण्वद्दिती येहनि द्दिती यस्यान्हो रूपं यज्ञस्य वो रथ्यं विश्पतिं विशामिति वैश्वदेवं वृषाकेतु [illegible] यजतो द्यामशायतेति वृष[illegible]ण्व

द्वितीयेहनिद्वितीयस्याह्नोरूपं तदुच्यायां तमंगिरसो वै स्वर्गायलोकायस
त्रमासत ते ह स्म द्वितीयं द्वितीयमेवाहरागत्य मुह्यंति तान्वा एतच्छ्रायंतो
मानयो द्वितीयेहनि सूक्तमशंसयत्ततो वै ते [illegible] प्रयज्ञमजानन्प्रस्व
र्गंलोकं तद्यद्वेतत्सूक्तं द्वितीयेहनि शंसति यज्ञस्य प्रज्ञात्यै स्वर्गस्य लोक
स्यानु [illegible] ख्यात्यै पृक्षस्य वृष्णो अरुषस्य नू सह इत्याग्निमारुतस्य प्रतिप
द्वृषण्वद्द्वितीयेहनि द्वितीयस्याह्नोरूपं वृष्णे शर्धाय सुमखाय वेधस
इति मारुतं वृषण्वद्द्वितीयेहनि द्वितीयस्याह्नोरूपं जातवेदसे सुनवाम सो
ममिति जातवेदस्याच्युता यज्ञेन वर्धते मिति जातवेदस्यं वृधन्वद्द्वितीयेहनि द्वितीयस्याह्नोरूपं महोरूपं ॥३२॥ ॥ छ॥ छ॥ छ॥ छ॥ छ॥

जातवेदस

इति चतुर्थपंचिकायां पंचमोध्यायः॥ इति चतुर्थपंचिका समाप्तः॥ छ॥
श्रीकृष्णार्पणमस्तु॥ छ॥ छ॥ शाके सं १७१२ विरोधिकृतनामसंवत्सरे
भाद्रपदमासे शुक्लपक्षे त्रयोदस्यां तिथौ अद्य मंदवासरे तद्दिनी इ
दं पुस्तकं समाप्तं॥ छ॥ छ॥ श्रीगजाननप्रसंनः॥ छ॥ छ॥ छ॥ छ॥
श्रीलक्ष्मीनृसिंहप्रसन्न॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥ छ॥

श्री॰ चु॰
४॰

॥इति चतुर्थ पंचिका समाप्तः॥
॥ श्रीगणेशाय नमः॥ गजानन॥

राम
४॰

॥॥श्री॥अथ ब्राह्मण पंचम पंचिका प्रारंभः॥

श्रा॰ पं॰
॥१॥

श्रीगणेशायनमः॥श्रीगुरुभ्योनमः॥हरिः ॐम्॥विश्वेवैदेवादेवतास्तृतीयमहर्व
हंतिसप्तदशस्तोमोवैरूपंसामजगतीछंदोयथादेवतमेनेनयथास्तोमंयथासा
मयथाछंदसंराध्नोतियऽएवंवेदयद्वैसमानोदर्कंस्तृतीयस्याह्नोरूपंयदश्ववं
यदंतवद्यत्पुनरावृत्तंयत्पुनर्निनृत्तंयद्रतवद्यत्पर्यस्तवद्यत्त्रिवद्यदंतरूपंयदु
त्तमेपदेदेवतानिरुच्यतेयदसौलोकोभ्युदितोयद्द्विरूपंयज्जागतंयत्पारुच्छेपमेता
निवैतृतीयस्याह्नोरूपाणियुक्ष्वाहिदेवहूतमाँअश्वाँअग्नेरथीरिवेति
तृतीयस्याह्नऽआज्यंभवतिदेवावैतृतीयेनाह्नास्वर्गंलोकमायंस्तानसुरा
रक्षांस्यन्ववारयंस्तेविरूपाभवतविरूपाभवतेतिभवंतऽआयंस्तेयद्वि
रूपाभवतविरूपाभवतेतिभवंतऽआयंस्तद्वैरूपंसामाभवत्तद्वैरूपस्य

राम
॥१॥

वैरूपत्वंविरूपःपाप्मनाभूत्वापाप्मानमपहतेयऽएवंवेदतान्हस्मान्वेवाग
च्छंतिसमेवसृज्यंतेतानश्वाभूत्वापद्भिरपाघ्नतयदश्वाभूत्वापद्भिरपाघ्न
ततदश्वानामश्वत्वमश्नुतेयद्यत्कामयतेयऽएवंवेदतस्मादश्वःपशूनां
जविष्ठस्तस्मादश्वःप्रत्यङ्पदाहिनस्त्यपपाप्मानंहतेयऽएवंवेदतस्मा
देतदश्ववदाज्यंभवतितृतीयेहनितृतीयस्याह्नोरूपंवायवायाहिवी
तयेवायोयाहिशिवादिवऽइंद्रश्चवायवेषांसुतानामामित्रेवरुणेव
यमश्विनावेहगच्छतमायाह्यद्रिभिःसुतंसजूर्विश्वेभिर्देवेभिरुत
नःप्रियाप्रियास्वि[illegible]त्वोक्थ्याहंप्रऽउगंसमानोदर्कंतृतीयेहनितृती
यस्याह्नोरूपंतंत्वमिंद्राधसेमहेत्वयऽइंद्रस्यसोमाऽइतिमरुत्वतीय

ये

आ॰ पं॰ ॥२॥

स्य प्रति पद्दनुचरौ निनर्त्तवान्त्रिवर्त्त तीयेहनि तृतीयस्याह्नो रूपमिंद्रनेदीयऽए
दिहीत्यच्युतः प्रगाथः प्रनूनं ब्रह्मणस्पतिरिति ब्राह्मणस्पत्यो निनर्त्त
वांस्तृतीये हनि तृतीयस्याह्नो रूपमग्निर्नेता त्वंसोम क्रतुभिः पिन्वंत्यप
ऽइति धाय्याऽच्युतानकिः सुदासो रथं पर्यासनरीरमदिति मरुत्वतीयः
प्रगाथः पर्यस्तवांस्तृतीये हनि तृतीयस्याह्नो रूपंत्र्यर्यमा मनुषो देव
ताता सूक्तं त्रिवर्त्त तीयेहनि तृतीयस्याह्नो रूपं यद्याव ऽ इंद्र ते शतं य

ति

दिंद्र यावतस्त्वमिति वैरूपं पृष्ठं भवति राथंतरे हनि तृतीये हनि तृ
तीयस्याह्नो रूपं यद्वावानेति धाय्याच्युता भित्वा शूर नोनुम ऽ इति रथं
तरस्य योनि मनु निवर्त्तयति राथंतरं ह्येतदहर् यैतने नेंद्र त्रिधातु

राम ॥२॥

शरणमिति साम प्रगाथास्त्रिवांस्तृतीयेहनि तृतीयस्याह्नो रूपं त्यमूषुवा
जिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥ १ ॥ योजा तऽएव प्रथमो मनस्वानिति
सूक्तं समानोदर्कं तृतीये हनि तृतीयस्याह्नो रूपं तदु सजनीयमेतद्धा ऽ इंद्र
स्येंद्रियं यत्सजनीयमेतस्मिन्वै शस्यमान ऽ इंद्रमिंद्रियमाविशति तद्धाप्या
ऽऽ श्छंदो मास्तृतीये हनि बल्कृ चा ऽ इंद्रस्येंद्रियं शंसंतीति तदु गात्सं मदमेते
नवै गृत्समद ऽ इंद्रस्य प्रियं धामोपागच्छत्स परमं लोकमजयदुपेंद्रस्य प्रि
यं धाम गच्छति जयति परमं लोकं यऽएवं वेद तत्सवितुर्वृणीमहे घानो
देव सवितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे हनि तृतीये हनि
तृतीयस्याह्नो रूपं तद्देवस्य सवितुर्वार्यं महदिति सावित्रं मंतो वै महद्

श्री·पं·
॥२॥

तस्तृतीयमहस्तृतीयेहनि तृतीयस्याह्नो रूपं घृतेन द्यावापृथिवी ऽअभीवृते ऽइ
ति द्यावापृथिवीयं घृतश्रियाघृतपृचा घृतावृधेति पुनरावृत्तं पुनर्निनृत्तं तृतीये
हनि तृतीयस्याह्नो रूपं मनश्वोजातो ऽअनभीशु रुक्थ्य ऽइत्यार्भवं रथस्त्रिच
क्र ऽइति त्रिवत्तृतीये हनि तृतीयस्याह्नो रूपं परावतो दिधिमंत ऽआप्यमिति वै ×श्वे
श्वदेवं मंतो वै परावतो तस्तृतीयमहस्तृतीये हनि तृतीयस्याह्नो रूपं नदुगाय
मे तेनं वै गयः प्लुतो विश्वेषां देवानां प्रियं धामोपागच्छत्स परमं लोकमजय
दुपविश्वेषां देवानां प्रियं धाम गच्छति जयति परमं लोकं य ऽएवं वेद वैश्वान
राय धिषणामृतावृध ऽइत्याग्निमारुतस्य प्रतिपद् तो वै धिषणां तस्तृतीय
महस्तृतीये हनि तृतीयस्याह्नो रूपं धारावरा मरुतो धृष्ण्वोजस ऽइति मा
रुतं बद्धभिव्याहृत्यमंतो वै बद्धं तस्तृतीयमहस्तृतीये हनि तृतीयस्याह्नो

राम
॥२॥

स्त्वं जातवेदसे सुनवाम सोममिति जातवेदस्याच्युतातमग्ने प्रथमो ऽअंगिरा ऽ
ऋषिरिति जातवेदस्यं पुरस्तादुदर्कं तृतीये हनि तृतीयस्याह्नो रूपं त्वं त्वमित्यु
त्तरं त्र्यहमभिवदति संतत्यै संततैस्त्र्यहैरव्यवछिन्नैर्यंति य ऽएवं विद्वांसो यंति॥
॥२॥ आप्यं ते वै स्तोमा ऽआप्यं छंदांसि तृतीये हन्ये तदेव तत ऽउच्छिष्यं ते वाग
त्येवतदेतदक्षरं त्र्यक्षरं वागिति एकमक्षरमक्षरमिति त्र्यक्षरं स ऽएवैष ऽउत्तरस्त्र्य
होवागेकं गौरेकं द्यौरेकं ततो वै वागेव चतुर्थमहर्वहति तद्यच्चतुर्थमहर्न्यूंखयं
त्येतदेव तदक्षरमभ्यायछंत्येतदूर्ध्वंयत्येतस्त्र्यविभावयिषंति चतुर्थस्याह्नऽ ऽउ
धत्या ऽअन्नं वै न्यूंखो यदेल्व वा ऽअभिगेष्णाश्वरं त्यथान्नाद्यं प्रजायते न घच्चतु
र्थमहर्न्यूंखयंत्यन्नमेव तत्प्रजनयंत्यन्नाद्यस्य प्रजात्यै तस्माच्चतुर्थमहर्जातव
द्भवति चतुरक्षरेण न्यूंखयेदित्याहुश्चतुष्पादा वै पशवः पशूनामवरुध्यै त्र्यक्ष

ऐ॰ पं॰
॥४॥

रेण न्यूंखयेदित्याहुस्त्रयो वा ऽइमे त्रिवृतो लोकाः एषामेव लोकानामभिजित्या ऽ
एकाक्षरेण न्यूंखयेदिति ह स्माह लांगलायनो ब्रह्मा मौद्गल्य ऽएकाक्षरा
वै वागेषैवाव सा प्रतिन्यूंखं न्यूंखयति य ऽएकाक्षरेण न्यूंखयतीति द्व्यक्षरे
णैव न्यूंखयेत्प्रतिष्ठाया ऽएव द्विप्रतिष्ठो वै पुरुषश्चतुष्पादाः पशवो यज
मानमेवैनद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति तस्माद्व्यक्षरेणैव न्यूं
खयेन्मुखतः प्रातरनुवाके न्यूंखयति मुखतो वै प्रजा ऽअन्नमदंति मुखत
ऽएव तदन्नाद्यस्य यजमानं दधाति मध्यत ऽआज्ये न्यूंखयति मध्यतो वै प्रजा
ऽअन्नं धिनोति मध्यत ऽएव तदन्नाद्यस्य यजमानं दधाति यदुभयतो न्यूंखं
परिगृह्णाति सवनाभ्यामन्नाद्यस्य परिगृहीत्यै ॥ ३ ॥ वाग्वै देवता चतुर्थं
महर्वहत्येकविंशस्तोमो वैराजं सामानुष्टुप्छंदो यथादेवतमेनेन यथास्तोमं

× मुखतो मध्यंदिने न्यूंखयति मुखतो वै प्रजा ऽअन्नमदंति मुखत ऽएव तदन्ना
द्यस्य यजमानं दधाति × ३

राम
॥४॥

यथासाम यथाछंदसं राध्नोति य ऽएवं वेद यद्वा ऽएति च प्रेति च तच्चतुर्थस्याह्नो
रूपं यद्ध्येव प्रथममहस्तदेतत्पुनर्यच्चतुर्थं यद्युक्तवद्यद्रथवद्यदाशुमद्यत्पिब
वद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोको ऽभ्युदितो यज्जातवद्यद्ध्रुववद्यच्छु
क्रवद्यद्वाचो रूपं यद्वैमदं यद्विरिफितं यद्विच्छंदा यदूनातिरिक्तं यद्वैराजं यदा
नुष्टुभं यत्करिष्यद्यत्प्रथमस्याह्नो रूपमेतानि वै चतुर्थस्याह्नो रूपाण्यग्निं न

भि

स्ववृक्तिंरिति चतुर्थस्याह्न ऽआज्यं भवति वैमदं विरिफितं विरिफितस्य ऽर्के
वैश्चतुर्थेऽहनि चतुर्थस्याह्नो रूपमष्टर्चं पांक्तं पांक्तो यज्ञः पांक्ताः पशवः पशू
नामवरुध्यै ता ऽउ द्वादश जगत्यो जगत्प्रातःसवन ऽएष त्र्यहस्तेन चतुर्थस्याह्नो रू
पं ता ऽउ पंचदशानुष्टुभ ऽआनुष्टुभं ह्येतदहस्तेन चतुर्थस्याह्नो रूपं ता ऽउ विंश
तिर्गायत्र्यः पुनःप्रायणीयं ह्येतदहस्तेन चतुर्थस्याह्नो रूपं तदेतदस्तुतमशा

ग्रा·पं· ॥५॥

स्तं मयातयाम सूक्तं यज्ञऽ एव साक्षात्तद्यदेतच्चतुर्थस्याह्नऽ आज्यं भवति य
ज्ञादेव तद्यज्ञं तन्वते वाचमेव तत्पुनरुपयंति संतत्यै संतत्यै स्त्र्यहैरव्यवछिने त
र्यंति यऽ एवं विद्वांसो यंति वायो शुक्रोऽ अयामि ते विहि होत्राऽ अवीता वायो
शातं हरीणामिंद्रश्च वायवेषां सोमानां मा चिकितान सुक्रतूऽ आ नो विश्वा
भिरूतिभिस्त्यमु वोऽ अप्रहणमप त्यं वृजिनं रिपुमं बितमेन दूतमऽ इत्या
नुष्टुभं प्रउगमिति चप्रेति च शुक्रवच्च चतुर्थेहनि चतुर्थस्याह्नो रूपं तं त्वा
यज्ञेभिरीमहऽ इति मरुत्वतीयस्य प्रतिपदीमहऽ इत्यभ्यात्याम्यमिवैतदह
स्तेन चतुर्थस्याह्नो रूपमिदं वसो सुतमंधऽ इंद्र नेदीयऽ एदिहि प्रैतु ब्रह्मणस
तिराग्निर्नेतारं सोम क्रतुभिः पिन्वंत्यपः प्रवऽ इंद्राय वृहतऽ इति प्रथमेना राम ॥५॥
ह्ना समानऽ आतानश्चतुर्थेहनि चतुर्थस्याह्नो रूपं श्रुधी हवमिंद्र मा रिष

ण्यऽ इति सूक्तं हववच्चतुर्थेहनि चतुर्थस्याह्नो रूपं मरुत्वाँ इंद्र वृषभो रणाये
ति सूक्तमुग्रं सहोदामिह तं हुवेमेति हववच्चतुर्थेहनि चतुर्थस्याह्नो रूपं तदु
त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवतेऽ इममनु
मायिनं हुवऽ इति पर्यासो हववांश्चतुर्थेहनि चतुर्थस्याह्नो रूपं ताऽ उ गायत्र्यो
गायत्र्यो वाऽ एतस्य त्र्यहस्य मध्यंदिनं वहंति तद्वैतच्छंदो वहति यस्मिन्नि
विद्धीयते तस्माद्गायत्रीषु निविदं दधाति पिबा सोममिंद्र मंदतु त्वा श्रुधी हवं
विपिपानस्याद्रेरिति वैराजं पृष्ठं भवति बार्हते हनि चतुर्थेहनि चतुर्थस्याह्नो
रूपं यद्वावानेति धाय्याच्युता त्वामिद्धि हवामहऽ इति बृहतो योनिमनु निवर्तय
ति बार्हतं ह्येतदहरायतनेनैत्वामिंद्र प्रतूर्तिष्विति सामप्रगाथो शस्तिहा जनितेति
जातवांश्चतुर्थेहनि चतुर्थस्याह्नो रूपं त्यमू षु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः॥

प्रा. पं.
॥६॥

॥४॥ कुह श्रुतः इंद्रः कस्मिन्नद्यति सूक्तं वेमदं विरिरिफितं विरिफितस्य ऋषे
श्चतुर्थेहनि चतुर्थस्याह्नो रूपं युध्मस्य ते वृषभस्य स्वराजः इति सूक्तमुग्रं ग
भीरं जनुषाभ्युग्रमिति जातवच्चतुर्थेहनि चतुर्थस्याह्नो रूपं न इत्थेत्थं भं तेन प्र
तिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते त्यमु वः सत्रासाहमि
ति पर्यासो विश्वासु गीर्ष्वायतमित्यभ्याताभ्यमिवैतदहस्तेन चतुर्थस्या
ह्नो रूपं ताऽउ गायत्र्यो गायत्र्यो वाऽएतस्य त्र्यहस्य मध्यंदिनं वहंति तद्वै
तच्छंदो वहति यस्मिन्निविधीयते तस्माद्गायत्रीषु निविदं दधाति विश्वा
न देवस्य नेतुस्तत्सवितुर्वरेण्यमा विश्वदेवं सत्पतिमिति वैश्वदेवस्य प्रतिप
दनुचरौ बाहते हनि चतुर्थे हनि चतुर्थस्याह्नो रूपमा देवो यातु सविता सु
रत्नः इति सावित्रमेति चतुर्थेहनि चतुर्थस्याह्नो रूपं प्र द्यावा यज्ञैः पृथि

राम
॥६॥

× प्रशुक्रैतु देवी मनीषेति वैश्वदेवं प्रतिपच्छुक्रवच्चतुर्थेहनि चतुर्थस्याह्नो रूपं ×३
वीनमोभिरिति द्यावापृथिवीयं प्रेति चतुर्थेहनि चतुर्थस्याह्नो रूपं प्र ऋभु
भ्यो दूतमिव वाचमिष्यऽ इत्यार्भवं प्रेति च वाचमिष्यऽ इति च चतुर्थेहनि
चतुर्थस्याह्नो रूपं ताऽउ विच्छंदसः संति द्विपदाः संति चतुष्पदास्तेन चतु
र्थस्याह्नो रूपं वैश्वानरस्य सुमतौ स्यामेत्याग्निमारुतस्य प्रतिपदितो जा
तः इति जातवच्चतुर्थेहनि चतुर्थस्याह्नो रूपं कऽ ईं व्यक्ता नरः सनीडाः इ
ति मारुतं न किर्ह्येषां जनूंषि वेदेति जातवच्चतुर्थेहनि चतुर्थस्याह्नो रू
पं ताऽउ विच्छंदसः संति द्विपदाः संति चतुष्पदास्तेन चतुर्थस्याह्नो
रूपं जातवेदसे सुनवाम सोममिति जातवेदस्याच्युतांग्निं नरो दीधिति
भिररण्योरिति जातवेदस्यं हस्तच्युती जनयंतेति जातवच्चतुर्थे हनि

ब्रा·पं·
॥७॥

चतुर्थस्याह्नो रूपं ताऽ विश्छंदसः संति विराजः संति त्रिष्टुभस्तेन चतुर्थ
स्याह्नो रूपमह्नो रूपं ॥५॥ इति प्रथमोध्यायः॥ ॥ गौर्वै देवता पंचमम
हर्वहति त्रिणवः स्तोमः शाक्वरं साम पंक्तिश्छंदो यथादेवतमेनेन यथा
स्तोमं यथासाम यथाछंदसं राध्नोति यऽएवं वेद यद्वै नेति न प्रेतीयास्थि
तं तत्पंचमस्याह्नो रूपं यध्येव द्वितीयमहस्तदेतत्पुनर्यत्संचमं यदूर्ध्व
वद्यत्प्रतिवद्यदंतर्वद्यद्वृषण्वद्यद्वृधन्वद्यन्मध्यमे पदे देवतानिरुच्य
ते यदंतरिक्षमस्युदितं यद्दुग्धवद्यदूधवद्यद्धेनुमद्यत्पृश्निमद्यन्महद्य
त्पशुरूपं यदध्यासवद्विक्षुद्राऽइव हि पशवो यज्जागतं जागता हि पश
वो यद्बार्हतं बार्हता हि पशवो यत्सांकृतं पांक्ता हि पशवो यद्वामं वाम

राम
॥७॥

हि पशवो यत्क्षविष्मत्क्षविर्हि हि पशवो यद्वपुष्मद्वपुर्हि पशवो यच्छाक्वरं
यत्सांकृतं यत्कुर्वद्यद्द्विलीयस्याह्नो रूपमेतानि वै पंचमस्याह्नो रूपाणीम
मूषुवोऽअतिथिमुषर्बुधमिति पंचमस्याह्नऽआज्यं भवति जागतमध्या
सवत्पशुरूपं पंचमेहनि पंचमस्याह्नो रूपमा नो यज्ञं दिविस्पृशमा नो वा
यो महे तनेरथेन पृथुपाजसा बहवः सूरचक्षसऽइमाऽउ वां दिविष्टयः
पिबा सुतस्य रसिनो देवं देवं वो वसे देवं देवं बृहदु गायिषे वचऽइति बा
र्हतं प्रऽउगं पंचमेहनि पंचमस्याह्नो रूपं यत्साचजन्यया विशे ति मरु
त्वतीयस्य प्रतिपत्साचजन्य ये ति पंचमेहनि पंचमस्याह्नो रूपमिंद्रऽइ
त्सोमपाऽएकऽइंद्र नेदीयऽएदिहीत्युत्तिष्ठ ब्रह्मणस्पते मिर्नेता त्वं सोम

श्रा·पं·
॥ ८ ॥

क्रतुभिः पित्र्वं त्वयो बृहद्दिंद्रा यगायतेति द्विलीयेनाक्रा समानऽआतानः
पंचमेहनि पंचमस्याह्नो रूपमवितासि सुन्वतो वृक्तबर्हिषऽइति सूक्तं
महद्वत्सीक्तं पंचपदं पंचमेहनि पंचमस्याह्नो रूपमिथ्या हि सोमऽइन्मदः
इति सूक्तं महद्वत्सीक्तं पंचपदं पंचमेहनि पंचमस्याह्नो रूपमिंद्र पिब तु
भ्यं सुतो मदायेति सूक्तं महद्वत्रैष्टुभं तेन प्रतिष्ठित पदेन सवनं दाधारा
यतनादेवैतेन न प्रच्यवते मरुत्वाँऽइंद्र मीढ्वऽइति पर्यासो नेति न प्रेति
पंचमेहनि पंचमस्याह्नो रूपं ताऽउगायत्र्यो गायत्र्यो वाऽएतस्य त्र्यह
स्य मध्यंदिनं वहंति तद्वैतच्छंदो वहति यस्मिन्निविद्धीयते तस्माद्गा
यत्रीषु निविदं दधाति ॥ ६ ॥ महानाम्नीष्वत्र स्तुवते शाक्वरेण साम्ना

राम
॥ ८ ॥

राथंतरे हनि पंचमेहनि पंचमस्याह्नो रूपमिंद्रो वाऽएताभिर्महानात्मानं
निरमिमीत तस्मान्महानाम्न्योथोऽइमे वै लोका महानाम्न्यऽइमे महांत
ऽइमान्वै लोकान्प्रजापतिः सृष्ट्वेदं सर्वमशक्नो यदिदं किंच यदिमान्लो
कान्प्रजापतिः सृष्ट्वेदं सर्वमशक्नो यदिदं किंच तच्छक्वर्योभवंस्तच्छ
क्वरीणां शक्वरीत्वं ताऽऊर्ध्वाः सीम्नोभ्यसृजत यदूर्ध्वाः सीम्नोभ्यसृजत
तत्सिमाऽअभवंस्तत्सिमानां सिमात्वं स्वादोरित्था विषूवतऽउप नो हरि
भिः सुतमिंद्र विश्वाऽअवीवृधानिस्त्वनुरूपो वृषण्वान्प्रश्निमान्मेद्वो
न्वद्धन्वान पंचमेहनि पंचमस्याह्नो रूपं यद्वावानेति धाय्याच्युताभि
त्वा शूर नोनुमऽइति रथंतरस्य योनिमनु निवर्तयति राथंतरं ह्येतदहराय

ब्रा॰पं॰
॥९॥

तनेनमोषुत्वावाघतश्चनेति साम प्रगाथोध्यासवान्यपशुरूपं पंचमेहनिपंच
मस्याह्नो रूपं त्यमूषुवाजिनं देवजूतमिति तार्क्ष्योच्युतः ॥७॥ प्रेदं ब्रह्मवृ
त्रतूर्येष्वाविथेति सूक्तं पांक्तं पंचपदं पंचमेहनि पंचमस्याह्नो रूपमिंद्रो
मदायवावृधऽइति सूक्तं महद्वत्पांक्तं पंचपदं पंचमेहनि पंचमस्याह्नो रूपं
सत्रामदासस्त्वविश्वजन्याऽइति सूक्तं मरुत्वत्त्रैष्टुभं तेन प्रतिष्ठितपदेन सव
नं दाधार यत्तनादिवे तेन नप्रच्यवते तमिंद्रं वाजयामसीति महीयोसः स वृषा
वृषभो भुवदिति पशुरूपं पंचमेहनि पंचमस्याह्नो रूपं ताऽउगायत्र्योगा
यत्र्यो वाऽएतस्य त्र्यहस्य मध्यंदिनं वहंति तदुं तच्छंदो वहति यस्मिन्नि
विधीयते तस्मात्ता यत्री षु निविदं दधाति तत्सवितुर्वृणीमहे घानोदेवस
वितरिति वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे हनि पंचमेहनि पंचमस्याह्नो

राम
॥९॥

रूपमुदुःष्यदेवः सवितादमूनाऽइति सावित्रमा दाशुषे सुवति भूरिवाम
मिति वामं पशुरूपं पंचमेहनि पंचमस्याह्नो रूपं मही द्यावापृथिवीऽइ
हज्येष्ठेऽइति द्यावापृथिवीयं रुवद्धोक्षेति पशुरूपं पंचमेहनि पंचमस्या
ह्नो रूपमृभुर्विभ्वावाजऽइंद्रोनोऽअच्छेमार्भवं वाजो वै पशवः पशुरूपं पंच
मेहनि पंचमस्याह्नो रूपं स्तुषेजनं सुव्रतं नव्यसीभिरिति वैश्वदेवमध्या
सवत्पशुरूपं पंचमेहनि पंचमस्याह्नो रूपं हविष्पांतमजरं स्वर्वि
दीत्याग्निमारुतस्य प्रतिपद्वपुर्विष्मत्पंचमेहनि पंचमस्याह्नो रूपं
वपुर्नुतच्चिकितुषे चिदस्त्विति मारुतं वपुष्मत्पंचमेहनि पंचमस्याह्नो

कि४

रूपं जातवेदसे सुनवाम सोममिति जातवेदस्याच्युताग्निर्होतामृह

श्रा॰ पं॰
॥१०॥

पतिः स्वराजेति जातवेदस्य मध्यास वसशुरूपं पंचमे हनि पंचमस्या
ह्नो रूपं ॥ ८ ॥ देवक्षेत्रं वाऽएतद्यत्षष्ठमहर्देवक्षेत्रं वाऽएतेऽआगच्छंति
ये षष्ठमहरागच्छंति न वै देवाऽअन्योन्यस्य गृहे वसंति नर्तुर्ऋतोर्गृहे वस
तीत्याहुस्तद्यथायथमृत्विजऽऋतुयाजान्यजंत्यसंप्रदायं तद्यथर्तू
तून्कल्पयंति यथायथं जनतास्तदाहुर्न तु प्रैषैः प्रेषितव्यं न तु प्रैषैर्वष
ट्कृत्यं वाग्वाऽऋतुप्रैषाऽआप्यते वै वाक् षष्ठेहनीति यद्दतुप्रैषैः प्रेष्ये
युर्यद्दतुप्रैषैर्वषट्कुर्युर्वाचमेव तदाप्तां श्रांतामृच्छेयुर्वहीं वहराविणी
मृच्छेयुर्यदृग्भिर्न प्रेष्येयुर्यदृग्भिर्न वषट्कुर्युरच्युताद्यज्ञस्यच्यवेरन्
यज्ञात्प्राणात्प्रजापतेः पशुभ्यो जिह्माऽईयुस्तस्मादृग्मेभ्यऽएवाधिप्रे

राम
॥१०॥

षितव्यमृग्भ्योधिवषट्कृत्यं तन्न वाचमाप्तां श्रांतामृच्छंति न वहीं वहरा
विणीमृच्छंति नाच्युताद्यज्ञस्यच्यवंते न यज्ञात्प्राणात्प्रजापतेः पशुभ्यो
जिह्मायंति ॥ ९ ॥ पारुच्छेपीरुपदधाति पूर्वयोः सवनयोः पुरस्तात्प्रस्थि
तयाज्यानां रोहितं वै नामैतच्छंदो यत्पारुच्छेपमेतेन वाऽइंद्रः सप्त स्वर्गां
ल्लोकानरोहद्रोहति सप्त स्वर्गाल्लोकान्यऽएवं वेद तदाहुर्यत्पंचपदाऽएव
पंचमस्याह्नो रूपं षट्पदाः षष्ठस्याथ कस्मा ~~ष्ठस्याथ कस्मा~~
त्सप्तपदाः षष्ठेहं छस्यंतऽइति षड्भिरेव पदैः षष्ठमहराप्नुवंति सप्तपाच्छिये
वैतदहर्यत्सप्तमं तदेव सप्तमेन पदेनाभ्यारभ्य वसंति वाचमेव तत्पुन
रुपयंति संतत्यै संततैरस्याहैरव्यविच्छिन्नैर्यांति यऽएवं विद्वांसोयंति ॥

ब्रा॰ पं॰
॥११॥

॥१०॥ देवासुरा वाऽएषु लोकेषु समयतंत ते वै देवाः षष्ठेनैवाह्नैभ्यो लोकेभ्यो
सुरान्प्राणुदंत तेषां यान्यंतर्हस्तीनानि वसून्यासंस्तान्यादाय समुद्रं प्रौप्यं
ततऽएतेनैव छंदसानुहायांतर्हस्तीनानि वसून्याददत तद्यदेतत्पदं पुनः
पदं सऽएवांकुशऽआसंजनायाद्विषतो वसु दत्ते निरेनमेभ्यः सर्वेभ्यो लो
केभ्यो नुदते यऽएवं वेद ॥११॥ द्यौर्वै देवता षष्ठमहर्वहति त्रयस्त्रिंशः स्तो
मो रैवतं सामातिछंदाश्छंदो यथादेवतमेनेन यथास्तोमं यथासा
म यथाछंदसं राध्नोति यऽएवं वेद यद्वै समानोदर्कं तत्षष्ठस्याह्नो रू
पं यद्ध्येव तृतीयमहस्तदेतत्पुनर्यत्षष्ठं यदश्ववद्यदंतवद्यत्पुनरावृ
त्तं यत्पुनर्निनृत्तं यद्रतवद्यत्पर्यस्तवद्यत्त्रिवद्यदंतरूपं यदुत्तमे पदे दे

राम
॥११॥

वताभिरूप्यते यदसौ लोकोभ्युदितो यस्सारुछेपं यत्सप्तपदं यन्नाराशंसं
यन्नाभानेदिष्ठं यद्रैवतं यदतिछंदा यत्कृतं यत्तृतीयस्याह्नो रूपमेतानि वै षष्ठ
स्याह्नो रूपाण्ययं जायत लमनु बो धरीमणीति षष्ठस्याह्नऽआज्यं भवति पारु
छेपमतिछंदाः सप्तपदं षष्ठेहनि षष्ठस्याह्नो रूपं स्तीर्णं बर्हिरुप नो याहि
वीतयऽआ वां रथो नियुत्वान्वक्षदवसे सुषुमा यातमद्रिभिर्युवां स्तोमेभि
र्देवयंतोऽअश्विनावर्महऽइंद्र वृषन्निंद्रा सुश्रीपक्षे षूणोऽअग्ने श्रणु
हि त्वमीळितो ये देवासो दिव्येकादश स्थ यमदद्राद्रभसमृणाच्युतमि
ति प्रउगं पारुछेपमतिछंदाः सप्तपदं षष्ठेहनि षष्ठस्याह्नो रूपं स पूर्व्यो
महानामिति मरुत्वतीयस्य प्रतिपत्तो वै महदंतः षष्ठमहः षष्ठेहनि षष्ठ

ब्रा॰ पं॰
॥१२॥

स्याह्नो रूपं त्रय इंद्रस्य सोमा इंद्र नेदीय एदिहि प्र नूनं ब्रह्मणस्पतिरग्निर्ने
ता त्वं सोम क्रतुभिः पिन्वंत्यपो नकिः सुदासो रथमिति तृतीयेनाह्नः समान
आ तानः षष्ठेहनि षष्ठस्याह्नो रूपं यत्त्वं रथमिंद्र मेधसातय इति सूक्तं पा
रुच्छेप मति च्छंदाः सप्तपदं षष्ठेहनि षष्ठस्याह्नो रूपं स यो वृषा वृष्ण्येभिः स
मोका इति सूक्तं समानोदर्कं षष्ठेहनि षष्ठस्याह्नो रूपमिंद्र मरुत्व इह पाहि
सोममिति सूक्तं तेभिः साकं पिबतु वृत्रखादः इत्यंतो वै खादोंतः षष्ठमहः
षष्ठेहनि षष्ठस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायत
तनाद्वै तेन न प्रच्यवते यं हयेन वा इदमिति पर्यासः स्वर्मरुत्वता जितमि
त्यंतो वै जितमंतः षष्ठमहः षष्ठेहनि षष्ठस्याह्नो रूपं ता उ गायत्र्यो गायत्र्यो वा

राम
॥१२॥

एतस्य त्र्यहस्य माध्यंदिनं वहंति तद्वैतच्छंदो वहति यस्मिन्निविद्धीयते तस्माद्गा
यत्रीषु निविदं दधाति रेवतीर्नः सधमाद इंद्रे संतु तुविवाजा इति रैवतं पृष्ठं भ
वति बार्हतेहनि षष्ठेहनि षष्ठस्याह्नो रूपं यद्वावान पुरुतमं पुराषाळा वृत्रहेंद्रो नामान्यप्रा इति धाय्याच्युता त्वामि
द्धि हवामह इति बृहतो योनिमनु निवर्तयति बार्हतं ह्येतदहरायतनेनैंद्र
मिद्देवताल य इति साम प्रगाथो निनर्त्तवान्षष्ठेहनि षष्ठस्याह्नो रूपं त्यमू षु
वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥१२॥ ऐंद्र याह्युप नः परावत इति सूक्तं
पारुच्छेपमति छंदाः सप्तपदं षष्ठेहनि षष्ठस्याह्नो रूपं प्रघान्वस्य महतो म
हानीति सूक्तं समानोदर्कं षष्ठेहनि षष्ठस्याह्नो रूपमभूरेको रयिपते रयी
णामिति सूक्तं रथमातिष्ठ तुविनृम्ण भीममित्यंतो वै स्थितमंतः षष्ठमहः

ब्रा॰पं॰ ॥९३॥

षष्ठेहनि षष्ठस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधार यतनादेवै
तेनन प्रच्यवतेऽउप नो हरिभिः सुतमिति पर्यासः समानोदर्कः षष्ठेहनि षष्ठ
स्याह्नो रूपं ताऽउ गायत्र्यो गायत्र्यो वाऽएतस्य त्र्यहस्य मध्यंदिनं वहंति तद्दू
तच्छंदो वहति यस्मिन्निविद्धीयते तस्माद्गायत्रीषु निविद्दधाति अभि त्यं
देवं सवितारमोण्योरिति वैश्वदेवस्य प्रतिपद्गति छंदाः षष्ठेहनि षष्ठस्या
ह्नो रूपं तत्सवितुर्वरेण्यं देवो वोऽआगादित्यनुचरं तो वै गतमंतः षष्ठमहः ष
ष्ठेहनि षष्ठस्याह्नो रूपमुदु ष्य देवः सविता सवाय ते नि सावित्रं शश्वत्तमं तद
पा वह्निरस्थादित्यं तो वै स्थितमंतः षष्ठमहः षष्ठेहनि षष्ठस्याह्नो रूपं कत
रा पूर्वा कतरापरा योरिति द्यावापृथिवीयं समानोदर्कं षष्ठेहनि षष्ठस्याह्नो रू

राम ॥९३॥

पं किमु श्रेष्ठः किं यविष्ठो नऽआजगन्नुप नो वाजाऽअध्वरमृभुक्षाऽइत्यार्भवं ना
राशंसं त्रिवत्स षष्ठेहनि षष्ठस्याह्नो रूपमिदमित्था रौद्रं गूर्तवचा ये यज्ञेन दक्षिण
या समक्ताऽइति वैश्वदेवं ॥३३॥ नाभानेदिष्ठं शंसति नाभानेदिष्ठं वै मानवं ब्र
ह्मचर्यं वसंतं भ्रातरो निरभजंत्सोऽब्रवीदेत्य किं मह्यमभाक्तेत्येतमेव निष्ठाव
मववदितारमित्यब्रुवंस्तस्माद्धाप्येतर्हि पितरं पुत्रा निष्ठावोऽववदितेत्येवा
चक्षते स पितरमेत्याब्रवीत्त्वां ह वाव मह्यं तताभाक्षुरिति तं पिताब्रवीन्मा पु
त्रक तदादृथाऽअंगिरसो वाऽइमे स्वर्गाय लोकाय सत्रमासते ते षष्ठं षष्ठ
मेवाहरागत्य मुह्यंति तानेते सूक्ते षष्ठेहनि शंसय तेषां यत्सहस्रं सत्रपरि
वेषणं तत्ते स्वर्यंतो दास्यंतीति तथेति तानुपैत्प्रतिगृभ्णीत मानवं सुमेध

ऐ॰पं॰ ॥१४॥

सऽइतितमब्रुवन्किंकामोवदसीतीदमेववः षष्ठमहः प्रज्ञापयानीत्यब्र
वीत्स्थयद्वऽएतत्सहस्रंसत्रपरिवेषणंतन्मेस्वर्यंतोदत्तेतितथेतिताने
तेसूक्तेषष्ठेहन्यशंसयत्ततोवैतेप्रयज्ञमजानन्प्रस्वर्गंलोकंतद्यदेतेसू
क्तेषष्ठेहनिशंसतियज्ञस्यप्रज्ञात्यैस्वर्गस्यलोकस्यानुख्यात्यैतंस्व
र्यंतोब्रुवन्नेतत्तेब्राह्मणसहस्रमितितदेनंसमाकुर्वाणंपुरुषःकृष्ण
शवास्युत्तरतऽउपोत्थायाब्रवीन्ममवाऽइदंममवैवास्तुहमितिसोब्रवी
न्मह्यंवाऽइदमदुरितितमब्रवीत्तदुनौतवैवपितरिप्रश्नऽइतिसपितरमै
त्तंपिताब्रवीन्ननुतेपुत्रकाऽदुरित्यदुरेवमऽइत्यब्रवीत्तत्तुमेपुरुषःकृ
ष्णशवास्युत्तरतऽउपोदतिष्ठन्ममवाऽइदंममवैवास्तुहमित्यादितेति

राम ॥१४॥

तंपिताब्रवीत्तस्यैवपुत्रकतत्तत्तुसतुभ्यंदास्यतीतिसपुनरेत्याब्रवीत्त
वहवावकिलभगवऽइदमितिमेपिताहेतिसोब्रवीत्तदहंतुभ्यमेवददामि
यःएवसत्यमवादीरितितस्मादेवंविदुषासत्यमेववदितव्यंसऽएषसह
स्रसनिर्मन्त्रोयन्नाभानेदिष्ठऽउपैनंसहस्रंनमतिप्रषष्ठेनाह्नास्वर्गंलोकं
जानातियऽएवंवेद॥१४॥तान्येतानिसहचराणीत्याचक्षतेनाभानेदि
ष्ठंवालखिल्यावृषाकपिमेवयामरुत्तंतानिसहैवशंसेद्यदेषामंतरि
यात्तद्यजमानस्यांतरियाद्यदिनाभानेदिष्ठंरेतोस्यांतरियाद्यद्वाल
खिल्याःप्राणानस्यांतरियाद्यद्वृषाकपिमात्मानमस्यांतरियाद्यदेवया
मरुतंप्रतिष्ठायाऽएनंच्यावयेद्देवेभ्यश्चमानुष्येभ्यश्चनाभानेदिष्ठेनैवरेतो

ऐ·पं·
३५

सिंचत्तद्वालखिल्याभिर्व्यकरोत्सुकीर्तिना काक्षीवतेन योनिं व्यह्यपयद्दूरोय
थालवशर्मन्मदेमेति तस्माज्ज्यायान्त्सन्गर्भः कनीयांसंसंतं योनिं न हिनस्ति
ब्रह्मणा हि सकॢप्तः एवंयामरुत्ते तवैकरोति तेनेदं सर्वमेतवैकृतमेतिय
दिदं किं चाहश्च कृष्णमहरर्जुनं चेत्याग्निमारुतस्य प्रतिपद हश्चाहश्चेति
पुनरावृत्तं पुनर्निनृत्तं षष्ठेहनि षष्ठस्याह्नो रूपं मध्वो वो नाम मारुतं यजत्रा
ऽइति मारुतं बह्वभिव्याहृत्यमं तो वै बह्वं ततः षष्ठमहः षष्ठेहनि षष्ठस्या
ह्नो रूपं जातवेदसे सुनवाम सोममिति जातवेदस्याच्युतास प्रत्नथा सह
सा जायमानः इति जातवेदस्यं समानोदर्कं षष्ठेहनि षष्ठस्याह्नो रूपं
धारयन्धारयन्निति शंसति प्रस्तं साह्न ऽअंतस्य बिभाय तवथा पुनरा

राम
३५

ग्रंथं पुनर्निग्रंथमंतं बध्नीयान्मयूखं वान्तो धारणाय निहन्यात्ताद्दक्तद्य
धारयं धारयन्निति शंसति संतत्यै संततैरस्य हैरव्यवच्छिन्नैर्यंति य ऽएवं
विद्वांसो यंति यंति ॥ ३५ ॥ इति द्वितीयोध्यायः ॥ यद्वा ऽएति च प्रेति च तत्स
प्तमस्याह्नो रूपं यद्ध्येव प्रथममहस्तदेतत्पुनर्यत्सप्तमं यद्युक्तवद्यद्रथवद्य
दाशुमद्यत्पिबवद्यत्प्रथमे पदे देवता निरुच्यते यदयं लोकोभ्युदितो यच्जा
तवद्यदनिरुक्तं यत्करिष्यद्यत्प्रथमस्याह्नो रूपमेतानि वै सप्तमस्याह्नो रू
पाणि समुद्रादूर्मिर्मधुमाँ उदारदिति सप्तमस्याह्न ऽआज्यं भवत्यनिरुक्तं
सप्तमेहनि सप्तमस्याह्नो रूपं वाग्वै समुद्रो न वै वाक्क्षीयते न समुद्रः क्षी
यते तद्यदेतत्सप्तमस्याह्न ऽआज्यं भवति यज्ञादेव तद्यज्ञं तन्वते वाचमेव

वै४

ब्रा·प· ॥ १६ ॥

तस्यानुरूपयंतिसंतत्यैसंततैस्त्र्यहैरव्यवछिन्नैर्यंतियऽएवंविद्वांसोयं
त्याप्यंतेवैस्तोमाऽआप्यंतेछंदांसिषष्ठेहनितद्यथैवादऽआज्येनावदा
नानिपुनःप्रत्यभिघारयंत्ययातयामतायाऽएवमेवैतत्स्तोमांश्चछंदां
सिचपुनःप्रत्युपयंत्ययातयामतायैयद्वैतत्सप्तमस्याह्नऽआज्यंभवति
तदुत्रैष्टुभंत्रिष्टुप्प्रातःसवनऽएषत्र्यहऽआवायोभूषशुचिपाऽउपनः
प्रयाभिर्यासिदाश्वांसमच्छानोनियुद्भिःशतिनीभिरध्वरंप्रसोताजीरो
ऽअध्वरेष्वस्थाद्येवायवऽइंद्रमादनासोयावांशतंनियुतोयाःसहस्रंप्र
यद्वांमित्रावरुणास्पूर्धन्नागोमतानासत्यारथेनानोदेवशवसायाहि
शुष्मिन्प्रवोयज्ञेषुदेवयंतोऽअर्चन्प्रक्षोदसाधायसासस्रऽएषेतिप्रऽउ

राम ॥ १६ ॥

हनि

गमेनिचप्रेनिचसप्तमेसप्तमस्याह्नोरूपंतदुत्रैष्टुभंत्रिष्टुप्प्रातःसवनऽए
षत्र्यहऽआत्वारथंयथोतयऽइदंवसोसुतमंधऽइंद्रनेदीयऽएदिहिप्रेतु
ब्रह्मणस्पतिरग्निर्नेतात्वंसोमक्रतुभिःपिन्वंत्यपःप्रवऽइंद्रायबृहतऽइ
तिप्रथमेनाह्नासमानऽआतानःसप्तमेहनिसप्तमस्याह्नोरूपंकयाशुभा
सवयसःसनीळाऽइतिसूक्तंनजायमानोनशतेनजातऽइतिजातवत्स
प्तमेहनिसप्तमस्याह्नोरूपंतदुकयाशुभीयमेतद्वैसंज्ञानंसंतनिसूक्तं
यत्कयाशुभीयमेतेनहवाऽइंद्रोगस्त्योमरुतस्तेसमजानंततद्यत्कया
शुभीयंशंसतिसंज्ञात्याऽएवतदायुष्यंतद्योस्यप्रियस्यात्कुर्याद्देवा
स्यकयाशुभीयंतदुत्रैष्टुभंतेनप्रतिष्ठितपदेनसवनंदाधारायतना

श्रा·पं·
॥१७॥

देवैतेननप्रच्यवतेत्यंसुमेषंमहयास्वर्विदमितिसूक्तंमत्वंनवाजंहवनस्यदंर
थमितिरथवत्सप्तमेहनिसप्तमस्याह्नोरूपंतदुजागतंजगत्योवाऽएतस्य
त्र्यहस्यमध्यंदिनंवहंतितद्वैतच्छंदोवहतियस्मिन्निविधीयतेतस्मा
ज्जगतीषुनिविदंदधातिमिथुनानिसूक्तानिशंसत्येतेत्रैष्टुभानिचजाग
तानिचमिथुनंवैपशवःपशवश्छंदोमाःपशूनामवरुध्यैत्वामिद्धि
हवामहेत्वंह्येहिचेरवऽइतिबृहत्पृष्ठंभवतिसप्तमेहनियदेवपृष्ठ
स्याह्नस्तद्यद्बृहद्रथंतरंतद्वैरूपंयद्बृहत्तद्वैराजंयद्रथंतरंतच्छाक्वरंय
द्बृहत्तद्रैवतंतद्यद्बृहत्पृष्ठंभवतिबृहद्वैवतद्बृहत्सत्युत्तभुवंत्यस्तोम
कृंतत्रायंयद्रथंतरंस्यात्कृंत्तत्रंस्यात्तस्माद्बृहद्देवकृतंव्यंयद्ब्वानेति

राम
॥१७॥

धाय्याच्युतामित्याशूरनोनुमऽइतिरथंतरस्ययोनिमनुनिवर्तयतिरथंतरं
ह्येनदहरायतनेनपिबासुतस्यरसिनऽइतिसामप्रगाथःपिबवान्त्सप्तमे
हनिसप्तमस्याह्नोरूपंत्यमूषुवाजिनंदेवजूतमितितार्क्ष्योऽच्युतः॥३६॥
इंद्रस्यनुवीर्याणिप्रवोचमितिसूक्तंप्रेतिसप्तमेहनिसप्तमस्याह्नोरू
पंतदुत्रैष्टुभंतेनप्रतिष्ठितपदेनसवनंदाधारायतनादेवैतेननप्रच्य
तेभित्यंमेषंपुरुहूतमृग्मियमितिसूक्तंयद्वावप्रेतितदभीतिसप्तमे
हनिसप्तमस्याह्नोरूपंतदुजागतंजगत्योवाऽएतस्यत्र्यहस्यमध्यंदिनंव
हंतितद्वैतच्छंदोवहतियस्मिन्निविधीयतेतस्माज्जगतीषुनिविदंदधा
तिमिथुनानिसूक्तानिशंसत्येतेत्रैष्टुभानिचजागतानिचमिथुनंवैपशवः

ब्रा·पं·
॥१८॥

पशवश्छंदोमाः पशूनामवरुध्यै तत्सवितुर्वृणीमहे द्यानो देवसवितरिति वै
श्वदेवस्य प्रतिपदनुचरौ राथंतरे ह्यहनि सप्तमेहनि सप्तमस्याह्नो रूपमभि
त्वा देवसवितरिति सावित्रं यद्वाव प्रेति तदभीति सप्तमेहनि सप्तमस्या
ह्नो रूपं प्रेतां यज्ञस्य शंभुवेति द्यावापृथिवीयं प्रेति सप्तमेहनि सप्तमस्याह्नो
रूपमयं देवाय जन्मनऽइत्यार्भवं जातवत्सप्तमेहनि सप्तमस्याह्नो रूपमाया
हि वनसा सहेति द्विपदाः शंसति द्विपाद्वै पुरुषश्चतुष्पादः पशवः पशव
श्छंदोमाः पशूनामवरुध्यै तद्यद्विपदाः शंसति यजमानमेव तद्द्विप्रति
ष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति त्वेभिरग्ने दुवो गिरऽइति वैश्वदेवमेति
सप्तमेहनि सप्तमस्याह्नो रूपं तान्युगायत्राणि गायत्रे तृतीयसवनऽए

राम.
॥१८॥

षत्र्यहो वैश्वानरोऽअजीजनदित्याग्निमारुतस्य प्रतिपज्जातवत्सप्तमेहनिस
प्तमस्याह्नो रूपं प्रयद्वस्त्रिष्टुभमिषमिति मारुतं प्रेति सप्तमेहनि सप्तम
स्याह्नो रूपं जातवेदसे सुनवाम सोममिति जातवेदस्यास्तु ता द्रूतं वो विश्व
वेदसमिति जातवेदस्य मनिरुक्तं सप्तमेहनि सप्तमस्याह्नो रूपं तान्युगायत्रा
णि यायत्रे तृतीयसवनऽएष त्र्यहः ॥३७॥ यद्वै नेति न प्रेति यत्स्थितं तदष्ट
मस्याह्नो रूपं यद्ध्येव द्वितीयमहस्तदेवैतत्पुनर्यदष्टमं यदूर्ध्ववद्यत्तिव
द्यदंतर्वद्यद्वृषण्वद्यद्वृधन्वद्यन्मध्यमे पदे देवता निरुच्यते यदंतरिक्षमभ्यु
दितं यद्वाग्नियन्महद्वद्यद्विहूतवद्यत्पुनर्वद्यत्कुर्वद्यद्द्वितीयस्याह्नो रूपमे
तानि वाऽअष्टमस्याह्नो रूपाण्यग्निं वो देवमग्निभिः सजोषाऽइत्यष्टम

श्रौ॰ पं॰
॥ १९ ॥

स्याक्लृऽआज्यंभवतिद्वाग्न्यष्टमेहन्यष्टमस्याह्नोरूपंतदुत्रैष्टुभंत्रिष्टुप्
प्रातःसवनऽएषत्र्यहःकुविदंगनमसायेवृधासःपीवोऽअन्नांरयिवृधः
सुमेधाऽउच्छन्नुषसःसुदिनाऽअरिप्राऽउशंतादूतानदभायगोपायावत्तर
स्तन्वोयावदोजःप्रतियांसूरऽउदितेसूक्तेधेनुःप्रत्नस्यकाम्यंदुहानाब्रह्मा
णाऽइंद्रोपयाहिविद्वानूर्ध्वोऽअग्निःसुमतिंवस्वोऽअश्रेदुतस्यानःसरस्व
तीजुषाणेतिप्रऽउगंप्रतिवदंतर्व्वेहिहूतवदूर्ध्वंवदष्टमेहन्यष्टमस्याह्नो
रूपंतदुत्रैष्टुभंत्रिष्टुप्प्रातःसवनऽएषत्र्यहोविश्वानरस्यवस्पतिमिंद्रः
इत्सोमपाऽएकऽइंद्रनेदीयऽएदिह्युत्तिष्ठब्रह्मणस्पतेअग्निर्नेतात्वंसोमक्र
तुभिःपिन्वंत्यपोबृहदिंद्रायगायतेतिद्विलीयेनाह्नासमानऽआतानो

राम
॥ १९ ॥

ष्टमेहन्यष्टमस्याह्नोरूपंशंसामहामिंद्रंयस्मिन्विश्वाऽइतिसूक्तंमहद्वदष्ट
मेहन्यष्टमस्याह्नोरूपंमहश्चित्त्वमिंद्रयतऽएतानितिसूक्तंमहद्वदष्टमेहन्य
ष्टमस्याह्नोरूपंपिबासोममभियमुग्रतर्दऽइतिसूक्तंमूर्वंगव्यंमहिगृणान
ऽइंद्रेतिमहद्वदष्टमेहन्यष्टमस्याह्नोरूपंमहाँइंद्रोनृवदाचर्षणिप्राऽइति
सूक्तंमहद्वदष्टमेहन्यष्टमस्याह्नोरूपंतदुत्रैष्टुभंतेनप्रतिष्ठितपदेनस
वनंदाधारायतनाद्वैतेनैनप्रच्यवतेतमस्यद्यावापृथिवीसचे तसे
तिसूक्तंयद्वैत्कृण्वानोमहिमानमिंद्रियमितिमहद्वदष्टमेहन्यष्टमस्याह्नो
रूपंतदुजागतंजगत्योवाऽएतस्यत्र्यहस्यमध्यंदिनंवहंतितद्वैतच्छंदोवह
तियस्मिन्निविधीयतेतस्माज्जगतीषुनिविदंदधातिमिथुनानिसूक्ता

निसृष्टानि शस्यंते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छंदोमाः पशूनामवरुध्यै महद्वूति सूक्तानि शस्यंते महद्वाऽअंतरिक्षमंतरिक्षस्याप्त्यै पंच सूक्तानि शस्यंते पंचपदा पंक्तिः पांक्तो यज्ञः पांक्ताः पशवः पशवश्छंदोमाः पशूनामवरुध्याऽअभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतयऽइति रथंतरं पृष्ठं भवत्यष्टमेहनि यद्वावानेति धाय्या च्युता त्वामिद्धि हवामहऽइति बृहतो योनिमनु निवर्तयति बार्हतं ह्येतदहरायतनेनो भयं ब्रह्मणवन्नऽइति सामप्रगाथो यच्चेदमद्य यदु च ह्यऽआसीदिति बार्हते हन्यष्टमेहन्यष्टमस्याह्नो रूपं त्यमूषु वाजिनं देवजूतमिति तार्क्ष्योऽच्युतः ॥१३०॥ राम

अपूर्व्या पुरुतमान्यस्माऽइति सूक्तं महे वीराय तवसे तुरायेति महद्वद्दष्ट

मेहन्यष्टमस्याह्नो रूपं तां सु ते कीर्तिं मघवन्महित्वेति सूक्तं महद्वद्दष्टमेहन्यष्टमस्याह्नो रूपं त्वं महाँऽइंद्र यो ह शुष्मैरिति सूक्तं महद्वद्दष्टमेहन्यष्टमस्याह्नो रूपं त्वं महाँऽइंद्र तुभ्यं ह क्षाऽइति सूक्तं महद्वद्दष्टमेहन्यष्टमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधारायतनादेवैतेन न प्रच्यवते दिवश्चिदस्य वरिमा वि पप्रथऽइति सूक्तमिंद्रं न मह्नेति महद्वद्दष्टमेहन्यष्टमस्याह्नो रूपं तदु जागतं जगत्यो वाऽएतस्य त्र्यहस्य मध्यंदिनं वहंति तद्दैलब्धं दोवहति यस्मिन्निविध्रीयते तस्माज्जागतीषु निविदं दधाति मिथुनानि सूक्तानि शस्यंते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छंदोमाः पशूनामवरुध्यै महद्वंति सूक्तानि शस्यंते महद्वाऽअंतरिक्षमंत

श्री.पं.
॥२१॥

रिक्षस्यास्त्यै पंच पंच सूक्तानि शस्यंते पंचपदा पंक्तिः पांक्तो यज्ञः पांक्ताः प
शवः पशवश्छंदोमाः पशूनामवरुध्यै तानि द्वेधा पंचान्यानि पंचान्यानि द
शसंपद्यंते सा दशिनी विराळन्नं विराळन्नं पशवः पशवश्छंदोमाः पशू
नामवरुध्यै विश्वो देवस्य नेतुस्तत्सवितुर्वरेण्यमा विश्वदेवं सत्पतिमिति
वैश्वदेवस्य प्रतिपदनुचरौ बार्हतेऽहन्यष्टमेऽहन्यष्टमस्याह्नो रूपं हिरण्य
पाणिमूतयऽ इति सावित्रमूर्ध्ववदष्टमेऽहन्यष्टमस्याह्नो रूपं मही द्यौः पृ
थिवी च नऽ इति द्यावापृथिवीयं महद्वदष्टमेऽहन्यष्टमस्याह्नो रूपं युवा
ना पितरा पुनरित्यार्भवं पुनर्वदष्टमेऽहन्यष्टमस्याह्नो रूपमिमा नु कं भुव
ना सीषधामेति द्विपदाः शंसति द्विपाद्वै पुरुषश्चतुष्पादः पशवः पश

राम
॥२१॥

वश्छंदोमाः पशूनामवरुध्यै तद्यद्द्विपदाः शंसति यजमानमेव तद्द्विप्रतिष्ठं
चतुष्पात्सु पशुषु प्रतिष्ठापयति देवानामिदवो महदिति वैश्वदेवं महद्वद
ष्टमेऽहन्यष्टमस्याह्नो रूपं तान्युग्मा यत्रापि गायत्रं तृतीयसवनंऽ एषत्र्यहःऽ क्र
तावानं वैश्वानरमित्याग्निमारुतस्य प्रतिपदग्निर्वैश्वानरो महानिति मह
द्वदष्टमेऽहन्यष्टमस्याह्नो रूपं क्रीळं वः शर्धो मारुतमिति मारुतं जंभेरसस्य
वावृधऽ इति वृधन्वदष्टमेऽहन्यष्टमस्याह्नो रूपं जातवेदसे सुनवाम सोममि
ति जातवेदस्याच्युताग्ने मृळ महाँ असीति जातवेदस्यं महद्वदष्टमेऽह
न्यष्टमस्याह्नो रूपं तान्युग्मा यत्राणि गायत्रं तृतीयसवनंऽ एषत्र्यहःऽ एष
त्र्यहः ॥ १० ॥ ॥ इति तृतीयोध्यायः ॥ ॥ यद्वै समानोदर्कं तन्नवमस्याह्नो

श्रा॰ पं॰
॥२२॥

रूपं यद्ध्येवत्तृतीयमहस्तद्देवेतस्तुनर्येन्नवमं यदभ्यवदंतवद्यत्पुनरावृत्तं
यत्पुनर्निनृत्तं यद्रतवद्यत्पर्यस्तवद्यत्त्रिवद्युदुत्तरूपं यद्धुलमे पदे देवतानिरु
च्यते यदसौ लोकोऽभ्युदितो यच्छुचिवद्यत्क्षेतिवद्यद्गृतवद्यदोकवद्यत्कृ
तं यत्तृतीयस्याह्नो रूपमेता न्वै नवमस्याह्नो रूपाण्यगन्म महा नमसा य
विष्टमितिनवमस्याह्नऽआज्यं भवति गलवन्नवमेहनि नवमस्याह्नो रूपं
तदुत्त्रैष्टुभं त्रिष्टुप्प्रातःसवनऽएषत्यहः प्रवीरयाशुचयो दद्रिरे तेते सत्ये
नमनसा दीध्याना दिविक्षयंता रजसः पृथिव्या मा विश्ववाराश्विनागतं
नो यंसोमऽइंद्रतुभ्य सुन्वऽआतु प्र ब्रह्माणोऽअंगिरसो नक्षंत सरस्वतीं दे
वयं तो हवंतऽआनो दिवो बृहतः पर्वतादा सरस्वत्यभिनो नेषिवस्यऽ

राम
॥२२॥

इति प्रऽउगं शुचिवत्सत्यवत्क्षेतिवद्गृतवदोकवन्नवमेहनि नवमस्याह्नो
रूपं तदुत्त्रैष्टुभं त्रिष्टुप्प्रातःसवनऽएषच्यहस्तं तमिद्राधसे महेत्रयऽइंद्र
स्य सोमाऽइंद्रने दीयऽएहि हि प्र नूनं ब्रह्मणस्पतिरग्निर्नेता त्वं सोम क्र
तुभिः पिन्वंत्यपो नाकिःसुदासोरथमिति तृतीयेनाह्ना समानऽआतानो
नवमेहनि नवमस्याह्नो रूपमिंद्रः स्वाहा पिबतु यस्य सोमऽइति सू
क्तमंतो वै स्वाहाकारोंतो नवममहर्नवमेहनि नवमस्याह्नो रूपं गायत्सा
मनभंन्यं यथा वेरिति सूक्तमर्चामतद्वाव धानं स्वर्वदिल्यं तो वै स्वरं तो
नवममहर्नवमेहनि नवमस्याह्नो रूपं तिष्ठा हरी रथऽआयुज्यमाने ति
सूक्तमंतो वैस्थितमंतो नवममहर्नवमेहनि नवमस्याह्नो रूपमिमाऽ

श्रौ॰ प॰ ॥२३॥

उत्वा पुरूतमस्य कारोरिति सूक्तं धियो रथेष्ठामित्यंतो वै स्थिलमेतो नवममहर्नव
मेहनि नवमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधार यतना
द्वै तेन न प्रच्यवते प्रमे दिने पितुमदर्चतो इति सूक्तं समानोदर्केन वमे हानिम ×वच २
[struck] नवमस्याह्नो रूपं तदु जागतं जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहं
ति तद्वै तच्छंदो वहति यस्मिन्निविद्धीयते तस्माज्जगतीषु निविदं दधाति मि
थुनानि सूक्तानि शस्यंते त्रैष्टुभानि च जागतानि च मिथुनं वै पशवः पशवश्छं
दोमाः पशूनामवरुध्यै पंच सूक्तानि शस्यंते पंचपदा पंक्तिः पांक्तो यज्ञः पांक्ताः प
शवः पशवश्छंदोमाः पशूनामवरुध्यै त्वामिद्धि हवामहे त्वं ह्येहि चेरव इति बृहत्
पृष्ठं भवति नवमेहनि यद्वावानेति धाय्याच्युतोभित्वा शूर नोनुम इति रथंतर राम
स्य योनिमनुनिवर्तयति राथंतरं ह्येतदहरायतनेनैंद्र त्रिधातु शरणमिति सा ॥२३॥

म प्रगाथस्त्रिवान्नवमेहनि नवमस्याह्नो रूपं त्यमूषु वाजिनं देवजूतमिति ताक्ष्यो
च्युतः ॥ २० ॥ संच त्वे जग्मुर्गिर इंद्र पूर्वीरिति सूक्तं गतवन्नवेहनि नवमस्याह्नो
रूपं कदा भुवन्रथक्षयाणि ब्रह्मेति सूक्तं क्षेति वदंतरूपं क्षेतीव वा अंतं गत्वा नव
मेहनि नवमस्याह्नो रूपं मा सत्योयातु मघवां ऋजीषीति सूक्तं सत्यवन्नवमे ह
नि नवमस्याह्नो रूपं तत्त इंद्रियं परमं पराचैरिति सूक्तं मंतो वै परममंतो नवमम
हर्नवमेहनि नवमस्याह्नो रूपं तदु त्रैष्टुभं तेन प्रतिष्ठितपदेन सवनं दाधार यत
नाद्वै वै तेन न प्रच्यवते हं भुवं वसुनः पूर्व्यस्पतिरिति सूक्तं महं धनानि संजया
मि शश्वत इत्यंतो वै जितमंतो नवममहर्नवमेहनि नवमस्याह्नो रूपं तदु जाग
तं जगत्यो वा एतस्य त्र्यहस्य मध्यंदिनं वहंति तद्वै तच्छंदो वहति यस्मिन्निवि
द्धीयते तस्माज्जगतीषु निविदं दधाति मिथुनानि सूक्तानि शस्यंते त्रैष्टुभानि च

आगतानि च मिथुनं वै पशवः पशवश्छंदोमाः पशूनामवरुध्यै पंच पंच सूक्तानि
शस्यंते पंचपदा पंक्तिः पांक्तो यज्ञः पांक्ताः पशवः पशवश्छंदोमाः पशूनामवरु
ध्यै तानि द्वेधा पंचान्यानि पंचान्यानि दश संपद्यंते सा दशिनी विराळन्नं विराळ
न्नं पशवः पशवश्छंदोमाः पशूनामवरुध्यै तत्सवितुर्वृणीमहे अद्या नो देव सवित
रिति वैश्वदेवस्य प्रतिपदनुचरौ राथंतरे ह्यनि नवमेहनि नवमस्याह्नो रूपं देवो
ऽआगादिति सावित्रमंतो वै गतमंतो नवममहर्नवमेहनि नवमस्याह्नो रूपं
प्रवां महि द्यवीऽअभी इति द्यावापृथिवीयं शुचीऽउप प्रशस्तयऽइति शुचिवन्न
वमेहनि नवमस्याह्नो रूपमिंद्रऽइषे ददातु न स्तेनो रत्नानि धत्तने त्यार्भवं त्रि
रासा सातिसुन्वतऽइति त्रिवन्नवमेहनि नवमस्याह्नो रूपं बभ्रुरेको विषुणः
सूनरो युवेति द्विपदाः शंसति द्विपाद्वै पुरुषश्चतुष्पादाः पशवः पशवश्छंदो

माः पशूनामवरुध्यै तद्यद्द्विपदाः शंसति यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु प
शुषु प्रतिष्ठापयति ये त्रिंशति त्रयस्परऽइति वैश्वदेवं त्रिवन्नवमेहनि नवमस्या
ह्नो रूपं तान्यु गायत्राणि गायत्रतृतीयसवनऽ एष त्र्यहो वैश्वानरो नऽउतयऽइ
त्याग्निमारुतस्य प्रतिपदा धं यातु परावतऽइत्यंतो वै परावतोंऽतो नवममहर्नव
मेहनि नवमस्याह्नो रूपं मरुतो यस्य हि क्षयऽइति मारुतं क्षेति वदंतरूपं क्षेतीव
वाऽअंतं गत्वा नवमेहनि नवमस्याह्नो रूपं जातवेदसे सुनवाम सोममिति जात
वेदस्यां च्युताप्राग्नये वाचमीरयेति जातवेदस्यं समानोदर्कं नवमेहनि नवमस्या
ह्नो रूपं स नः पर्षदति द्विषः स नः पर्षदति द्विषऽइति शंसति बहु वाऽएतस्मिन्न
वरात्रे किंच किंच वारणं क्रियते शांत्याऽएवैतद्यत्स नः पर्षदति द्विषः स नः पर्ष

श्री·पं·
॥२५॥

द्वतिद्विषः इति शंसति सर्वस्मादेवैनांस्तदेनसः प्रमुंचति तान्यु गायत्र्यावि गायत्र
तृतीयसवनऽएव त्र्यहः॥२३॥ पृष्ठ्यं षळहमुपयंति यथा वै मुखमेवं पृष्ठ्यः षळ
हस्तस्य यथांतरं मुखस्य जिह्वा तालु दंताऽएवं छंदोमाऽअथ येनैव वाचं व्याकरोति
येन स्वादु चास्वादु च विजानाति तद्दशममहर्यथा वै नासिकेऽएवं पृष्ठ्यः षळह
स्तस्य यथांतरं नासिकयोरेवं छंदोमाऽअथ येनैव गंधान्विजानाति तद्दशममह
र्यथा वाऽअक्ष्येवं पृष्ठ्यः षळहस्तस्य यथांतरमक्ष्णः कृष्णमेवं छंदोमाऽअथ यैवै
कनीनिका येन पश्यति तद्दशममहर्यथा वै कर्णाऽएवं पृष्ठ्यः षळहस्तस्य यथांत
रं कर्णस्यैवं छंदोमाऽअथ येनैव शृणोति तद्दशममहः श्रीर्वै दशममहः श्रियं
वाऽएतऽआगच्छंति ये दशममहरागच्छंति तस्माद्दशममहरविवाक्यं भवति

राम
॥२५॥

मा श्रियो ववादिष्मेति दुरव वदं हि श्रेयसस्ते ततः संर्पंति ते मार्जयंते ते पत्नीशालां सं
प्रपद्यंते तेषां यऽएतामाहुतिं विद्यात्स ब्रूयात्समन्वारभध्वमिति स जुहुयादिह रमेह
रमध्वमिह धृतिरिह स्वधृतिरग्ने वाट् स्वाहा वाळिति स यदिह रमेत्याहास्मिन्नेवैनां
स्तल्लोके रमयतीह रमध्वमिति यदाह प्रजामेवैषु तद्रमयतीह धृतिरिह स्वधृति
रिति यदाह प्रजां चैव तद्वाचं च यजमाने धत्तेऽग्ने वाळिति रथंतरं स्वाहा वाळि
ति बृहद्देवानां वाऽएतन्मिथुनं यद्बृहद्रथंतरे देवानामेव तन्मिथुनेन मिथुनमवरुं
धते देवानां मिथुनेन मिथुनं प्रजायंते प्रजात्यै प्रजायते प्रजया पशुभिर्यऽएवं वेद ते त
ते तः सर्पंति मार्जयंते तऽआग्नीध्रं संप्रपद्यंते तेषां यऽएतामाहुतिं विद्यात्स ब्रूयात्स
मन्वारभध्वमिति स जुहुयादुपसृजं धरुणं मातरं धरुणो धयन्॥ रायस्पोषमिषमू
र्जमस्मासु दीधरत्स्वाहेति रायस्पोषमिषमूर्जमवरुंधऽआत्मने च यजमानेभ्यश्च

श्रौ·पं·
२६

यत्रैवंविद्वानेतामाकुलिंजुहोति ॥२२॥ तेनतःसर्पलिसदः संप्रपद्यंतेयथायथ
मन्यऽऋत्विजोव्युत्सर्पंतिसंसर्पंतसुज्ञातारस्तेसर्पराज्ञाःऋक्षुस्तुवतऽइयंवै
सर्पराज्ञीयंहिसर्पतोराज्ञीयंवाऽअलोमिकेवाग्रऽआसीत्सैतंमंत्रमपश्य
दायंगौःपृश्निरक्रमीदितितामयंपृश्निर्वर्णऽआविशन्नानारूपायंयंका
ममकामयतयदिदंकिंचौषधयोवनस्पतयःसर्वाणिरूपाणिपृश्निरेनंव
र्णऽआविशतिनानारूपोयंयंकामंकामयतेयःएवंवेदमनसाप्रस्तौतिम
नसोद्गायतिमनसाप्रतिहरतिवाचाशंसतिवाक्चवैमनश्चदेवानांमिथु
नंदेवानामेवतन्मिथुनेनमिथुनमवरुंधतेदेवानांमिथुनेनमिथुनंप्रजा
यंतेप्रजात्यैप्रजायतेप्रजयापशुभिर्यःएवंवेदाथचतुर्होतॄन्होताव्या

राम
२६

चष्टेतद्देवतत्स्तुतमनुशंसतिदेवानांवाऽएतद्यज्ञियंगुह्यंनामयच्चतुर्होतारस्तद्य
च्चतुर्होतॄन्होताव्याचष्टेदेवानामेवतद्यज्ञियंगुह्यंनामप्रकाशंगमयतितदेनं
प्रकाशंगतंप्रकाशंगमयतिगच्छतिप्रकाशंयऽएवंवेदयंब्राह्मणमनूचानं
यशोनर्च्छेदितिहस्माहारण्यंपरेत्यदर्भस्तंबानुद्ग्रथ्यदक्षिणतोब्रह्माणमुप
वेश्यचतुर्होतॄन्व्याचक्षीतदेवानांवाऽएतद्यज्ञियंगुह्यंनामयच्चतुर्होतारस्तद्य
च्चतुर्होतॄन्व्याचक्षीतदेवानामेवतद्यज्ञियंगुह्यंनामप्रकाशंगमयतितदेनंप्र
काशंगतंप्रकाशंगमयतिगच्छतिप्रकाशंयऽएवंवेद ॥२३॥ अथौदुंबरींस
मन्वारभंतऽइषमूर्जमन्वारभऽइत्यूर्ग्वाऽअन्नाद्यमुदुंबरोयद्वैतद्देवाऽइष
मूर्जंव्यभजंततनतऽउदुंबरःसमभवत्तस्मात्सत्रिःसंवत्सरस्यपच्यतेतद्य

ब्रा. पं.
॥२७॥

दौदुंबरीं समन्वारभेतऽइषमेव तदूर्जमन्वाधं समन्वारभं ते वाचं यच्छंति वा
ग्वै यज्ञो यज्ञमेव तद्यच्छंत्यहर्नियच्छंत्यहर्वै स्वर्गो लोकः स्वर्गमेव तल्लोकं निय
च्छंति न दिवा वाचं विसृजेरन्यद्दिवा वाचं विसृजेरन्नहर्भ्रातृव्याय परिशिंष्युर्न न
क्तं वाचं विसृजेरन्यन्नक्तं वाचं विसृजेरन्रात्रीं भ्रातृव्याय परिशिंष्युः समया
विषितः सूर्यस्यादथ वाचं विसृजेरंस्तावंतमेव तद्द्विषते लोकं परिशिंषंत्य
थो खल्वस्तमितऽएव वाचं विसृजेरंस्तमोभाजमेव तद्द्विषंतं भ्रातृव्यं कुर्वं
त्याहवनीयं परीत्य वाचं विसृजेरन्यज्ञो वाऽआहवनीयः स्वर्गो लोकऽआहव
नीयो यज्ञेनैव तत्स्वर्गेण लोकेन स्वर्गं लोकं यंति यदिहानमकर्म यदत्यरीरि
चाम ॥ प्रजापतिं तत्पितरमप्येत्विति वाचं विसृजंते प्रजापतिं वै प्रजाऽअनुप्र
जायंते प्रजापतिरूनातिरिक्तयोः प्रतिष्ठा नेनानूनं नातिरिक्तं हि नास्ति प्रजाप

राम
॥२७॥

तिमेवो नातिरिक्तान्यभ्यत्यर्जंति यऽएवं विद्वांसऽएतेन वाचं विसृजंते तस्मादे
वंविद्वांसऽएतेनैव वाचं विसृजेरन् ॥२४॥ अध्वर्योऽइत्याह्वयते चतुर्होतृषु वै
दिव्यमाणास्तदाहावस्य रूपमोंहोतस्तथाहोतरित्यध्वर्युः प्रतिगृणात्यवसि
तेवसिते दशसु पदेषु तेषां चित्तिः स्रुगासीऽ३त् ॥ चित्तमाज्यमासीऽ३त् ॥ वाग्वे
दिरासीऽ३त् ॥ आधीतं बर्हिरासीऽ३त् ॥ केतोऽअग्निरासीऽ३त् ॥ विज्ञातमग्नी
दासीऽ३त् ॥ प्राणो हविरासीऽ३त् ॥ सामाध्वर्युरासीऽ३त् ॥ वाचस्पतिर्होतासीऽ३
त् ॥ मनऽउपवक्तासीऽ३त् ॥ ते वाऽएतं ग्रहमगृह्णत ॥ वाचस्पते विधे नामन् ॥
विधेम ते नाम ॥ विधेस्त्वमस्माकं नाम्ना द्यां गच्छ ॥ यां देवाः प्रजापतिगृहपतयऽ
ऋद्धिमराध्नुवंस्तामृद्धिं रात्स्याम ॥ अथ प्रजापतेस्तनूरनुद्रवति अन्नादा चान्ना
दा चान्नपत्नी चान्नादा तदग्निरन्नपत्नी तदादित्यो भद्रा च कल्याणी च भद्रा तत्

श्रा·पं·
॥२८॥

सोमः कल्याणी तस्य श्वोनिरुया च पभया च निलयात द्वायुर्नस्येष कदाचनेलय
त्यपभयात नमृत्युः सर्वं ह्येतस्माद्बिभायानात्ता चानाप्या चानाप्तालत्पृथिव्यनाप्या
त घोरनाधृष्या चाप्रतिधृष्या चानाधृष्यातदग्निरप्रतिधृष्यातदादित्यो पूर्वा
चाभ्रातृव्या चापूर्वातन्मनोभ्रातृव्यातत्संवत्सरऽएतावाव द्वादश प्रजापतेस्त
न्वःऽएष कृत्स्नः प्रजापतिस्तत्कृत्स्नं प्रजापतिमाप्नोति दशम महरथ ग्रलोद्यं
वदंत्यग्निर्गृहपतिरिति हैकऽआहुः सोस्य लोकस्य गृहपतिर्वायुर्गृहपतिरि
ति हैकऽआहुः सोंतरिक्षलोकस्य गृहपतिरसौ वै गृहपतिर्योसौ तपत्येष पति
र्ऋतवो गृहाः॥ येषां वै गृहपतिं देवं विद्वान् गृहपतिर्भवति राध्नोति स गृहपती रा
ध्नुवंति ते यजमानाः॥ येषां वाऽअपहतपाप्मानं देवं विद्वान् गृहपतिर्भवत्यप
स गृहपतिः पाप्मानं हतेऽपते यजमानाः पाप्मानं घ्नते ध्वयोऽराऽस्मारात्स्म ॥२५॥

राम
॥२८॥

इति चतुर्थोऽध्यायः॥ उद्धराहवनीयमित्यपराह्णऽआह यदेवाह्ना साधु करोति त
देव तस्माऽउद्धृत्य तदभये निधत्तेऽउद्धराहवनीयमिति प्रातराह यदेव रात्र्या
साधु करोति तदेव तस्माऽउद्धृत्य तदभये निधत्ते यज्ञो वाऽआहवनीयः स्वर्गो लो
कऽआहवनीयो यज्ञऽएव तत्स्वर्गे लोके स्वर्गे लोके निधत्ते यऽएवं वेद योऽअ
ग्निहोत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वेद वैश्वदेवेनाग्निहोत्रेण षो
डशकलेन पशुषु प्रतिष्ठितेन राध्नोति रौद्रं गवि सद्वायव्यमुपावसृष्टमा
श्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदंतं मारुतं विष्यं
दमानं वैश्वदेवं बिंदुमन्मैत्रं शरो गृहीतं द्यावापृथिवीयमुद्वासितं सावित्रं प्र
क्रांतं वैष्णवं ह्रियमाणं बार्हस्पत्यमुपसन्नमग्नेः पूर्वाहुतिः प्रजापतेरुत्त
रैंद्रं हुतमेतद्वाऽअग्निहोत्रं वैश्वदेवं षोडशकलं पशुषु प्रतिष्ठितं वैश्व

वा

श्रा॰ पं॰
॥२९॥

देवेनाग्निहोत्रेणबोक्कशाकलेनपशुषुप्रतितिष्ठितेनराध्नोतियऽएवंवेद॥२६॥
यस्याग्निहोत्र्युपावसृष्टादुह्यमानोपविशेत्कातत्रप्रायश्चित्तिरितितामभि
मंत्रयेतयस्माद्भीषानिषीदसिततोनोऽअभयंकृधि॥पशून्नःसर्वान्गो
पायनमोरुद्रायमीढुषऽइतितामुत्थापयेदुदस्थाद्देव्यदितिरायुर्यज्ञ
पतावधात्॥इंद्रायकृण्वतीभागंमित्रायवरुणायचेतिसास्यादुदपा
त्रमूधसिचमुखेचोपगृह्ययाद ▬▬ थैनांब्राह्मणायदद्यात्सातत्रप्रा
यश्चित्तिर्यस्याग्निहोत्र्युपावसृष्टादुह्यमानावाश्येतकातत्रप्रायश्चित्ति
रित्यशनायांहवाऽएषायजमानस्यप्रतिख्यायवाश्यतेतामन्नमप्या
दध्याच्छांत्यैशांतिर्वाऽअन्नंसूयवसाद्भगवतीहिभूयाऽइतिसातत्रप्रा

राम
॥२९॥

यश्चित्तिर्यस्याग्निहोत्र्युपावसृष्टादुह्यमानास्पंदेतकातत्रप्रायश्चित्ति
रितिसायत्तत्रस्कंदयेत्तदभिमृश्यजपेद्यदद्यदुग्धंपृथिवीमसृप्तय
दोषधीरत्यसृपद्यदापः॥पयोगृहेषुपयोऽघ्न्यायांपयोवत्सेषुपयोऽ
अस्तुतन्मयीतितत्रयत्परिशिष्टंस्यात्तेनजुहुयाद्यद्यलंहोमायस्याद्यद्युवै
सर्वंसिक्तंस्यादथान्यामाहूयतांदुग्ध्वातेनजुहुयादात्वेवश्रद्धायैहोतव्यं
सातत्रप्रायश्चित्तिःसर्वंवाऽअस्यबर्हिष्यंसर्वंपरिगृहीतंयऽएवंविद्वा
नग्निहोत्रंजुहोति॥२७॥असौवाऽअस्यादित्योयूपःपृथिवीवेदिरो
षधयोबर्हिर्वनस्पतयऽइध्माऽआपःप्रोक्षण्योदिशःपरिधयोयद्ध
वाऽअस्यकिंचनश्यतियन्म्रियतेयदपाजंतिसर्वंहैवैनंतदमुष्मिन्लो

श्रा·पं·
॥३॥

केयथा बर्हिषिदत्तमागच्छेदेवमागच्छतियऽएवं विद्वानग्निहोत्रंजुहो
त्युभयान्वाऽएषदेवमनुष्यान्विपर्यासंदक्षिणानयति सर्वंचेदंयदिदं
किंचमनुष्यान्वाऽएषसायमाहुत्यादेवेभ्योदक्षिणानयति सर्वंचेदंयदि
दंकिंचतऽएते प्रलीनान्योकसऽइवशेरे मनुष्यादेवेभ्योदक्षिणानी
तादेवान्वाऽएषप्रातराहुत्यामनुष्येभ्योदक्षिणानयति सर्वंचेदंयदिदंकिं
चतऽएतेविविदानाऽइवोत्पतंत्यदोहंकरिष्येदोहंगमिष्यामीतिवदंतो
यावंतं हवै सर्वमिदंदत्वालोकंजयति तावंतंह लोकंजयतियऽएवंविद्वा
नग्निहोत्रंजुहोत्यग्नयेवाऽएषसायमाहुत्याश्विनमुपाकरोतिनह्वारूप
लिग्रणातिवाग्वाग्निस्त्यग्निनाहास्यरात्र्याश्विनंशस्तंभवतियऽएवंविद्वा

राम
॥३०॥

नग्निहोत्रंजुहोत्यादित्यायवाऽएषप्रातराहुत्यामहाव्रतमुपाकरोतिनत
प्राणःप्रतिगृणात्यन्नमन्नमित्यादित्येनहास्याक्नामहाव्रतंशस्तंभव
तियऽएवंविद्वानग्निहोत्रंजुहोतितस्यवाऽएतस्याग्निहोत्रस्यसप्त
चशतानिविंशतिश्चसंवत्सरेसायमाहुतयःसप्तचोऽएवशतानिविंश
तिश्चसंवत्सरेप्रातराहुतयस्तावत्योग्नेर्यजुष्मत्यऽइष्टकाःसंवत्सरेण
हास्याग्निनाचित्येनेष्टंभवतियऽएवंविद्वानग्निहोत्रंजुहोति॥२०॥
वृषशुष्मोहवातावतऽउवाचजातूकर्ण्योवक्तास्मोवाऽइदंदेवेभ्यो
यद्वैतदग्निहोत्रमुभयेष्वहूयतान्येद्युर्वावतदेतर्हिहूयतऽइत्ये
तदुहैवोवाचकुमारीगंधर्वगृहीतावक्तास्मोवाऽइदंपितृभ्योयद्वैत

श्रा·पं·
॥३४॥

दग्निहोत्रमुभयेद्युरहूयतान्येद्युर्वाव तदेतर्हि हूयतऽइत्येतद्धाऽअग्नि
होत्रमन्येद्युर्हूयते यदस्तमिते सायं जुहोत्यनुदिते प्रातरथैतदग्नि
होत्रमुभयेद्युर्हूयते यदस्तमिते सायं जुहोत्युदिते प्रातस्तस्मादुदिते हो
तव्यं चतुर्विंशे ह वै संवत्सरेनुदितहोमी गायत्रीं लोकमाप्नोति द्वादशऽ
उदितहोमी स यदा द्वौ संवत्सरावनुदिते जुहोत्यथ हास्यैको हुतो भवति
त्यथ यऽउदिते जुहोति संवत्सरेणैव संवत्सरमाप्नोति यऽएवं विद्वानु
दिते जुहोति तस्मादुदिते होतव्यमेष ह वाऽअहोरात्रयोस्तेजसि जु
होति यो स्तमिते सायं जुहोत्युदिते प्रातरग्निना वै तेजसा रात्रिस्तेज
स्वत्यादित्येन तेजसाहस्तेजस्वदहोरात्रयोर्हास्य तेजसि हुतं भवति

राम
॥३४॥

यऽएवं विद्वानुदिते जुहोति तस्मादुदिते होतव्यं ॥२९॥ एते ह वै संव
त्सरस्य चक्रे यदहोरात्रे ताभ्यामेव तत्संवत्सरमेति स योनुदिते जु
होति यथैकतश्चक्रेण यायात्तादृक्तदथ यऽउदिते जुहोति यथो
भयतश्चक्रेण यायात्क्षिप्रमध्वानं समश्नुवीत तादृक्तत्तदेषाभिय
ज्ञगाथा गीयते ॥ बृहद्रथंतराभ्यामिदमेति युक्तं यद्भूतं भविष्यच्चा
पि सर्वं ॥ ताभ्यामियादग्नीनाधाय धीरो दिवेवान्यज्जुहुयान्नक्तम
न्यदिति राथंतरी वै रात्र्यहर्बार्हतमग्निर्वै रथंतरमादित्यो बृहदे
ते ह वाऽएनं देवते ब्रध्नस्य विष्टपं स्वर्गं लोकं गमयतो यऽएवं विद्वानु
दिते जुहोति तस्मादुदिते होतव्यं तदेषाभियज्ञगाथा गीयते ॥ य

श्रा·पं·
॥३२॥

थाद्वास्थूरिणैकेनयायादेकस्थान्यदुपयोजनाय॥ एवंयंतितेबहवोजना
सःपुरोदयाज्जुह्वतियेग्निहोत्रमिति तांवाऽएतांदेवतांप्रयतींसर्वमिदमनुप्रै
तियदिदंकिंचैतस्यैहीदंदेवतायाऽअनुचरं सर्वंयदिदंकिंचसैषानुचरवती
देवताविंदतेहवाऽअनुचरंभवत्यस्याऽनुचरोयऽएवंवेद सवाऽएषऽएका
तिथिः सऽएषजुह्वत्सुवसति तद्धैतद्गाथाभवस्यनेनसमेनसासोभिश
स्तादेनस्वतोवापहरादेनः॥ एकातिथिमपसायंरुणद्धिबिसानिस्तेनो
ऽअपसोजहारेत्येषहवै सऽएकातिथिः सऽएषजुह्वत्सुवसत्येतांवाव
सदेवतामपरुणद्धियोऽलमग्निहोत्रायसंनाग्निहोत्रंजुहोतितमेषादे
वतापरुद्धापरुणद्ध्यस्माच्चलोकादमुष्माच्चोभाभ्यांयोऽलमग्निहोत्रायसं

राम
॥३२॥

नाग्निहोत्रंजुहोतितस्माद्योऽलमग्निहोत्रायस्याज्जुहुयादेवतस्मादाहुर्नसाय
मतिथिरपरुध्यऽइत्येतद्धस्मवैतद्विद्वान्नगरीजानश्रुतेयऽउदितहोमिनंमै
कादशाक्षंमानुतंतव्यमुवाचप्रजायामेनंविज्ञातास्मायदिविद्वान्वाजुहोत्य
विद्वान्वेतितस्योहैकादशाक्षोराष्ट्रमिवप्रजाबभूवराष्ट्रमिवहवाऽअस्यप्र
जाभवतियऽएवंविद्वानुदितेजुहोतितस्मादुदितेहोतव्यं॥२०॥उद्यन्नुख
लुवाऽआदित्यऽआहवनीयेनरश्मीन्त्संदधातिसयोनुदितेजुहोतियथाकु
मारायवावत्सायवाजातायस्तनंप्रतिदध्यात्तादृक्तदथयऽउदितेजुहोति
यथाकुमारायवावत्सायवाजातायस्तनंप्रतिदध्यात्तादृक्तत्तमस्मैप्रतिधी
यमानमुभयोर्लोकयोरन्नाद्यमनुप्रतिधीयतेस्माच्चलोकादमुष्माच्चोभा

ब्रा. पं.
॥३२॥

भ्यांसयोऽनुदितेजुहोतियथापुरुषायवाहस्तिनेवाऽप्रयतेहस्तऽआदध्यात्तादृक्त
दथयऽउदितेजुहोतियथापुरुषायवाहस्तिनेवाप्रयतेहस्तऽआदध्यात्तादृक्तदस्यै
वऽएतेनैवहस्तेनोर्ध्वंहृत्वास्वर्गेलोकऽआदधातियऽएवंविद्वानुदितेजुहोतित
स्मादुदितेहोतव्यमुद्यन्तंखलुवाऽआदित्यःसर्वाणिभूतानिप्रणयतितस्मादे
नंप्राणऽइत्याचक्षतेप्राणेहास्यसंप्रतिहुतंभवतियऽएवंविद्वानुदितेजुहोति
तस्मादुदितेहोतव्यमेषहवैसत्यंवदन्त्सत्येजुहोतियोऽस्तमितेसायंजुहोत्युदिते
प्रातर्भूर्भुवःस्वरो३मग्निर्ज्योतिर्ज्योतिरग्निरितिसायंजुहोतिभूर्भुवःस्वरो३
सूर्योज्योतिर्ज्योतिःसूर्यऽइतिप्रातःसत्यंहास्यवदतःसत्येहुतंभवतियऽएवंवि
द्वानुदितेजुहोतितस्मादुदितेहोतव्यंतदेषाभियज्ञगाथागीयते॥प्रातःप्रा राम
तरनृतंतेवदंतिपुरोदयाज्जुह्वतियेऽग्निहोत्रं॥दिवाकीर्त्यमदिवाकीर्तयंतः ॥३३॥

सूर्योज्योतिर्नतदाज्योतिरेषामिति॥३३॥प्रजापतिरकामयतप्रजायेयभूया
न्स्यामितिसतपोऽतप्यतसतपस्तप्त्वेमांल्लोकानसृजतपृथिवीमंतरिक्षंदिवंतां
ल्लोकानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणिज्योतींष्यजायंताग्निरेवपृथिव्याऽअजा
यतवायुरंतरिक्षादादित्योदिवस्तानिज्योतींष्यभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रयो
वेदाऽअजायंतऽऋग्वेदऽएवाग्नेरजायतयजुर्वेदोवायोःसामवेदऽआदित्यात्ता
न्वेदानभ्यतपत्तेभ्योऽभितप्तेभ्यस्त्रीणिशुक्राण्यजायंतभूरित्येवऽऋग्वेदादजा
यतभुवऽइतियजुर्वेदात्स्वरितिसामवेदात्तानिशुक्राण्यभ्यतपत्तेभ्योऽभितप्ते
भ्यस्त्रयोवर्णाऽअजायंताकारऽउकारोमकारऽइतितानेकधासमभरत्तदेत
दो३मितितस्मादोमोमितिप्रणौत्योमितिवैस्वर्गोलोकऽओमित्यसौयोऽसौ

ब्रा·पं·
॥३४॥

तपति स प्रजापतिर्यज्ञमतनुत तमाहरत्तेनायजत सऽऋचैव हौत्रमकरोद्य
जुषाध्वर्यवं साम्नोद्गीथं यदेतत्त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्वमकरोत्स प्रजाप
तिर्यज्ञं देवेभ्यः संप्रायच्छत्ते देवा यज्ञमतन्वत तमाहरंत तेनायजंत तऽऋचै
व हौत्रमकुर्वन्यजुषाध्वर्यवं साम्नोद्गीथं यदेवैतत्त्रय्यै विद्यायै शुक्रं तेन ब्रह्मत्व
मकुर्वंस्ते देवाऽअब्रुवन्प्रजापतिं यदि नो यज्ञऽऋक्तऽआर्तिः स्याद्यदि यजुष्टो य
दि सामतो यद्यविज्ञाता सर्वव्यापद्वा का प्रायश्चित्तिरिति स प्रजापतिरब्र
वीद्देवान्यदि वो यज्ञऽऋक्तऽआर्तिर्भवति भूरिति गार्हपत्ये जुहवाथ
यदि यजुष्टो भुवऽइत्याग्नीध्रीयेऽन्वाहार्यपचने वा हविर्यज्ञेषु यदि सामतः
स्वरित्याहवनीये यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवः स्वरिति सर्वाऽअनुद्रुत्या

राम
॥३४॥

हवनीयऽएव जुहवाथेत्येतानि ह वै वेदानामंतः श्लेषणानि यदेता व्याहृतयः
स्तद्यथात्मनात्मानं संदध्याद्यथा पर्वणा पर्व यथा श्लेष्मणा चर्मण्यं वान्यद्वा
विश्लिष्टं संश्लेषयेदेवमेवैताभिर्यज्ञस्य विश्लिष्टं संदधाति सैषा सर्वप्राय
श्चित्तिर्यदेता व्याहृतयस्तस्मादेषैव यज्ञे प्रायश्चित्तिः कर्तव्या ॥ ३२ ॥
तदाहुर्महावदाः ॥ यदृचैव हौत्रं क्रियते यजुषाध्वर्यवं साम्नोद्गीथं
व्यारब्धा त्रयी विद्या भवत्यथ केन ब्रह्मत्वं क्रियतऽइति त्रय्या विद्ययेति
ब्रूयादयं वै यज्ञो योऽयं पवते तस्य वाक्च मनश्च वर्तन्यौ वाचा हि मन
सा च यज्ञो वर्ततऽइयं वै वागदो मनस्तद्वाचा त्रय्या विद्ययैकं पक्षं संस्कु
र्वंति मनसैव ब्रह्मा संस्करोति ते हैके ब्रह्माणऽउपाकृते प्रातरनुवाके स्तो

ब्रा·पं·
॥ ३५ ॥

मभागं जपित्वा भाषमाणाऽउपासते तदु हैतदुवाच ब्राह्मणऽउपाकृते प्रातर
नुवाके ब्रह्माणं भाषमाणं दृष्ट्वार्धमस्य यज्ञस्यांतरगुरिति तद्यथैकपात्पुरुषो
यन्नेकतश्चक्रो वा रथो वर्तमानो भ्रेषन्येत्येवमेव स यज्ञो भ्रेषन्येतीति यज्ञस्य भ्रे
षमनु यजमानो भ्रेषन्येतीति तस्माद्ब्रह्मोपाकृते प्रातरनुवाके वाचंयमः स्यादो
पांश्वंतर्यामयोर्होमादुपाकृतेषु पवमानेषु वोदृचो यानि स्तोत्राणि सशस्त्रा
ण्याते वां वषट्काराद्वाचंयमःऽएव स्यात्तद्यथोभयतः पात्पुरुषो यन्नुभयत
श्चक्रो वा रथो वर्तमानो न रिष्यत्येवमेव स यज्ञो न रिष्यतीति यज्ञस्यारिष्टिम
नु यजमानो न रिष्यति ॥ ३२ ॥ तदाहुर्यद्ब्रह्मान्मे ग्रहीस्त्राचारीन्मऽआकूतीर्मे
होषीदित्यध्वर्यवे दक्षिणानीयंतऽउद्गासीन्मऽइत्युद्गात्रेन्च वोचन्मे शंसीन्मे
याक्षीन्मऽइति होत्रे किंस्विदेव चकृषे ब्रह्मणे दक्षिणानीयंते कृत्वा हो स्विदेव

राम
॥ ३५ ॥

हरताऽइति यज्ञस्य है षभिषग्यद्ब्रह्मा यज्ञायैव तद्भेषजं कृत्वा हरत्यथो यद्ब्र
यिष्ठेनैव ब्रह्मणा छंदसां रसेनार्त्विज्यं करोतीति यद्ब्रह्मा तस्माद्ब्रह्मार्धभाग्घवा
ऽएषऽइतरेषामृत्विजामग्रऽआस यद्ब्रह्मार्धमेव ब्रह्मवाऽआसार्धमितरेषामृ
त्विजां तस्माद्यदि यज्ञऽऋक्तःऽआर्तिः स्याद्यदि यजुष्टो यदि सामतो यद्यविज्ञाता
सर्वव्यापद्वा ब्रह्मणऽएव निवेदयंते तस्माद्यदि यज्ञऽऋक्तःऽआर्तिर्भवति भूरि
ति ब्रह्मा गार्हपत्ये जुहुयाद्यदि यजुष्टो भुवऽइत्याग्नीध्रीयेन्वाहार्यपचने वा
हविर्यज्ञेषु यदि सामतः स्वरित्याहवनीये यद्यविज्ञाता सर्वव्यापद्वा भूर्भु
वः स्वरिति सर्वाऽअनुद्रुत्याहवनीयऽएव जुहुयात्स प्रस्तोतोपाकृते स्तोत्र
ऽआह ब्रह्मन्त्स्तोष्यामः प्रशास्तरिति स भूरिति ब्रह्मा प्रातःसवने ब्रूयादिं

ऐ॰ प॰
॥३६॥

इत्थं वं तस्तुध्वमितिभुवऽइति माध्यंदिने सवने ब्रूयादिंद्र वंतस्तुध्वमिति स्वरि
तितृतीयसवने ब्रूयादिंद्र वंतस्तुध्वमिति भूर्भुवः स्वरित्युक्थ्ये वाति
रात्रे वा ब्रूयादिंद्र वंतस्तुध्वमिति स यदाहेंद्र वंतस्तुध्वमितींद्रो वै यज्ञः
इंद्रो यज्ञस्य देवता सेंद्रमेव तदुक्थं करोतींद्रान्माऽगादिंद्र वंतस्तुध्व
मित्येवैनां स्तदाह तदाह ॥ २४ ॥ ॥ इति पंचम पंचिका ब्राह्मण समा
प्तः ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ हरिः ॐ ॥ देवा ह वै सर्वचरौ सत्रं निषेदुः ॥
शके १७९१ शुक्ल नाम संवत्सरे कार्तिक कृष्ण १४ गुरुवासरे तद्दिने इदं पुस्तकं
समाप्तं ॥ बर्वे त्युपनामक महादेवेन लिखितं ॥ स्वार्थं परार्थं च ॥ छ ॥ ॥३६॥

भग्नपृष्ठकटिग्रीवस्तब्धदृष्टिरधोमुखं ॥ कष्टेन लिखितं ग्रंथं यत्नेन
प्रतिपालयेत् ॥ ३ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

ब्रा॰ पं॰
॥२७॥

॥ इति ब्राह्मणपंचमपंचिकासमाप्तः ॥

राम
॥२७॥

॥ अथ ब्राह्मणषष्ठपंचिकाप्रारंभः ॥ श्री ॥

ब्रा·ष·
॥१॥

श्रीगणेशायनमः॥ हरिःओम्॥ देवाहवैसर्वचरौसत्रंनिषेदुःस्तेहपाप्मानंना
पजघ्निरेतान्होवाचार्बुदःकाद्रवेयःसर्पऋषिर्मंत्रकृदेकावैवोहोत्राकृता
तांवोहंकरवाण्यथपाप्मानमपहनिष्यध्वइतितेहतथेत्यूचुस्तेषांहस्मस
मध्यंदिनेमध्यंदिनएवोपोदासर्पद्ग्राव्णोभिष्टौतितस्मान्मध्यंदिनेमध्यं
दिनएवग्राव्णोभिष्टुवंतितदनुकृतिसहस्मयेनोपोदासर्पत्तद्धाप्येतर्हि
र्बुदोदासर्पणीनामप्रपदस्तितान्हराजामदयांचकारतेहोचुराशीविषोवै
नोराजानमवेक्षतेहंतास्योष्णीषेणाक्ष्यावपिनह्यामेतितथेतितस्यहो
ष्णीषेणाक्ष्यावपिनह्युस्तस्मादुष्णीषमेवपर्यस्यग्राव्णोभिष्टुवंतित
दनुकृतितान्हराजामदयामेवचकारतेहोचुःस्वेनवैनोमंत्रेणग्रा

राम
॥२॥

व्णोभिष्टौतिहंतास्यान्याभिर्ऋग्भिर्मंत्रमापृणचामेतितथेतितस्यहान्या
भिर्ऋग्भिर्मंत्रमापपृचुस्ततोहैनांनमदयांचकारतत्पदस्यान्याभिर्ऋग्भि
र्मंत्रमापृंचंतिशांत्याएवतेहपाप्मानमपजघ्निरेतेषामन्वपहतिंसर्पाः
पाप्मानमपजघ्निरेतएतेपहतपाप्मानोहित्वापूर्वांजीर्णांत्वचंनव
यैवप्रयंत्यपपाप्मानंहतेयएवंवेद॥१॥तदाहुः।कियतीभिरभिष्टु
यादितिशतेनेत्याहुःशतायुर्वैपुरुषःशतवीर्यःशतेंद्रियआयुष्ये
वैनंतद्वीर्यइंद्रियेदधातित्रयस्त्रिंशतात्यावेत्याहुःत्रयस्त्रिंशतोवैसदेवा
नांपाप्मनोपाहंस्त्रयस्त्रिंशदेतस्यदेवाइत्यपरिमिताभिरभिष्टुयाद
परिमितोवैप्रजापतिःप्रजापतेर्वाएषाहोत्रायद्ग्रावस्तोत्रीयातस्यांस

ब्रा॰प॰
॥२॥

वै कामा अवरुध्यं ते स यदपरिमिताभिरभिष्टौति सर्वेषां कामानामवरुध्यै स
र्वान्कामानवरुंधे य एवं वेद तस्मादपरिमिताभिरेवाभिष्टुयात्तदाहुः कथ
मभिष्टुयादित्यक्षरशा ३ः चतुरक्षरशा ३ः पच्छा ३ः अर्धर्चशा ३ः ऋक्शा ३ः
इति ॥ तद्यदृक्शो न तदवकल्प्यतेथ यत्पच्छो नो एव तदवकल्प्यतेथ यद
क्षरशः श्चतुरक्षरशो वितथा छंदांसि कुर्युरन्बहूनि तथाक्षराणि ही
येरन्नर्धर्चशएवाभिष्टुयात्प्रतिष्ठायाएव द्विप्रतिष्ठो वै पुरुषः श्चतुष्पा
दाः पशवो यजमानमेव तद्द्विप्रतिष्ठं चतुष्पात्सु पशुषु प्रतिष्ठापयति
तस्मादर्धर्चशएवाभिष्टुयात्तदाहुर्यन्मध्यंदिने मध्यंदिनएव ग्राव्णोभि
ष्टौति कथमस्येतरयोः सवनयोरभिष्टुतं भवतीति यदेव गायत्रीभिर

राम
॥२॥

भिष्टौति गायत्रं वै प्रातः सवनं तेन प्रातः सवनेथ यज्जगतीभिरभिष्टौति जागतं
वै तृतीयसवनं तेन तृतीयसवनएव सु हास्य मध्यंदिने मध्यंदिनएव
ग्राव्णोभिष्टुवतः सर्वेषु सवनेष्वभिष्टुतं भवति य एवं वेद तदाहुर्यदध्व
र्युरेवान्यानृत्विजः संप्रेष्यत्यथ कस्मादेष एतामसंप्रेषितः प्रतिपद्यत
इति मनो वै ग्रावस्तोत्रीया संप्रेषितं वाइदं मनस्तस्मादेष एतामसंप्रेषि
तः प्रतिपद्यते ॥ २ ॥ वाग्वै सुब्रह्मण्या तस्यै सोमो राजा वत्सः सोमे राजनि
क्रीते सुब्रह्मण्यामाह्वयंति यथा धेनुमुपह्वयेत्तेन वत्सेन यजमानाय सर्वान्
कामान्दुहे सर्वान्हास्मै कामान्वाग्दुहे य एवं वेद तदाहुः किं सुब्रह्मण्यायै
सुब्रह्मण्यात्वमिति वागेवेति ब्रूयाद्वाग्वै ब्रह्म च सुब्रह्म चेति तदाहुरथ क

श्रा॰ षु २ ॥२॥

स्मादेनं पुमांसं संतं स्त्रीमिवाचक्षत इतिवाग्घिस्म ब्रह्मण्येति ब्रूयात्तेनेति तदा
हुर्यदिदं तद्वै दीनतरं ऋत्विज आर्त्विज्यं कुर्वंति बहिर्वेदि स्म ब्रह्मण्या कथमस्यां
तद्वैयार्त्विज्यं कृतं भवतीति वेदे वा उत्करमुत्किरंति यदेवोत्करे तिष्ठन्ना
ह्वयतीति ब्रूयात्तेनेति तदाहुरथ कस्मादुत्करे तिष्ठन्त्सुब्रह्मण्यामाह्वय
तीत्यृषयो वै सत्रमासत तेषां यो वर्षिष्ठ आसीत्तमब्रुवन्त्सुब्रह्मण्यामा
ह्वयत्वं नो नेदिष्ठाद्देवानाह्वयिष्यसीति वर्षिष्ठमेवैनं तत्कुर्वंत्यथो वेदिमेव
तत्संप्रीणातीति तदाहुः कस्मादस्मा ऋषभं दक्षिणामभ्याजंतीति वृषा
वा ऋषभो योषा सुब्रह्मण्या तन्मिथुनं तस्य मिथुनस्य प्रजात्या इत्युपांशु पा
त्नीवतस्याग्नीध्रो यजति रेतो वै पात्नीवत उपांश्विव वै रेतसः सिक्तिर्नानु

राम ॥२॥

वषट्करोति संस्था वा एषा यदनुवषट्कारो नेदेतः संस्थापयानीत्यसंस्थितं वै
ति॰ रेतसः समृद्धं तस्मान्नानुवषट्करोति नेष्टुरुपस्थ आसीनो भक्षयति पत्नी
भाजनं वै नेष्टाग्निः पत्नीषु रेतो दधाति प्रजात्या अग्निनैव तत्पत्नीषु रेतो
दधाति प्रजात्यै प्रजायते प्रजया पशुभिर्य एवं वेद दक्षिणा अनु सुब्रह्मण्या
संतिष्ठते वाग्वै सुब्रह्मण्यान्नं दक्षिणान्नाद्य एव तद्वाचि यज्ञं ततः प्र
तिष्ठापयंति प्रतिष्ठापयंति ॥ २ ॥ इति संचिकायां प्रथमो ध्यायः ॥
देवा वै यज्ञमतन्वत तांस्तन्वानानसुरा अभ्यायन्यज्ञवेशसमेषां करिष्याम इति
तान्दक्षिणत उपायन्यत एषां यज्ञस्य ततनिष्ठमम्यंत ते देवाः प्रतिबुध्य मित्रा
वरुणौ दक्षिणतः पर्यौहंस्ते मित्रावरुणाभ्यामेव दक्षिणतः प्रातःसवने सु

श्रा॰ ष॰ ररक्षांस्यपाघ्नत तथैवैतद्यजमानो मित्रावरुणाभ्यामेव दक्षिणतः प्रातःस
॥ ७ ॥ वनेऽसुररक्षांस्यपघ्नते तस्मान्मैत्रावरुणं मैत्रावरुणः प्रातःसवने शंसति
मित्रावरुणाभ्यां हि देवा दक्षिणतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत ते वै
दक्षिणतोऽपहता असुरा मध्यतोऽयं संप्राविशंस्ते देवाः प्रतिबुध्येंद्रं मध्य
तोऽदधुः स इंद्रेणैव मध्यतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत तथैवैतद्य
जमान इंद्रेणैव मध्यतः प्रातःसवनेऽसुररक्षांस्यपघ्नते तस्मादैंद्रं ब्राह्म
णाच्छंसी प्रातःसवने शंसतींद्रेण हि देवा मध्यतः प्रातःसवनेऽसुररक्षां
स्यपाघ्नत ते वै मध्यतोऽपहता असुरा उत्तरतोऽयं संप्राविशंस्ते देवाः ॥ ७ ॥
प्रतिबुध्येंद्राग्नी उत्तरतः पर्यौहंस्त इंद्राग्निभ्यामेवोत्तरतः प्रातः राम

सवनेऽसुररक्षांस्यपाघ्नत तथैवैतद्यजमान इंद्राग्निभ्यामेवोत्तरतः प्रातःस
वनेऽसुररक्षांस्यपघ्नते तस्मादैंद्राग्नमच्छावाकः प्रातःसवने शंसतींद्राग्निभ्यां
हि देवा उत्तरतः प्रातःसवनेऽसुररक्षांस्यपाघ्नत ते वा उत्तरतोऽपहता अ
सुराः पुरस्तात्पर्य इवं समनीकत ते देवाः प्रतिबुध्याग्निं पुरस्तात्प्रा
तःसवने पर्यौहंस्तेऽग्निनैव पुरस्तात्प्रातःसवनेऽसुररक्षांस्यपाघ्नत त
थैवैतद्यजमानोऽग्निनैव पुरस्तात्प्रातःसवनेऽसुररक्षांस्यपघ्नते तस्मादा
ग्नेयं प्रातःसवनमप पाप्मानं हते य एवं वेद ते वै पुरस्तादपहता असुराः
पश्चात्परीत्य प्राविशंस्ते देवाः प्रतिबुध्य विश्वान्देवानात्मानं पश्चात्तृ
तीयसवने पर्यौहंस्ते विश्वैरेव देवैरात्मभिः पश्चात्तृतीयसवनेऽसुर

४ पाघ्नत तथैवैतद्यजमाना विश्वैरेव देवैरात्मभिः पश्चात्तृतीयसवने सुरर्क्षांस्यप ५

ब्रा०ष० ॥५॥ पा४

रक्षांस्यपघ्नते तस्माद्वैश्वदेवं तृतीयसवनमप पाप्मानं हते य एवं वेद ते वै देवा
वा असुरानेवमपाघ्नत सर्वस्मादेव यज्ञात्ततो देवा अभवन्परासुरा भवत्यात्म वै
नापरास्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ते देवा एवं कॢप्तेन यज्ञेनापा
सुरान्पाप्मानमघ्नताजयन्स्वर्गं लोकमपहवै द्विषंतं पाप्मानं भ्रातृव्यं हते जय
ति स्वर्गं लोकं य एवं वेद यश्चैवं विद्वांत्सवनानि कल्पयति ॥ ४ ॥ स्तोत्रि
यं स्तोत्रियस्यानुरूपं कुर्वंति प्रातः सवने हरेवतदन्हो नुरूपं कुर्वंत्यवरे
णैव तदन्हा परमहरभ्यारभंते थ तथा न माध्यंदिने श्रीवृंछा नित्तानित
स्मैनतस्छानानि यत्स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्युः स्तयैव विभक्त्या तृ
तीय सवने न स्तोत्रियं स्तोत्रियस्यानुरूपं कुर्वंति ॥ ५ ॥ अथात आरं

राम ॥५॥

भणीया एव ऋजुनीती नो वरुण इति मैत्रावरुणस्य मित्रो नयतु विद्वानिति प्रणे
ता वा एष होत्रकाणां यन्मैत्रावरुणस्तस्मादेषा प्रणेतृमती भवतींद्रं वो वि
श्वतस्परीति ब्राह्मणाछंसिनो हवामहे जनेभ्य इतींद्रमेवैतयाहरहर्निह्वयं
ते न हैषां विहवेन्य इंद्रं वृंक्ते यत्रैवं विद्वान्ब्राह्मणाछंस्येतामहरहः शंसति
यत्सोम आसुते नर इत्यछावाकस्येंद्राग्नी अजोहवुरितींद्राग्नी एवैतयाह
रहर्निह्वयं ते न हैषां विहवेन्य इंद्राग्नी वृंक्ते यत्रैवं विद्वानछावाक एतामह
रहः शंसति ता वा एताः स्वर्गस्य लोकस्य नावः संपारिण्यः स्वर्गमेवैताभि
र्लोकमभिसंतरंति ॥ ६ ॥ अथातः परिधानीया एव ते स्याम देव वरुणेति
मैत्रावरुणस्येषं स्वश्च धीमहीत्ययं वै लोक इषमित्यसौ लोकः स्वरित्युभा

ऐ॰ ब्रा॰

॥६॥

वै वैतया लोका त्वारभंते व्यंतरिक्षमतिरदिति ब्राह्मणाच्छंसिनो विवक्षवं स्व
र्गमेवैभ्य एतया लोकं विवृणोति मदे सोमस्य रोचना ॥ इंद्रो यदभिनद्वल
मिति सिषासवो वा एते यद्दीक्षितास्तस्मादेषा वलवती भवत्युद्गा आज
दंगिरोभ्य आविष्कृण्वन्गुहा सतीः ॥ अर्वांचं नुनुदे वलमिति संनिमेवैभ्य
एतया वरुंधइंद्रेण रोचना दिव इति स्वर्गो वै लोक इंद्रेण रोचना दिवो
दृढानि दृंहितानि च ॥ स्थिराणि न पराणुद इति स्वर्ग एवैतया लोके
हरहः प्रतितिष्ठंतो यंत्याहं सरस्वतीवतोरित्यच्छावाकस्य वाग्वै स
रस्वती वाग्वंतोरिति हैतदाहेंद्राग्न्योरवो वृणइत्येतद्ध वा इंद्राग्न्योः
प्रियं धाम यद्वृणोति प्रियेणैवैनौ तद्धाम्ना समर्द्धयति प्रियेण धाम्ना

राम

॥६॥

समृध्यते य एवं वेद ॥ ७ ॥ उभय्यः परिधानीया भवंति होत्रकाणां प्रातःसवने च माध्यं
दिने चाहीनाश्चैकाहिकाश्चैवलतत्रैकाहिकाभिरेव मैत्रावरुणः परिदधाति तेनास्माल्लो
कान्न प्रच्यवतेहीनाभिरच्छावाकः स्वर्गस्य लोकस्याप्त्या उभयीभिर्ब्राह्मणाच्छंसी तेनो
सउभौ व्यन्वारभमाण एतीमं चामुं च लोकमथो मैत्रावरुणं चाच्छावाकं चाथो अहीनं चै
काहं चाथो संवत्सरं चाग्निष्टोमं चैवमु स उभौ व्यन्वारभमाण एत्यथ तत्रैकाहिका एव
तृतीयसवने होत्रकाणां परिधानीया भवंति प्रतिष्ठा वा एकाहः प्रतिष्ठायामेव तद्यज्ञं
मंततः प्रतिष्ठापयंत्यनवानं प्रातःसवने यजेदेकाहीनस्तोममतिशंसेत्तद्यथाभिहेषते
पिपासते क्षिप्रं प्रयच्छेत्तादृक्तदथो क्षिप्रं देवेभ्योन्नाद्यं सोमपीथं प्रयच्छानीति क्षिप्रं
हास्मिंल्लोके प्रतितिष्ठत्यपरिमिताभिरुत्तरयोः सवनयोरपरिमितो वै स्वर्गो लोकः
स्वर्गस्य लोकस्याप्त्यै कामं तद्धोता शंसेद्यद्धोत्रकाः पूर्वेद्युः शंसेयुर्यद्वा होता तद्धो

त्रकाः ~~[illegible]~~ प्राणोवैहोतांगानिहोत्रकाः समानोवा अ
यंप्राणोंगान्यनुसंचरति तस्मात्तत्कामंहोताशंसेयथोत्रकाः पूर्वेद्युः शंसेयुर्यद्धहोतात
स्तोत्रकाः सूक्तांतेहोतापरिदधदेत्यथसमान्यएवतृतीयसवनेहोत्रकाणांपरिधानी
याभवंत्यात्मावैहोतांगानिहोत्रकाः समानावाइमेंगानामंतास्तस्मात्समान्यएवतृ
तीयसवनेहोत्रकाणांपरिधानीयाभवंतिभवंति ॥ ८ ॥ इतिद्वितीयोध्यायः ॥ आत्वा
वहंतुहरयइतिप्रातःसवनउन्नीयमानेभ्योन्वाहवृषण्वतीःपीतवतीःसुतवतीर्मद्वती
रूपसमृद्धाऐंद्रीरन्वाहैंद्रोवैयज्ञोगायत्रीरन्वाहगायत्रंवैप्रातःसवनंनवन्यूनाःप्रा
तःसवनेन्वाहन्यूनेवैरेतःसिच्यतेदशमध्यंदिनेन्वाहन्यूनेवैरेतःसिक्तंमध्यंस्त्रि
यैप्राप्यस्थविष्ठंभवतिनवन्यूनास्तृतीयसवनेन्वाहन्यूनाद्वैप्रजाःप्रजायंतेतद्यदे
तानिकेवलसूक्तान्यन्वाहयजमानमेवतद्गर्भंभूतंप्रजनयतियज्ञाद्देवयोन्यैतेहि

केसप्तसप्तान्वाहुःसप्तप्रातःसवनेसप्तमाध्यंदिनेसप्ततृतीयसवनेयावत्योवैपुरो
वाक्यास्तावत्योयाज्याःसप्तवैप्रांचोयजंतिसप्तवषट्कुर्वंतितासामेताःपुरोनुवाक्याइ
तिवदंतस्तत्तथानकुर्याद्यजमानस्यहतेरेतोविलुंपंत्यथोयजमानमेवयजमानोहिसूक्तै
र्नवाभिर्वाएतंमैत्रावरुणोस्माल्लोकादंतरिक्षलोकमभिप्रवहतिदशभिरंतरिक्षलोकाद
मुंलोकमभ्यंतरिक्षलोकोहिज्येष्ठोनवाभिरमुष्माल्लोकात्स्वर्गंलोकमाभिनहवैतेयजमानं
स्वर्गंलोकमभिवोढुमर्हंतियेसप्तसप्तान्वाहुस्तस्मात्केवलसूक्तएवसूक्तान्यनुब्रूयात् ॥
॥ ९ ॥ अथाहयदैंद्रोवैयज्ञोथकस्माद्द्वावेवप्रातःसवनेप्रस्थितानांप्रत्यक्षादैंद्रीभ्यां
यजतोहोताचैवब्राह्मणाच्छंसीचेदंतेसोम्यंमधिवातिहोतायजतीद्रत्वावृषभंवयामि
तिब्राह्मणाच्छंसीनानादेवत्याभिरितरेकथंतेषामैंद्र्योभवंतीतिमित्रंवयंहवामह
तिमैत्रावरुणोयजतिवरुणंसोमपीतयइतियद्वैकिंचपीतवत्पदंतदैंद्रंरूपंतेनैंद्री

ब्रा॰प॰
॥८॥
इं

णातिमरुतोयस्यहिक्षयइतिपोतायजतिससुगोपातमोजनइतींद्रोवैगोपास्तदैंद्रंरूपंते
नेंद्रंप्रीणात्यग्नेपत्नीरिहावहेतिनेष्टायजतित्वष्टारंसोमपीतयइतींद्रोवैत्वष्टातदैंद्रंरूपंते
नेंद्रंप्रीणात्युक्षान्नायवशान्नायेत्याग्नीध्रोयजतिसोमपृष्ठायवेधसइतींद्रोवैवेधास्तदैंद्रंरू
पंतेनेंद्रंप्रीणातिप्रातर्यावभिरागतंदेवेभिर्जेन्यावसू॥इंद्राग्नीसोमपीतयइतिस्वयंसमृद्धा
च्छावाकस्यैवमुहैताऐंद्र्योभवंतियन्नानादेवत्यास्तेनान्यादेवताःप्रीणातियदुगायत्र्यस्ते
नाग्नेय्यएतदुहैताभिस्त्रयमुपाप्नोति॥१०॥असाविदेवंगोऋजीकमंधइतिमध्यंदिनः
उन्नीयमानेभ्योन्वाहवृषण्वतीःपीतवतीःसुतवतीर्मद्वतीरूपसमृद्धाऐंद्रीरन्वाहैंद्रोवैयज्ञः
स्त्रिष्टुभोन्वाहत्रैष्टुभंवैमाध्यंदिनंसवनंतदाहुर्यत्तृतीयसवनस्यैवरूपंमद्वदथकस्मा
न्मध्यंदिनेमद्वतीरनुचाहयजंतिचाभिरितिमाद्यंतीववैमध्यंदिनेदेवताःसमेवतृतीय
सवनेमादयंतेतस्मान्मध्यंदिनेमद्वतीरनुचाहयजंतिचाभिस्तेवैखलुसर्वएवमाध्यं

राम
॥८॥

दिनेप्रस्थितानांप्रत्यक्षादैंद्रीभिर्यजंत्यभितृण्णवतीभिरेकेपिबासोममभियमुग्रतर्दइति
होतायजतिसईपाहियऋजीषीतरुत्रइतिमैत्रावरुणोयजत्येवापाहिप्रत्नथामंदतुत्वेतिब्रा
ह्मणाछंसीयजत्यर्वाङेहिसोमकामंत्वाहुरितिपोतायजतितवायंसोमस्त्वमेह्यर्वाङिति
नेष्टायजतींद्रायसोमाःप्रदिवोविदानाइत्यच्छावाकोयजत्यापूर्णोअस्यकलशःस्वाहेत्याग्नी
ध्रोयजतितासामेताअभितृण्णवत्योभवंतींद्रोवैप्रातःसवनेनव्यजयतसएताभिरेवमाध्यं
दिनंसवनमभ्यतृणद्यदभ्यतृणत्तस्मादेताअभितृण्णवत्योभवंति॥११॥इहोपया
तशवसोनपातइतितृतीयसवनउन्नीयमानेभ्योन्वाहवृषण्वतीःपीतवतीःसुतवती
र्मद्वतीरूपसमृद्धास्ताऐंद्रार्भव्योभवंतितदाहुर्यन्नार्भवीषुस्तुवतेथकस्मादार्भवः
पवमानइत्याचक्षतइतिप्रजापतिर्वैपितऋभून्मर्त्यान्सतोमर्त्यान्कृत्वातृतीयसव
नआभजत्तस्मान्नार्भवीषुस्तुवतेथार्भवःपवमानइत्याचक्षतेथाहयद्यथाछंदसं
पूर्वयोःसवनयोरन्वाहगायत्रीःप्रातःसवनेत्रिष्टुभोमाध्यंदिनेथकस्माज्जागतेस

ब्रा०७प०
॥९॥

तितृतीयसवनेत्रिष्टुभोन्वाहेतिधीतरसंवैतृतीयसवनमथैतदधीतरसंशुक्रियंछंदोय
त्रिष्टुप्सवनस्यसरसतायायितिब्रूयादथोइंद्रमेवैतत्सवनेन्वाभजतीत्यथाहयदैंद्रार्भ
वंवैतृतीयसवनमथकस्मादेषएवतृतीयसवनेप्रस्थितानांप्रत्यक्षाद्दैंद्रार्भव्यायज
तींद्रऋभुभिर्वाजवद्भिःसमुक्षितमितिहोतैवनानादेवत्याभिरितरेकथंतेषामैंद्रार्भ
व्योभवंतीतींद्रावरुणासुतपाविमंसुतमितिमैत्रावरुणोयजतियुवोरथोअध्वरंदेववी
तयइतिबहूनिवाहतद्भूणांरूपमिंद्रश्चसोमंपिबतंबृहस्पतइतिब्राह्मणाछंसीय
जत्यावांविप्रांसिंदवःस्वाभुवइतिबहूनिवाहतद्भूणांरूपमावोवहंतुसप्तयोरघुष्य
दइतिपोतायजतिरघुपत्वानःप्रजिगातबाहुभिरितिबहूनिवाहतद्भूणांरूपममे
वनःसुहवाआहिगंतनेतिनेष्टायजतिगंतनेतिबहूनिवाहतद्भूणांरूपमिंद्राविष्णू
पिबतंमध्वोअस्यसुतस्यगच्छावाकोयजत्यावामंधांसिमदिराण्यग्मन्नितिबहूनिवाह
तद्भूणांरूपमिमंस्तोममर्हतेजातवेदसइत्याग्नीध्रोयजतिरथमिवसंमहेमाम

राम्
॥१०॥

नीषयेतिबहूनिवाहतद्भूणांरूपमेवमुहैताऐंद्रार्भव्योभवंतियन्नानादेवत्यास्तेनान्यादेव
ताःप्रीणातियदुजगत्यासाहाजागतंवैतृतीयसवनंतृतीयसवनस्यैवसमृध्यै ॥ १२ ॥ अ
थाहयदुक्थिन्योन्याहोत्राअनुक्थाअन्याःकथमस्यैताउक्थिन्यःसर्वाःसमाःसमृद्धाभवं
तीतियदेवैनाःसंप्रगीर्यहोत्राइत्याचक्षतेतेनसमायदुक्थिन्योन्याहोत्राअनुक्थाअ
न्यास्तेनोविषमाएवमुहास्यैताउक्थिन्यःसर्वाःसमाःसमृद्धाभवंत्यथाहत्रींशंसंति
प्रातःसवनेत्रींशंसंतिमाध्यंदिनेहोत्रकाःकथमेषांतृतीयसवनेशस्त्रंभवंतीतिय
देवमाध्यंदिनेद्वेद्वेसूक्तेशंसंतीतिब्रूयात्तेनेत्यथाहयच्छुक्थोहोताकथंहोत्रकाच्छु
क्थाभवंतीतियदेवद्विदेवत्याभिर्यजंतीतिब्रूयात्तेनेति ॥ १३ ॥ अथाहयदेतास्ति
स्रउक्थिन्योहोत्राःकथमितराउक्थिन्योभवंतीत्याज्यमेवाग्नीध्रीयायाउक्थंम
रुत्वतीयंपोत्रीयायैवैश्वदेवंनेष्ट्रीयायैताबाएताहोत्राएवंन्यंगाएवभवंत्यथा

ब्रा०ष०
॥१०॥

हयदेकप्रैषा अन्ये होत्रका अथकस्माद्द्विप्रैषः पोताद्विप्रैषा नेष्टेतियत्रादोगायत्रीसुप
र्णोभूत्वासोममाहरत्तदेतासांहोत्राणामिंद्रउक्थानियरिलुप्यहोत्रेप्रददौयूयंमाभ्य
हयध्वंयूयमस्यावेदिष्टेतितेहोचुर्देवावाचेमेहोत्रेप्रभावयामेतितस्मात्तेद्विप्रैषेभ
वतत्क्रचाग्नीध्रीयांप्रभावयांचक्रुस्तस्मात्तस्यैकयर्चाभूयस्योयाज्याभवंत्यथाहु
यद्धोतायक्षद्धोतायक्षदितिमैत्रावरुणोहोत्रेप्रेष्यत्यथकस्मादहोतृभ्यःस=
द्भ्योहोत्राशंसिभ्योहोतायक्षत्होतायक्षदितिप्रेष्यतीतिप्राणोवैहोताप्राणः
सर्वऋत्विजःप्राणोयक्षत्प्राणोयक्षदित्येवतदाहाथाहास्युक्तातॄणांप्रैषाः ऋ॥
नौद्रेति॥अस्तीतिब्रूयाद्यदेवैतत्प्रज्ञातांजपंजपित्वास्तद्ध्वमित्याहसएषां राम्
प्रैषोथाहास्त्यछावाकस्यप्रवरा ऋ॥ नौद्रेति॥अस्तीतिब्रूयाद्यदेवैनमध्वर्यु ॥०॥
राहाच्छावाकवदस्वयत्तेवाद्यमित्येषोस्यप्रवरोथाहयदैंद्रावरुणंमैत्रावरुणो

स्तृतीयसवनेशंसत्यथकस्मादस्याग्नेयौस्तोत्रियानुरूपौभवतइत्यग्निनावैमुखेन
देवाअसुराननुक्थेभ्योनिर्जघ्नुस्तस्मादस्याग्नेयौस्तोत्रियानुरूपौभवतोथाहयदैंद्र
बार्हस्पत्यंब्राह्मणाछंसीतृतीयसवनेशंसत्यैंद्रावैष्णवमछावाकःकथमेनयो
रैंद्राःस्तोत्रियानुरूपाभवंतीतींद्रोहस्मवाःअसुराननुक्थेभ्यःप्रजिगायसोब्रवी
त्कश्चाहंचेत्यहंचाहंचेतिहस्मदेवताअन्ववयंतिसयदिंद्रःपूर्वःप्राजिगायतस्मा
देनयोरैंद्राःस्तोत्रियानुरूपाभवंतियदुहंचाहंचेतिहस्मदेवताअन्ववयुस्त
स्मान्नानादेवत्यानिशंसतः॥१४॥ अथाहयद्वैश्वदेवंतृतीयसवनमथ वै
कस्मादेतान्यैंद्राणिजागतानिसूक्तानितृतीयसवनआरंभणीयानिशं
स्यंतइतींद्रमेवैतैरारभ्ययंतीतिब्रूयादथोयज्जागतंवैतृतीयसवनंतज्ज
गत्काम्येवतद्यत्किंचातऊर्ध्वंछंदःशस्यतेतत्सर्वंजागतंभवत्येतानिचे

ब्रा॰ष॰
॥९९॥

ऐंद्राणिजागतानिसूक्तानितृतीयसवनआरंभणीयानिशंस्यंतेथैतत्त्रैष्टुभमछा
वाकोंततःशंसतिसंवांकर्मणेतियदेवपानांयंकर्मतद्देतदभिवदतिसमिषे
त्यन्नंवाइषोन्नाद्यस्यावरुध्याऽअरिष्टैर्नःपथिभिःपारयंतेतिस्वस्तितायाए
वैतदहरहःशंसत्यथाहयज्जागतंवैतृतीयसवनमथकस्मादेषांत्रिष्टुभः
परिधानीयाभवंतीतिवीर्यंवैत्रिष्टुब्वीर्यएवतदंततःप्रतितिष्ठंतोयंतीं
यमिंद्रंवरुणमष्टमेगीरितिमैत्रावरुणस्यबृहस्पतिर्नःपरिपातुपश्चा
दितिब्राह्मणाछंसिनउभाजिग्यथुरित्यछावाकस्योभौहितौजिग्यतुर्न
पराजयेथेनपराजिग्यइतिनहितयोःकतरश्चनपराजिग्यइंद्रश्चवि
ष्णोयदपस्पृधेथांत्रेधासहस्रंवितदैरयेथामितींद्रश्चहवैविष्णुश्चासु
रैर्युयुधातेतान्हस्मजित्वोचतुःकल्पामहाइतितेहतथेत्यसुराऊचुःसो

राम
॥९९॥

ब्रवीदिंद्रोयावदेवायंविष्णुस्त्रिर्विक्रमतेतावदस्माकमथयुष्माकमितरदितिस
इमांल्लोकान्विचक्रमेथोवेदानथोवाचंतदाहुःकिंतत्सहस्रमितीमेलोकाइमे
वेदाअथोवागितिब्रूयादैरयेथामैरयेथामित्यछावाकउक्थेभ्यस्यति
सहितत्रांत्योभवत्यग्निष्टोमेहोतातिरात्रेचसहितत्रांत्योभवत्यभ्यस्येत्षो
डशिनीन्नाभ्यस्येतेइति॥अभ्यस्येदित्याहुःकथमन्येष्वहःस्वभ्यस्य
तिकथमत्रनाभ्यस्येदितितस्मादभ्यस्येत्॥१५॥अथाहयन्नाराशं
संवैतृतीयसवनमथकस्मादछावाकोंततःशिल्पेष्वनाराशंसीःशंस
तीतिविकृतिर्वैनाराशंसंकिमिवचवैकिमिवचरेतोविक्रियतेतत्तदा
विकृतंप्रजातंभवत्यथैतन्न्यङ्खिवछंदःशाथिरंयंनाराशंसमथैषां

त्सोयदच्छावाकस्तद्दृह्वतायैदृव्हेप्रतिष्ठास्यामइतितस्मादच्छावाकोंततः
शिल्पेषुनाराशंसीःशंसतिदृह्वतायैदृव्हेप्रतिष्ठास्यामइतिदृव्हेप्र
तिष्ठास्यामइति ॥ १६ ॥ इतिषष्ठपंचिकायांतृतीयोध्यायः ॥ ॥
यःस्ववःस्तोत्रियस्तमनुरूपंकुर्वंतिप्रातःसवनेहीनसंतत्यैयथा
वाएकाहःसुतएवमहीनःस्तद्यथैकाहस्यसुतस्यसवनानिसं
तिष्ठमानानियंत्येवमेवाहीनस्याहानिसंतिष्ठमानानियंतितत्
यदुःस्तोत्रियमनुरूपंकुर्वंतिप्रातःसवनेहीनसंतत्याऽअहीन
मेवतत्संतन्वंतितेवैदेवाश्चऋषयश्चाद्रियंतसमानेनयज्ञं
संतनवामेतितऽएतत्समानंयज्ञस्यापश्यंत्समानान्प्रगाथान्स

मानीःप्रतिपदःसमानान्निसूक्तान्योकःसारीवाइंद्रोयत्रवाइंद्रःपूर्वंगच्छत्यैवत
त्रापरंगच्छतियज्ञस्यैवसेंद्रतायै ॥ १७ ॥ तान्वाएतान्संपातान्विश्वामित्रःप्रथम
मपश्यत्तान्विश्वामित्रेणदृष्टान्वामदेवोसृजतैवात्वामिंद्रवज्रिन्नत्रयन्नइंद्रो
जुजुषोयच्चवष्टिकथामहामवृधत्कस्यहोतुरितिनाक्षिप्रंसमपतद्यक्षिप्रंसमप
ततत्संपातानांसंपातत्वंसहेक्षांचक्रेविश्वामित्रोयान्वाअहंसंपातानपश्यं मि
तान्वामदेवोसृष्टकानिन्वहंसूक्तानिसंपातांस्तत्प्रतिमान्सृजेयेतिस
एतान्सूक्तानिसंपातांस्तत्प्रतिमानसृजतसद्योहजातोवृषभःक
नीनइंद्रःपूर्भिदातिरद्दासमर्कैरिमामूषुप्रभृतिंसातयेधाइच्छंनितत्
सोम्यासःसखायःशासदन्हिर्दुहितुर्नप्त्यंगादतेभिरिष्टेवदीधयाम

ब्रा॰ ष॰
॥२३॥

नीषामिति य एक इद्धव्यश्चर्षणीनामिति भरद्वाजो यस्तिग्मशृं
गो वृषभो न भीम उद् ब्रह्माण्यैरत श्रवस्येति वसिष्ठोऽस्मा इदु
प्र तवसे तुरायेति नौधसं घोर एते प्रातःसवने षळहस्तोत्रियां
स्त्वा मा ध्यंदिने हीनसूक्तानि शंसंति तान्येतान्यहीनसूक्ता
न्यास त्यो यातु मघवाँ ऋजीषीति सत्यवन्मैत्रावरुणोऽस्मा इदु प्र तवसे तु
रायेन्द्राय ब्रह्माणि राततमा॥ इंद्र ब्रह्माणि गोतमासो अक्रन्निति ब्रह्मण्वद्ब्राह्मणा
छंसी शास दुर्जिं जनयं तवह्निमिति वन्हिवदछावाकस्तदाहुः कस्मादछावा
को वन्हिवदेतत्सूक्तमुभयत्र शंसति परांचिषु चैवाहःस्वभ्यावर्तिषु चेति वीर्य
वान्वा एष बह्वृचो वन्हिवदेनत्सूक्तं वदति ह वै वन्हिर्धुरो यास्य युज्यते तस्मादछा

रामः
॥२३॥

वाको वन्हिवदेतत्सूक्तमुभयत्र शंसति परांचिषु चैवाहःस्वभ्यावर्तिषु च तानि पं
चस्वहःसु भवंति चतुर्विंशेऽभिजिति विषुवति विश्वजिति महाव्रते हीनानि ह वा एता
न्यहानि न ह्येषु किंचन हीयते परांचीनि ह वा एतान्यहान्यनभ्यावर्तीनि तस्मा
देतान्येतेष्वहःसु शंसंति यदेनानि शंसंत्यहीनांत्स्वर्गांल्लोकांत्सर्वरूपांत्सर्व
समृद्धानवाश्नवामेति यदेवैनानि शंसंतीदमेवैतैर्निह्वयंते यथ ऋषभं
वाशितायैय ह्वेवैनानि शंसंत्यहीनस्य संतत्या अहीनमेव तत्संतन्वं
ति॥१८॥ ततो वा एतांस्त्रीन्त्संपातान्मैत्रावरुणो विपर्यासमेकैकमह
रहःशंसत्येवा त्वामिंद्र वज्रिन्नत्रेति यन्न इंद्रो जुजुषे यच्च वष्टीति द्विती
ये कथा महामवृधत्कस्य होतुरिति तृतीये नैव संपातान्ब्राह्मणा

॥ प्रथमेहनि ॥

छंसी विपर्यासमेकैकमहरहः शंसतीद्ः रभिदातिरह्वासमैकैरितिप्रथमे
हनियएकइद्धव्यश्चर्षणीनामितिद्वितीयेयत्तिग्मश्टंगोवृषभोनभी
मइतितृतीयेत्रीनिवसंपातानछावाकोविपर्यासमेकैकमहरहःशं
सतीमास्तुषुप्रभृतिंसातयेधाइतिप्रथमेऽनीछंतित्वासोम्यासःसखा
यइतिद्वितीयेशासद्वन्हिर्दुहितुर्नप्त्यंगादितितृतीयेतानिवाएतानि
नवत्रीणिचाहरहःशस्यानितानिद्वादशसंपद्यंतेद्वादशवैमासाः
संवत्सरःसंवत्सरःप्रजापतिःप्रजापतिर्यज्ञस्तत्संवत्सरंप्रजापतिंय
ज्ञमाप्नुवंतितत्संवत्सरेप्रजापतौयज्ञेऽहरहःप्रतितिष्ठंतोयंतितान्यंत
रेणावापमावपेरन्नन्यंस्त्वाविराजोवैमदीश्चचतुर्थेऽहनिपंक्तीःपंच

मेपारुछेपीःषष्ठेथयान्यहानिमहास्तोमानिस्युःकोऽअद्यनर्योदेवकामइतिमैत्रावरु
णआवपेतवनेनवायोन्यधायिचाकन्नितिब्राह्मणाछंस्यायात्वर्वाङुपबंधुरेष्ठाइत्य
छावाकएतानिवाआवपनान्येतैर्वाआवपनैर्देवाःस्वर्गंलोकमजयन्नेतैरृषयःस्त
थैवैतद्यजमानाएतैरावपनैःस्वर्गंलोकंजयंति॥१९॥सद्योहजातोवृषभःकनी
नइतिमैत्रावरुणःपुरस्तात्सूक्तानामहरहःशंसतितदेतत्सूक्तंस्वर्ग्यमेतेन
वैसूक्तेनदेवाःस्वर्गंलोकमजयन्नेतेनऋषयःस्तथैवैतद्यजमानाऽएतेन
सूक्तेनस्वर्गंलोकंजयंतितदुवैश्वामित्रंविश्वस्यहवैमित्रंविश्वामित्रआ
सविश्वंहास्मैमित्रंभवतियऽएवंवेदयेषांचैवंविद्वानेतन्मैत्रावरुणःपु
रस्तात्सूक्तानामहरहःशंसतितदृषभवत्पशुमद्भवतिपशूनामवरुध्यै
तत्पंचर्चंभवतिपंचपदापंक्तिःपंक्तिर्वाअन्नमन्नाद्यस्यावरुध्याऽउग्र

आ॰ष॰ ॥९५॥

त्माग्नेयेरतश्चवस्येति ब्राह्मणाच्छंसी ब्रह्मण्वत्सु समृद्धं सूक्तमहरहः शंसति त
देतत्सूक्तं स्वर्ग्यमेतेन वै सूक्तेन देवाः स्वर्गं लोकमजयन्नेतेन ऋषयस्तथैवैत
द्यजमाना एतेन सूक्तेन स्वर्गं लोकं जयंति तदु वासिष्ठमेतेन वै वसिष्ठ इंद्रस्य
प्रियं धामोपागच्छत्स परमं लोकमजयदुपेंद्रस्य प्रियं धाम गच्छति जयति
परमं लोकं य एवं वेद तद्वैष कृच्चंपञ्चाक्तत्तवत्कृतूनामाह्येतदुपरिष्टा
लोकं त्संपातानां शंसत्या स्वेव तत्स्वर्गे यजमाना अस्मिंल्लोके प्रतितिष्ठंत्यभि
तष्टेव दीधया मनीषामित्यच्छावाको हरहः शंसत्यभिवत्तत्येरूपमभिप्रि
याणि मर्मच्छातपराणीति यान्येव पराण्यहानि तानि प्रियाणि तान्ये राम ॥९८
वतदभिमर्मच्छातो यंत्यभ्यारभमाणाः परो वा अस्माल्लोकात्स्वर्गो

लोकस्तमेव तदभिवदति कवीऽरिच्छामि संदृशे सुमेधा इति ये वै ते न ऋषयः
पूर्वे प्रेतास्ते वै कवयस्तानेव तदभ्यतिवदति तदु वैश्वामित्रं विश्वस्य ह वै मि
त्रं विश्वामित्र आस विश्वं हास्मै मित्रं भवति य एवं वेद तदनिरुक्तं प्राजा
पत्यं शंसत्यनिरुक्तो वै प्रजापतिः प्रजापतेराप्त्यै स रुद्रं इं निराहते नैं
द्राद्रूपान्न प्रच्यवते तद्वै दशार्चं दशाक्षरा विराळन्नं विराळन्नाद्यस्याव
रुध्यै य देव दशार्चो ऽद्र दशा वै प्राणाः प्राणानेव तदाप्नुवंति प्राणानात्मं
दधते तदुपरिष्टात्संपातानां शंसत्या स्वेव तत्स्वर्गं लोकं यजमाना अ
स्मिंल्लोके प्रतितिष्ठंति ॥ २ ॥ कस्तमिंद्र त्वा वसुं कन्नव्यो अतसीनां ॥
कद्रून्वस्याकृतमिति कद्वंतः प्रगाथा आरंभणीया हरहः शास्यंते
अ

आ॰ब॰

॥२६॥

को वै प्रजापतिः प्रजापतेरास्त्वैय देव कद्वंताः ॥ अन्नं वै कमन्नाद्यस्यावरुध्यैय
द्वेव कद्वंताः ॥ अहरहर्वा एते शांतान्यहीनसूक्तान्युपयुंजानायंति तानिक
द्वद्भिः प्रगाथैः शमयंति तान्येभ्यः शांतानि कं भवंति तान्येनां छांतानि स्व
र्गं लोकमभिवहंति त्रिष्टुभः सूक्तप्रतिपदः शंसेयुः स्ता हि केपुरस्तात्प्र
गाथानां शंसंति धाय्या इति वदंतस्तत्तथा न कुर्यात्क्षत्रं वै होता विशो
होत्राशंसिनः क्षत्रायैव तद्विशं प्रत्युद्यामिनीं कुर्युः पापवस्यसं त्रिष्टु
भो महिमाः सूक्तप्रतिपद इत्येव विद्यात्तद्यथा समुद्रं प्रप्लवेरन्नेवं हैव
ते प्रप्लवंते ये संवत्सरं वा द्वादशाहं वासते तद्यथा सैरावतीं नावं पार
कामाः समारोहेयुरेवमेवैतास्त्रिष्टुभः समारोहंति न हवा एत
छंदो गमयित्वा स्वर्गं लोकमुपावर्त्तंते वीर्यवत्तमं हि ताभ्यो नव्या

॥२६॥
राम

स्यीत समानं हि छंदो थो नेत्स्थाप्याः करवाणीति यदेनाः शंसंति प्रज्ञाताभिः
सूक्तप्रतिपद्भिः सूक्तानि समारोहामेति यदेवैनाः शंसंतीदमेवैनाभि
र्निह्वयंते यथ ऋषभं वा शितायैयद्वेवैनाः शंसंत्यहीनस्य संतत्या अ
हीनमेवतत्संतन्वंति ॥ २१ ॥ अप प्राच इंद्र विश्वाँ अमित्रानिति
मैत्रावरुणः पुरस्तात्सूक्तानामहरहः शंसत्यपापाचो अभिभूते
नुदस्व ॥ अपोदीचो अप शूराधराच उरौ यथा तव शर्मन्मदेम इत्य
भयस्य रूपमभयमिव हि यं निच्छति ब्रह्मण्या ते ब्रह्मयुजा युनज्मी
ति ब्राह्मणाच्छंस्यहरहः शंसति युनज्मीति युक्तवतीयुक्तइव ह्य
हीनो हीनस्य रूपमुरुं नो लोकमनुनेषि विद्वानिति अच्छावाको हर

हः त्रांस सनुनेषीत्येतीवत्य हीनोऽहीनस्य रूपं नेषीति सत्रायणरूपं ताव्वा
एता अहरहः त्रास्यं ते समानीभिः परिदध्यु रोकः सारी हैषामिं द्रोयस्तं
भवती हूँ यथ ऋषभोवाग्निताय थावा गोः प्रस्तात्तं गोष्ठमेवं हैषामिं
द्रोयन्तमेव गच्छति नश्चुनं हवीययाहीनस्य परिदध्यात्क्षत्रियो हरा
ष्ट्राच्यवते यो हैव परोभवति तमभिव्हयति ॥ २२ ॥ अथातो हीनस्य युक्तिश्च वैव्यंतरिक्षमतिरदित्यहीनं युक्त एवे दिंद्र मितिवि
मुंचत्याहं सरस्वतीव तोर्नूनंसात्त इत्य हीनं युं क्ते तेस्याम देववरुण
न्नृष्टत इति विमुंचत्येष हवा अहीनं तंतुमर्हति य एनं योक्तुं च वि
मोक्तुं च वेद तद्यथ्वनु विंत्रोऽहन्युज्यंते सा युक्तिरथ यत्सुरस्तोउद

×विमुक्तिश्च×४

॥१७॥

पनीयस्यातिरात्रस्य विमुच्यंते सा विमुक्तिस्तद्यथ्वतु विंत्रोऽहन्नैकाहिका
भिः परिदध्यु रत्रा हैव यज्ञं संस्थापयेयुर्नाहीनकर्म कुर्युरथ यद हीन
परिधानीयाभिः परिदध्युर्यथाश्वां तो विमुच्यमानानुत्सृत्येत वंयजमा
नाउत्सृत्येरन्नुभयीभिः परिदध्युस्तद्यथा दीर्घाध्वउपविमोकं या
याच्चाद्दक्तसंत्ततो हैषां यज्ञो भवती दूध्वं मुंचंत्त एकांहेन द्वयोः स
वनयोः स्तोममतित्रां सैद्दी घारिण्यानि हवै भवंति यत्र बव्ही
भिः स्तोमो तित्रास्यते परिमिताभिस्तत्तीयसवने परिमि
तो वै स्वर्गो लोकः स्वर्गस्य लोकस्याप्त्यै संतत्तो हास्याभ्यार
ब्धो विसृष्टस्तो हीनो भवति य एवं विद्वानहीनं तनुते ॥ २३ ॥

श्रा॰ष॰
॥३८॥

देवा वै वलेगाः पर्यपश्यंस्तायज्ञेनैवेप्संस्ताः षष्ठेनाह्नाप्नुवंस्ते प्रातः
सवनेन भाकेन वलमनभयंस्तं यदनभयाऽऽन्नु ॥ अश्वत्थ्यन्नेवैनं त
न्तऽउत्तृतीयसवनेवज्रेण वालखिल्याभिर्वाचः कूटेनैकपदयावर्त
विरुज्य गाऽउदाजंस्तथैवैतद्यजमानाः प्रातःसवनेन भाकेन वलं नु
भयंति तं यन्नभयंती ॥ अथ यंस्तेवैनं तत्स्मा धोत्तृकाः प्रातःसवने
नाभाकीस्तत्त्वां छंसंति यः ककुभो निधारय ऽइतिमेत्रावरुणः पूर्वी
ष्टऽइंद्राय मालयऽइति ब्राह्मणाछंसी ताहि मध्यंभराणामित्यछावाकः
स्तऽउत्तृतीयसवनेवज्रेणवालखिल्याभिर्वाचः कूटेनैकपदयावलं
विरुज्य गाऽआप्नुवंलिपछः प्रथमं षड्वालखिल्यानां सूक्तानि विहर

राम॰
॥३८॥

त्यर्धर्चशो हि द्वितीयमृक्शस्तृतीयं सपच्छो विहरन्नेप्रगाथे प्रगाथऽएवैकप
दां दध्यात्स वाचः कूटस्ताऽएताः पंचैकपदाश्च तस्रो दशमादह्नऽएकाम
हाव्रतादथाष्टाक्षराणि माहानामनानि पदानि तेषां यावद्भिः संपद्येत ता
वंति शंसेन्नेतराण्याद्रियेताथार्धर्चशो विहरंस्ताश्चैवैकपदाः शंसेत्ता
नि चैवाष्टाक्षराणि माहानामनानि पदान्यथऽऋक्शो विहरंस्ताश्चैवै
कपदाः शंसेत्तानि चैवाष्टाक्षराणि माहानामनानि पदानि सयस्त्वथ मं
षड्वालखिल्यानां सूक्तानि विहरति प्राणं च तद्वाचं च विहरति यद्द्वितीयं
चक्षुश्च तन्मनश्च विहरति यत्तृतीयं श्रोत्रं च तदात्मानं च विहरतीति तदुपा
प्तो विहारे कामऽउपाप्तो वज्रे वालखिल्यासूपाप्तो वाचः कूटऽएकपदाया

मुपात्तः प्राण क्लृप्त्या मविहृताने वं चतुर्थे प्रगाथान् छंसति पशवो वै प्रगा
थाः पशूनामवरुध्यै नात्रैकपदां व्यवदध्याद्यदत्रैकपदां व्यवदध्याद्द्व
चः कूटेन यजमानात्पशून्निर्हण्याद्य एनं तत्र ब्रूयाद्द्वचः कूटेन यज
मानात्पशून्निरवधीरपशुमेनमकरिति शश्वत्तथा स्यात्तस्मात्तत्रै
कपदां न व्यवदध्याच्छ्रेयो वा उत्तमे सूक्ते पर्यस्यति स एवं तयोर्विहार
स्तदेतत्सोबलाय सर्पिर्वीत्तिः शशंस सहो वा अभूयिष्ठान् अहं यज
माने पशून् पर्यगृह्णे षमकुनिष्ठा उमामागमिष्यंतीति तस्मै ह यथा
महहृत् ऽ ऋषिभ्य ऽ एवं निनाय तदेतत्सशाव्यं चक्स्वर्ग्यं चशस्त्रं तस्मा
देतच्छंसति ॥ २४ ॥ दूरोहणं रोहति तस्योक्तं ब्राह्मणमैंद्रं पशुका

मस्य रोहेदैंद्रा वै पशव स्तञ्जागतं स्याज्जागता वै पशवस्तन्महासूक्तं स्या
द्भूयिष्ठं षवत्तस्मशुषुयजमानं प्रतिष्ठापयति बरोरोहेत्तन्महासूक्तं चजा
गतं वैंद्रावरुणं प्रतिष्ठाकामस्य रोहेदेतद्देवता वा एषा होत्रैतत्प्रतिष्ठा
यदैंद्रावरुणा तदेनत्स्वायामेव प्रतिष्ठायामंततः प्रतिष्ठापयति यदैं
द्रावरुणा ३ इ ॥ एषा ह वा अत्र निविंनिर्विदा वै का मा आप्यं तं सयदैं
द्रावरुणे सोहे सौपर्णी रोहेत्तदुपाप्तः ऐंद्रावरुणे काम उपाप्तः सौप
र्णी ॥ २५ ॥ तदाहुः संशंसे ३ त् षष्ठेहा ३ न् ॥ न संशंसे ३ त् इति ॥ संशं
सेदित्याहुः कथमन्ये षहः सुसंशंसति कथमत्र न संशंसेदित्यथो ख
ल्वाहुर्नैव संशंसेत्स्वर्गो वै लोकः षष्ठमहरसमायी वै स्वर्गो लोकः

ब्रा·ष·
॥२०॥

कश्चिद्वै स्वर्गे लोके समेतीति स यत्संशंसेत्समानं तत्कुर्यादथ यन्न सं
शंसतीङ्३ ॥ न स्वर्गस्य लोकस्य रूपं तस्मान्न संशंसेद्यदेव न संशंसतीङ्३ ॥
आत्मा वै स्तोत्रियः प्राणा वालखिल्याः स यत्संशंसेद्देवताभ्यां देवताभ्यां य
जमानस्य प्राणान्वीयाद्य एनं तत्र ब्रूयाद्देवताभ्यां देवताभ्यां यजमा
नस्य प्राणान्व्यगात्प्राण एनं हास्यतीति शश्वत्तथा स्यात्तस्मान्न
संशंसेत्स यदीक्षेत शंसिषं वालखिल्या हं तत्पुरस्ताद्दूरोहणस्य
संशंसानीति नो एव तस्याशामियात्तं यदि दर्प एव विंदेदुपरिष्टा
द्दूरोहणस्यापि बहूनि शतानि शंसेद्यस्यो तत्कामाय तथा कुर्याद
त्रैव तदुपाप्तमैंद्रो वालखिल्यास्तासां द्वादशाक्षराणि पदानि तत्र

रामः
॥२०॥

स कामः उपाप्तो य ऐंद्रे जागते थेदमैंद्रावरुणं सूक्तमैंद्रावरुणीं परिधा
नीयां तस्मान्न संशंसेन्न तदाकुर्यथा वाव स्तोत्रमेवं शस्त्रं विहृता वालखि
ल्याः शस्यंते विहृतां स्तोत्रां३म् ॥ अविहृताँ३ इति ॥ विहृतमिति ब्रूया
दष्टाक्षरेण द्वादशाक्षरमिति तदाकुर्यथा वाव शस्त्रमेवं याज्या ति
स्रो देवताः शस्यंतेऽग्निरिंद्रावरुणा इत्यथैंद्रावरुण्या यजति कथम
ग्निरनंतरित इति यो वा अग्निः स वरुणस्तदप्येतदृषिणोक्तं त्वम
ग्ने वरुणो जायसे यदिति तद्यदेवैंद्रावरुण्या यजति तेनाग्निरनंत
रितोऽनंतरितः ॥ २८ ॥ इति षष्ठपंचिकायां चतुर्थोऽध्यायः ॥ ॥ ॥ शि
ल्पानि शंसंति देवशिल्पान्येतेषां वै शिल्पानामनुकृतीह शिल्पम

ऐ॰ ब्रा॰ ष॰
॥२६॥

धिगम्यते हस्ती कंसो वासो हिरण्यमश्वतरीरथः शिल्पं शिल्पं हास्मिन्नधि
गम्यते यऽएवं वेद यदेव शिल्पानीᳪं ॥ आत्मसंस्कृतिर्वाव शिल्पानि छंदोम
यं वाऽएतैर्यजमानऽआत्मानं संस्कुरुते नाभानेदिष्ठं शंसति रेतो वै नाभाने
दिष्ठो रेतस्तत्सिंचति तमनिरुक्तं शंसत्यनिरुक्तं वै रेतो गुहा योन्यां सि
च्यते स रेतोमिश्रो भवति क्षिप्रया रेतः संजग्मानौ निषिंचन्निति रेतः समृध्या
ऽएव तं स नाराशंसं शंसति प्रजा वै नरो वाक्शंसः प्रजास्वेव तद्वाचं दधा
ति तस्मादिमाः प्रजा वदन्त्यो जायंते तं हैके पुरस्ताच्छंसंति पुरस्तादाय
तना वागिति वदंतऽउपरिष्टादेकऽउपरिष्टादायतना वागिति वदंतो म
ध्यऽएव शंसेन्मध्यायतना वाऽइयं वागुपरिष्टान्नेदीयसी वोपरिष्टान्ने

राम
॥२६॥

दीयसीव वाऽइयं वाक्तं होतारेतोभूतं सिक्त्वा मैत्रावरुणाय संप्रयच्छत्येत
स्य त्वं प्राणान्कल्पयेति ॥ २७ ॥ वालखिल्याः शंसति प्राणा वै वालखिल्याः
प्राणानेवास्य तत्कल्पयति ता विहृताः शंसति विहृता वाऽइमे प्राणाः प्राणे
नापानोऽपानेन व्यानः स प्रथमे सूक्ते विहरेदर्धर्चशो द्वितीयेऽर्क
कृशस्तृतीये स यत्प्रथमे सूक्ते विहरति प्राणं च तद्वाचं च विहरति य
द्द्वितीये चक्षुश्च तन्मनश्च विहरति यत्तृतीये श्रोत्रं च तदात्मानं च विह
रति तद्धैके सह बृहत्यौ सह सतोबृहत्यौ विहरंति तदु पाप्तौ विहार
कामेनेत्तु प्रगाथाः कल्पंते तेतिमर्शमेव विहरेत्तथा वै प्रगाथाः क
ल्पंते प्रगाथा वै वालखिल्यास्तस्मादतिमर्शमेव विहरेद्देवातिमर्शं ॥२८॥
आत्मा वै बृहती प्राणाः सतोबृहती स बृहतीमशंसीत्स आत्माथ सतोबृहतीं ते
प्राणाऽअथ बृहतीमथ सतोबृहतीं तदात्मानं प्राणैः परिबृहंतीति तस्मादिति

मर्शमेवं विहरेद्यद्वेवातिमर्शं ॥३॥

श्रा·ष· ॥२२॥

आत्मा वै बृहती पशवः सतोबृहती स बृहतीमशंसीत्स ऽआत्माथ स
तोबृहतीं ते पशवोऽथ बृहतीमथ सतोबृहतीं तदात्मानं पशुभिः परि
बृंहन्नेति तस्मादेतामशंसमेव विहरेद्ध्येवोत्तमे सूक्ते पच्छस्यातिस्तऽ
एवैतयोर्विहारस्तस्य मैत्रावरुणः प्राणान्कल्पयित्वा ब्राह्मणा
छंसिने संप्रयच्छत्येतं त्वं प्रजनयेति ॥ २८ ॥ सुकीर्तिं शंसति देव
योनिर्वै सुकीर्तिस्तद्यज्ञाद्देवयोन्यै यजमानं प्रजनयति वृषाकपिं
शंसत्यात्मा वै वृषाकपिरात्मानमेवास्य तत्कल्पयति तन्न्यूंखय
त्यन्नं वै न्यूंखस्तदस्मै जाताया अन्नाद्यं प्रतिदधाति यथा कुमाराय
स्तनं स पांक्तो भवति पाङ्क्तो यं पुरुषः पंचधाविहितो लोमानि त्वङ्

राम ॥२२॥

मांसमस्थिमज्जा स यावानेव पुरुषस्तावन्तं यजमानं संस्करोति तं ब्राह्म
णाछंसी जनयित्वाछावाकाय संप्रयच्छत्येतस्य त्वं प्रतिष्ठां कल्पयेति ॥ २९ ॥
एवयामरुतं शंसति प्रतिष्ठा वाऽ एवयामरुत्प्रतिष्ठामेवास्य तत्कल्पयति त ×य
न्यूंखयत्यन्नं वै न्यूंखोन्नाद्यमेवास्मिंस्तद्दधाति स जागतो वातिजाग
तो वा सर्वं वाऽ इदं जागतं वातिजागतं वा स उ मारुतऽआपो वै मरुतऽ
आपोन्नमभिपूर्वमेवास्मिंस्तदन्नाद्यं दधाति तान्येतानि सहचराणी
त्याचक्षते नाभानेदिष्ठं वालखिल्या वृषाकपिमेवयामरुतं तानि सह
वा शंसेत्सह वान शंसेद्यद्धैनानि नाना शंसेद्यथा पुरुषं वा रेतो वा वि
छिंद्यात्तादृक्तत्तस्मादेनानि सह वा शंसेत्सह वान शंसेत्सह बुलिल

आ॰ ष॰
॥२३॥

ऽआश्वतरऽआश्विर्वैश्वजितो होता सन्नीक्षांचक्रेऽएषां वाऽएषां शि
ल्पानां विश्वजिति सांवत्सरिके इमं मध्यंदिनमभिप्रत्येतोहं ताहमित्थमे
वयामरुतं शंसयानीति तद्ध तथा शंसयांचकार तद्ध तथा शस्यमाने
गोश्लूऽआजगाम स होवाच होतः कथा ते शस्त्रं विचक्रं प्लवतऽइति किं
ह्यभूदित्येवयामरुदयमुत्तरतः शस्यतऽइति स होवाचैंद्रो वै मध्यंदि
नः कथेंद्रं मध्यंदिनान्निनीषसीति नेंद्रं मध्यंदिनान्निनीषामीति हो
वाच छंदस्त्विदं मध्यंदिनसाच्यं जागतं वातिजागतं वा सर्वं वा
ऽइदं जागतं वातिजागतं वा स उ मारुतोमिव शंसिष्टेति स होवाचार
मच्छावाके त्वथ हास्मिन्ननुशासनमीषे स होवाचैंद्रमेव विष्णुन्यं

राम
॥२३॥

गं शंसत्वथ त्वमेतं होतरुपरिष्टाद्रौद्र्यै धाय्यायै पुरस्तान्मारुतस्या
प्यस्याथाऽइति तद्ध तथा शंसयांचकार तदिदमप्येतर्हि तथैव शस्य
ते॥३०॥ तद्यद्कुर्यदस्मिन्विश्वजित्यतिरात्रेऽएवं षष्ठेहनि कल्पते यज्ञः
कल्पते यजमानस्य प्रजातिः कथमत्रा शस्त्रऽएवं नाभानेदिष्ठो भवत्यथ
मैत्रावरुणो वालखिल्याः शंसति ते प्राणा रेतो वाऽअग्रेथ प्राणाऽएवं
ब्राह्मणाच्छंस्यशस्त्रऽएवं नाभानेदिष्ठो भवत्यथ वृषाकपिं शंसति स
ऽआत्मा रेतो वाऽअग्रेथात्मा कथमत्र यजमानस्य प्रजातिः कथं प्राणा
ऽअविक्लृप्ता भवंतीति यजमानं ह वाऽएतेन सर्वेण यज्ञक्रतुना संस्कु
र्वंति स यथा गर्भो योन्यामंतरेवं संभवं छेते न वै सकृदेवाग्रे सर्वः सं

ब्रा· ष·
॥२४॥

भवंत्येकैकं वाऽअंगं संभवतः संभवतीति सर्वाणि वै तस्मिन्नहन्नक्रियेर
न्कल्पतऽएव यज्ञः कल्पते यजमानस्य प्रजातिर्यथेतं होतैव यामरुतं ल
नीयसवने शंसति तद्धास्य प्रतिष्ठा तस्यामेवैनं तदंततः प्रतिष्ठापय
ति ॥ ३१ ॥ छंदसां वै षष्ठेनाह्नाप्तानां रसोऽत्यनेदत्स प्रजापतिरबिभेत्परा
ङ्यं छंदसां रसो लोकानत्येष्यतीति तं परस्ताच्छंदोभिः पर्यगृह्णान्ना
राशंस्या गायत्र्या रैभ्या त्रिष्टुभः पारिक्षित्या जगत्याः कारव्ययानुष्टु
भः स पुनश्छंदःसु रसमदधात्सरसैर्हास्य छंदोभिरिष्टं भवति सरसैः
छंदोभिर्यज्ञं तनुते यऽएवं वेद नाराशंसीः शंसति प्रजा वै नरो वाक्शं
सः प्रजास्वेव तद्वाचं दधाति तस्मादिमाः प्रजा वदंत्यो जायंते यऽए

राम
॥२४॥

वं वेद यदेव नाराशंसीः ॥ ३२ ॥ शंसंतो वै देवाश्चऽऋषयश्च स्वर्गं लोकमायंस्तथैवै
तद्यजमानाः शंसंतऽएव स्वर्गं लोकं यंति ताः प्रग्राहं शंसति यथा वृषाक
पिं वार्षाकपं हि वृषाकपेस्तन्न्यायमेतिता सुनं न्यूंख येन्नीवीवनर्देत्सहिता
सां न्यूंखो पारिक्षितीः शंसत्यग्निर्वै परिक्षिदग्निर्हीमाः प्रजाः परिक्षेत्य
ग्निं हीमाः प्रजाः परिक्षियंत्यग्नेरेव सायुज्यं सरूपतां सलोकतामश्नुते यऽ
एवं वेद यदेव पारिक्षितीः ॥ ३३ ॥ संवत्सरो वै परिक्षित्संवत्सरो हीमाः प्रजाः प
परिक्षेति संवत्सरं हीमाः प्रजाः परिक्षियंति संवत्सरस्यैव सायुज्यं
सरूपतां सलोकतामश्नुते यऽएवं वेद ताः प्रग्राहं शंसति यथा वृषाकपिं
वार्षाकपं हि वृषाकपेस्तन्न्यायमेतिता सुनं न्यूंख येन्नीवीवनर्देत्सहिता
× रेभीः शंसति रिभंतो वै देवाश्चऽऋषयश्च स्वर्गं लोकमायंस्तथैवैतद्यजमाना रिभंत
ऽएव स्वर्गं लोकं यंति ताः प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपं हि वृषाकपेस्तन्न्या
यमेतिता सुनं न्यूंख येन्नीवीवनर्देत्सहितासां न्यूंखः × ३

सान्यूंखः कारव्याः शंसति देवा वै यत्किंच कल्याणं कर्माकुर्वंस्तत्कारव्या
भिरवाप्नुवंस्तथैवैतद्यजमाना यत्किंच कल्याणं कर्म कुर्वंति तत्कारव्या
भिराप्नुवंति ताः प्रग्राहं शंसति यथा वृषाकपिं वार्षाकपं हि वृषाकपेस्त
न्यायमिति तासु नन्यूंखयेन्नीवीव नर्दं स हि तासां न्यूंखो दिशां कॢप्तीः
शंसति दिश एव तत्कल्पयति ताः पंच शंसति पंच वा इमा दिशश्चतस्र
स्तिरश्च्य एकोर्ध्वा तासु नन्यूंखयेन्नेवे वचनिनर्दन्ने दिमा दिशो
न्यूंखयानीति ता अर्धर्चशः शंसति प्रतिष्ठाया एव जनकल्पाः शंस
ति प्रजा वै जनकल्पा दिश एव तत्कल्पयित्वा तासु प्रजाः प्रतिष्ठाप
यति तासु न न्यूंखयेन्नेवे वचनिनर्दन्ने दिमा प्रजा न्यूंखयानीति

ता अर्धर्चशः शंसति प्रतिष्ठाया एवैंद्रगाथाः शंसतींद्रगाथाभि
र्वै देवा असुरानभिगायाथैनानत्यायंस्तथैवैतद्यजमाना इंद्रगाथाभि
रेवाप्रियं भ्रातृव्यमभिगायाथैनमतियंति ता अर्धर्चशः शंसति प्रति
ष्ठाया एव ॥ ३२ ॥ एतशप्रलापं शंसत्येतशो ह वै मुनिरग्नेरायुर्दद
र्शयज्ञस्यायातयाममिति हैक आहुः सोब्रवीत्पुत्रान्पुत्रका अ
ग्नेरायुरदर्शं तदभिलपिष्यामि यत्किंच वदामि तन्मे मा परिगातेति
स प्रत्यपद्यतैता अश्वा आप्लवंते प्रतीपं प्रातिसत्वनमिति तस्याभ्य
ग्निरैतशायन एत्याकालेभिहाय मुखमप्यगृह्णाददृपन्नः पितेति
तं होवाचापेह्यलसोभूर्यो मे वाचमवधीः शतायुं गामकरिष्यं स

ब्रा.ष.
॥२६॥

हस्मात्पुरुषं पापिष्ठां ते प्रजां कुर्वन्तीयो मैथुनमसकृथाऽ इति तस्मादाङ्कु
रभ्यग्नयऽ एतशायनाऽओर्वीणां पापिष्ठाऽ इति तं हैके भूयांसं शंसंतिस
ननिषेधेद्यावत्कामं शंसेत्येव भूयादायुर्वाऽएतशप्रलापऽआयुरेव
तद्यजमानस्य प्रतारयति यऽ एवं वेद यदेवैतशप्रलापा ३ः॥ छंदसां
हैष रसो यदेतशप्रलापश्छंदस्स्वेव तद्रसं दधाति सरसैर्हास्य छंदोभि
रिष्टं भवति सरसैश्छंदोभिर्यज्ञं तनुते यऽ एवं वेद यद्वेवैतशप्रलापा ३ः॥
अयातयामा वाऽअक्षितिरेतशप्रलापो यातयामा मे यज्ञेसदक्षि
तिर्मे यज्ञे सदिति तं वाऽ एतमेतशप्रलापं शंसति पदावग्राहं यथानि राम्
विदं तस्योत्तमेन पदेन प्रणौति यथा निविदः प्रवल्हिकाः शंसति प्र ॥२६॥

वल्हिकाभिर्वै देवाऽअसुरान्प्रवल्ह्याथैनानत्यायंस्तथैवैतद्यजमानाः
प्रवल्हिकाभिरेवाप्रियं भ्रातृव्यं प्रवल्ह्याथैनमतियंति ताऽअर्धर्चशः
शंसति प्रतिष्ठायाऽएवाजिज्ञासेन्याः शंसत्याजिज्ञासेन्याभिर्वै देवाऽअ
सुरानाज्ञायाथैनानत्यायंस्तथैवैतद्यजमानाऽआजिज्ञासेन्याभिरेवा
प्रियं भ्रातृव्यमाज्ञायाथैनमतियंति ताऽअर्धर्चशः शंसति प्रतिष्ठा
याऽएव प्रतिराधं शंसति प्रतिराधेन वै देवाऽअसुरान्प्रतिराध्याथैनान
त्यायंस्तथैवैतद्यजमानाः प्रतिराधेनैवाप्रियं भ्रातृव्यं प्रतिराध्याथै
नमतियंत्यतिवादं शंसत्यतिवादेन वै देवाऽअसुरानत्युद्याथैनान
त्यायंस्तथैवैतद्यजमानाऽअतिवादेनैवाप्रियं भ्रातृव्यमत्युद्याथैन

ब्रा॰ ष॰
२७

मतियंति न मर्धर्कशःशंसाति प्रतिष्ठायाऽएव ॥ ३३ ॥ देवनीथं शंसत्यादित्या
श्चहवाऽअंगिरसश्च स्वर्गे लोके स्पर्धंत वयं पूर्वऽएष्यामो वयमिति तिहां
गिरसः पूर्वे श्वः सुत्यां स्वर्गस्य लोकस्य ददृशुस्तेग्निं प्रजिघ्युरंगिरसो
वाऽएकोग्निः परेह्यादित्येभ्यः श्वः सुत्यां स्वर्गस्य लोकस्य प्रब्रूहीति तिहा
दित्याऽअग्निमेव दृष्ट्वा सद्यः सुत्यां स्वर्गस्य लोकस्य ददृशुस्तानेत्या
ब्रवीच्छ्वः सुत्यां वः स्वर्गस्य लोकस्य प्रब्रूमऽइति ते होचुरथ वयं तुभ्यं
सद्यः सुत्यां स्वर्गस्य लोकस्य प्रब्रूमस्त्वयैव वयं होत्राः स्वर्गं लोकमे
ष्यामऽइति स तथेत्युक्त्वा प्रत्युक्तः पुनराजगाम ते होचुः प्रावोचा३ इ
ति ॥ प्रावोचमिति हाब्रवीथो मे प्रति प्रावोचन्निति नो हि न प्रसज्ञा[illegible]ः

रामू
॥२७॥

स्था३ः इति ॥ प्रति वाऽअज्ञासमिति होवाचयशसा वाऽएषोभ्यैति यऽआ
र्त्विज्येन त्वं यः प्रतिरुंधे यशः स प्रतिरुंधे तस्मान्न प्रत्यरोत्सीतियद्दिक्ष
स्माद्पोऽज्जिगांसेद्यज्ञेनास्माद्यपोद्दियात ॥ यदि त्वयाऽन्य स्वयमपोदितं
तस्मात् ॥ ३४ ॥ ते हादित्यानंगिरसो याजयंस्तेभ्यो याजयद्भ्यः इमां पृ
थिवीं पूर्णां दक्षिणां नाम ददुस्तानियं प्रतिगृहीताऽतपत्तान्यवृंजन्त्सा
सिंही भूत्वा विजृंभंतीजनानचरत्तस्याः शोचंत्याऽइमे प्रदराः प्रादी
र्यंत य एव स्याऽइमे प्रदराः समेवं हैव ततः पुरा तस्माद्दारुर्नैनिवृत्तदक्षि
णां प्रतिगृह्णीयान्नेन्मा शुचा विध्याच्छुचा विध्यादिति यद्द्विष्ठेनां प्रति
गृह्णीयादप्रियायैनां भ्रातृव्याय दद्यात्परा हैव भवत्यथ योसौ तपती३ ॥

ब्रा·ष·
॥२८॥

एषो श्वः श्वेतोरूपंकृत्वाश्वाभिधान्यपिहितेमात्मनाप्रतिचक्रमःऽइमंवोनया
मऽइतिसऽएषदेवनीथोनूच्यतेऽआदित्याहजरितरंगिरोभ्योदक्षिणामन
यन्॥ तांहजरितर्नप्रत्यायन्निति नहितऽइमांप्रत्यायंस्तामुहजरितःप्रत्या
यन्निति प्रतिहितेमुमायंस्तांहजरितर्नप्रत्यगृभ्णन्निति नहितऽइमांप्र
त्यगृभ्णंस्तामुहजरितःप्रत्यगृभ्णन्निति प्रतिहितेमुमगृभ्णंनहानेतरंस
नविचेतनानीत्येषहवाऽअह्नांविचेतयिताजज्ञोनेतरंसन्नपुरोगवाऽसऽइ
तिदक्षिणावैयज्ञानांपुरोगवीयथाहवाऽइदमनोपुरोगवंरिष्यत्येवंहैवय
ज्ञोदक्षिणोरिष्यतितस्मादाहुर्दीनव्यैवयज्ञेदक्षिणाभवत्यप्यल्पिकाप्यु
तश्वेतऽआशुपत्वा॥ उतोपद्याभिर्जविष्ठः॥ उतेमाशुमानंपिपर्ति॥

राम
॥२८॥

आदित्यारुद्रावसवस्त्वेळते॥ इदंराधःप्रतिगृभ्णीह्यंगिरऽइतिप्रतिग्रहमे
वैतद्राधसऽएच्छन्निदंराधोबृहत्पृथु॥ देवाददत्वावरं॥ तद्वोऽअस्तुसुचे
तनं॥ युष्मेऽअस्तुदिवेदिवे॥ प्रत्येवगृभायतेति प्रत्येवैनमेतदजग्रभै
षंतंवाऽएतंदेवनीथंशंसतिपदावग्राहंयथानिविदंतस्योत्तमेनपदेन
प्रणौतियथानिविदः॥ ३५॥ भूतेछदःशंसतिभूतेछद्भिर्वैदेवाऽअसु
रानुपासचंततेवयुधेनोतेवमाययातेषांवैदेवाऽअसुराणांभूतेछद्भि
रेवभूतंछादयित्वाथैनानत्यायंस्तथैवैतद्यजमानोभूतेछद्भिरेवाप्रियस्य
भ्रातृव्यस्यभूतंछादयित्वाथैनमतियंतितोऽअर्धर्चशःशंसतिप्र
तिष्ठायाऽएवाहनस्याःशंसत्याहनस्याद्वैरेतःसिच्यतेरेतसःप्रजाः

ब्रा·ष·
२९

प्रजायंते प्रजातिमेव तद्दधाति ता दश शंसति दशाक्षरा विराडन्नं विरा
डन्नाद्रेतः सिच्यते रेतसः प्रजाः प्रजायंते प्रजातिमेव तद्दधाति तान्यू
नयत्यन्नं वै न्यूखोन्नाद्रेतः सिच्यते रेतसः प्रजाः प्रजायंते प्रजातिमेव त
द्दधाति दधिक्राव्णो अकारिषमिति दाधिक्रीं शंसति देवपवित्रं वै दधि
क्रा इदं वा इदं व्याहनस्यां वाचमवादीत्तद्देवपवित्रेण वाचं पुनीते सा
नुष्टुभ्भवति वाग्वा अनुष्टुप्तत्स्वेनैव छंदसा वाचं पुनीते सुतासो मधु
मत्तमा इति पावमानीः शंसति देवपवित्रं वै पावमान्य इदं वा इदं व्या
हनस्यां वाचमवादीत्तद्देवपवित्रेणैव वाचं पुनीते ता अनुष्टुभो भवंति राम
वाग्वा अनुष्टुप्तत्स्वेनैव छंदसा वाचं पुनीते व द्रप्सो अंशुमतीम ॥२९॥

तिष्ठादितैंद्राबार्हस्पत्यं तृचं शंसति विशो अदेवीरभ्याचरंतीर्बृहस्पति
ना युजेंद्रः ससाह इत्यसुरविशं ह वै देवानभ्युदाचार्य आसीत्स इंद्रो बृ
हस्पतिनैव युजासुर्यं वर्णमभिदासंतमपाहंस्तथैवैतद्यजमाना इंद्राबृहस्प
तिभ्यामेव युजासुर्यं वर्णमभिदासंतमपघ्नते तदाहुः संशंसे ३ त् षष्ठे
हा ३ न् ॥ न संशंसे ३ दिति ॥ संशंसेदित्याहुः कथमन्येष्वहःसु संशंसति
कथमत्र न संशंसेदित्यथो खल्वाहुर्नैव संशंसेत्स्वर्गो वै लोकः षष्ठमह
रसमायी वै स्वर्गो लोकः कश्चिद्वै स्वर्गे लोके समेतीति स यत्संशंसेत्समा
नं तत्कुर्याद्यथयन्न संशंसतीदं ॥ तत्स्वर्गस्य लोकस्य रूपं तस्मान्न सं
शंसेद्यदेव न संशंसतीदं ॥ एतानि वा अत्रोक्थानि नाभानेदिष्ठो वा

ब्रा·ष·
॥३०॥

लक्षिल्यावृषाकपिरेव यामरुत्स्यत संशंसेद्यैव सऽएतेषु कामं राध्नु
यादैंद्रो वृषाकपिः सर्वाणि छंदांस्येतच्छाप्रलापस्तत्र स कामऽउपाप्तो
यऽऐंद्रे जागतेथेदमैंद्राबार्हस्पत्यं सूक्तमैंद्राबार्हस्पत्या परिधानीया त
स्मान्न संशंसेन्न संशंसेत् ॥ ३६ ॥ ॥ इति श्रीब्राह्मण षष्ठपंचिकास
माप्तः ॥॥॥ श्रीकृष्णार्पणमस्तु ॥ ॥ ॐ ॥ अथातः पशोर्विभक्तिः ॥
शाके सप्ताब्धो १७ शुक्लनामाब्दे कार्तिक शुक्ल १२ स्यां गुरोर्ल
द्दिने इदं पुस्तकं बर्वे सुपनाक महादेवेन समाप्तिकृतं ॥ छ ॥ राम
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया ॥ यदि शुद्धमशुद्धं वा ॥ ३४ ॥

मम दोषो न विद्यते ॥ श्री सद्गुरु गणेशादिदेवतार्पणमस्तु ॥ ४ ॥

ब्रा० ष०
॥ ३१ ॥

॥ इति ब्राह्मणषष्ठपंचिका समाप्तः ॥

राम
॥ ३१ ॥

॥ अथ ब्राह्मणसप्तमपंचिका प्रारंभः ॥

॥ ब्रा० ७ ॥ श्रीगणेशाय नमः ॥ ॐ अथातः पशोर्विभक्तिस्तस्य विभागं वक्ष्यामो हनू सजिह्वे
॥ १ ॥ प्रस्तोतुः श्येनं वक्ष उद्गातुः कंठः काकुद्रः प्रतिहर्तुर्दक्षिणा श्रोणिर्होतुः सव्या ब्रह्म
णो दक्षिणं सक्थि मैत्रावरुणस्य सव्यं ब्राह्मणाच्छंसिनो दक्षिणं पार्श्वं सांसम
ध्वर्योः सव्यमुपगातॄणां सव्योंसः प्रतिप्रस्थातुर्दक्षिणं दोर्नेष्टुः सव्यं पोतुर्दक्षि
ण ऊरुरच्छावाकस्य सव्य आग्नीध्रस्य दक्षिणो बाहुरात्रेयस्य सव्यः सदस्यस्य
सदं चानूकं च गृहपतेर्दक्षिणौ पादौ गृहपतेर्व्रतप्रदस्य सव्यौ पादौ गृहप
तेर्भार्यायै व्रतप्रदस्यौष्ठ एनयोः साधारणो भवति तं गृहपतिरेव प्रशिं ॥ १ ॥
ष्याज्जाघनीं पत्नीभ्यो हरंति तां ब्राह्मणाय दद्युः स्कंध्या अमणिकास्तिस्र रामः

श्च कीकसा ग्रावस्तुतस्तिस्रश्चैव कीकसा अर्धं चैव वैकर्तस्योन्नेतुरर्धं चैव वै
कर्तस्य क्लोमा च शमितुस्तद्ब्राह्मणाय दद्याद्यद्यब्राह्मणः स्याच्छिरः सुब्रह्मण्यायै
यः श्वः सुत्यां प्राह तस्याजिनमिडा सर्वेषां होतुर्वा ता वा एताः षट्त्रिंशतमेकप
दा यज्ञं वहंति षट्त्रिंशदक्षरा वै बृहती बार्हताः स्वर्गा लोकाः प्राणांश्चैव तत्स्व
र्गांश्च लोकानाप्नुवंति प्राणेषु चैव तत्स्वर्गेषु च लोकेषु प्रतितिष्ठंतो यंति स एष
स्वर्ग्यः पशुर्य एनमेवं विभजंत्यथ येऽतोऽन्यथा तद्यथा सेलगा वा पापकृतो वा पशुं
विमथ्नीरंस्तादृक्तत्तां वा एतां पशोर्विभक्तिं श्रौत ऋषिर्देवभागो विदां चकार
तामु हाप्रोच्यैवास्माल्लोकादुच्चक्राम तामु ह गिरिजाय बाभ्रव्यायामनुष्यः

श्रा॰ ७ ॥ प्रोवाच न ततो हैनामेतदर्वोऽन्नुष्ठाऽअधीयतेऽधीयते ॥ १ ॥ इति प्रथमोध्या
॥२ ॥ यः ॥ तदाहुर्यऽआहिताग्निरुपवसथे म्रियेत कथमस्य यज्ञः स्यादिति नैनं
याजयेदित्याहुरनभिप्राप्तो हि यज्ञं भवतीति तदाहुर्यऽआहिताग्निरधि
श्रितेग्निहोत्रे सान्नाय्ये वा हविष्षु वा म्रियेत का तत्र प्रायश्चित्तिरित्यत्रैवैना
न्यनुपर्यादध्याद्यथा सर्वाणि संदह्येरंस्सा तत्र प्रायश्चित्तिस्तदाहुर्यऽआ
हिताग्निरासन्नेषु हविष्षु म्रियेत का तत्र प्रायश्चित्तिर्याभ्य एव तानि देवेभ्यो रिति×
हवींषि गृहीतानि भवन्ति ताभ्यः स्वाहेत्येवैनान्याहवनीये सर्वहुन्ति जुहुया ॥ २ राम
त्सा तत्र प्रायश्चित्तिस्तदाहुर्यऽआहिताग्निः प्रवसन्म्रियेत कथमस्याग्नि
ता ३

होत्रं स्यादिति साभिवान्यवत्सायाः पयसा जुहुयादन्यदिवै तत्पयो यदभिवान्यव
त्सायाऽअन्यदिवैतदग्निहोत्रं यत्प्रेतस्यापि वा यत एव कुतश्च पयसा जुहु
युरथाप्याहुरेवमेवैनानजस्रान् जुहुतरा क्षीरन्नाशरीराण्यामाहर्तोरिति
यदि शरीराणि न विद्येरन्पर्णशरः षष्टिस्त्रीणि च शतान्याहृत्य तेषां पुरुष
रूपकमिव कृत्वा तस्मिंस्तामावृतं कुर्युरथैनांश्छरीरैराहृतैः संस्पर्श्योद्वा
सयेयुरध्यर्धशतं काये सक्थिनी द्विपंचाशे च विंशे चोरू द्विपंच विंशे ग्री
वं तु शिरस्युपरिदध्यात्सा तत्र प्रायश्चित्तिः ॥ २ ॥ १ ॥ तदाहुर्यस्याग्निहो
त्र्युपावसृष्टादुह्यमानोपविशेत्का तत्र प्रायश्चित्तिरिति तामभिमन्त्रयेत य

श्रा० ७॥ स्मादीषा निषीद सिलत्सेनो ऽ अभयं कृधि॥ पशून्नः सर्वान् गोपाय नमो रुद्राय मी
॥ ३ ॥ ढुषे इति तामुत्थापयेदुदस्थाद्देव्य दितिरायुर्यज्ञप तावधात्॥ इंद्राय कृण्वती
भागं मित्राय वरुणाय चेस थास्या ऽ उदपात्रमूध्यसि च मुखे चोपगृह्णीयाद्ध्ये
नां ब्राह्मणाय दद्यात्सा तत्र प्रायश्चित्तिस्तदा कुर्यस्याग्निहोत्र्युपावसृष्टा दु
ह्यमाना वाश्येतका तत्र प्रायश्चित्तिरित्यशनायां ह वा एषा यजमानस्य प्रति
ख्याय वाश्यते ताम न्नम पादये च्छांत्यै शांतिर्वा अन्नं सूयवसाद्भगवती हि भू
या इति सा तत्र प्रायश्चित्तिस्तदा कुर्यस्याग्निहोत्र्युपावसृष्टा दुह्यमाना स्पंदे ॥ ३ ॥
तका तत्र प्रायश्चित्तिरिति सा यत्तत्र स्कंदये त्तद भिमृश्य जपेद्यद द्य दुग्धं राम

पृथिवीमसृप्त यदोषधीरत्यसरद्यदापः॥ पयो गृहेषु पयो ऽ अघ्न्यायां पयो वत्से
य षु पयो ऽ अस्तु तन्मयीति तत्रैव सा रिशिष्टं स्यात्तेन जुहुयाद्यद्य च कृं होमाय स्याद्य
द्युवै सर्वं सिक्तं स्यादथान्यामादूय तां दुग्ध्वा तेन जुहुयादात्मैव श्रद्धयायै होत
व्यं सा तत्र प्रायश्चित्तिः॥ ३ ॥ तदा कुर्यस्य सायं दुग्धं सान्नाय्यं दुष्येद्वापह
रेद्वा का तत्र प्रायश्चित्तिरिति प्रातर्दुग्धं द्वैधं कृत्वा तत्स्यान्यतरां भक्तिमा
तच्यते न यजेत सा तत्र प्रायश्चित्तिस्तदा कुर्यस्य प्रातर्दुग्धं सान्नाय्यं दु
ष्येद्वापहरेद्वा का तत्र प्रायश्चित्तिरिसैंद्रं वा माहेंद्रं वा पुरोडाशं तस्यस्था
नेनिरुप्य तेन यजेत सा तत्र प्रायश्चित्तिस्तदा कुर्यस्य सर्वमेव सान्ना

प्रा० ७ ॥ यं दुष्येद्यपहरेद्वा का तत्र प्रायश्चित्तिरिसैंद्रं वामाहेंद्रं वेति समानं सा तत्र प्राय
॥ ४ ॥ श्चित्तिस्तदा कुर्यस्य सर्वाण्येव हवींषि दुष्येयुर्वापहरेयुर्वा का तत्र प्रायश्चि
त्तिरिसाज्यस्यैनानि यथादेवतं परिकल्प्य तयाज्य हविषेष्टाय जेतातोन्या
मिष्टिमनुल्बणां तन्वीत यज्ञोयज्ञस्य प्रायश्चित्तिः ॥ ४ ॥ तदा कुर्यस्याग्नि
होत्रमभिश्रितममेध्यमापद्येत का तत्र प्रायश्चित्तिरिति सर्वमेवैनत्स्रुच्य
भिपर्यासिच्य प्राङुदेत्याहवनीये हैतां समिधमभ्यादधात्यथोत्तरतऽआ
हवनीयस्योष्णं भस्म निरूह्य जुहुयान्मनसा वा प्राजापत्यया वर्चा लघु ॥ ४ ॥ राम्र
तं चाङ्गं चैतं सयव्येकस्मिं नुन्नीते यदि द्वयोरेषएव कल्पस्तत्रैवे द्व्यपन=

यिनं शक्नुयान्निष्पित्वे तद्दुष्टमदुष्टमभिपर्यासिच्य तस्य यथोन्नीती स्यात्तथा
जुहुयात्सा तत्र प्रायश्चित्तिस्तदा कुर्यस्याग्निहोत्रमधिश्रितं स्कंदति वावि
ष्यंदते वा का तत्र प्रायश्चित्तिरिति तदद्भिरुपनिनयेच्छांत्यै शांतिर्वाऽआपो
थै नद्दक्षिणेन पाणिनाभिमृश्य जपति दिवं तृतीयं देवान्यज्ञो गात्ततो
मा द्रविणमाष्टांतरिक्षं तृतीयं पितॄन्यज्ञो गात्ततो मा द्रविणमाष्टपृथिवीं
तृतीयं मनुष्यान्यज्ञो गात्ततो मा द्रविणमाष्ट यया रोजसा स्कभिता रजां
सीति वैष्णुवारुणीमृचं जपति विष्णुर्वै यज्ञस्य दुरिष्टं पाति वरुणः स्विष्टं
तयोरुभयोरेव शांत्यै सा तत्र प्रायश्चित्तिस्तदा कुर्यस्याग्निहोत्रमधि

श्रा॰ ७ ॥ श्चित्तं प्राद्रुदायस्तस्वलन्नेवापि वाभ्रंशन्नेकातत्र प्रायश्चित्तिरितिसयद्युपनिवर्तयेत्स्व
॥५॥ ॥ र्गाल्लोकाद्यजमानमावर्तयेद्दक्षिणास्माउपविष्टायैतमग्निहोत्रपरीशेषमाहरेयुस्तस्यय
थोन्नीतस्यात्तथा जुहुयात्सा तत्र प्रायश्चित्तिस्तदाहुर्यद्यपि दिस्कन्नेद्येन कातत्र
प्रायश्चित्तिरित्यन्यां स्रुचमात्त्वस जुहुयादथैतां स्कन्नामभिनामाहवनीयेभ्याद्ध्यात्प्रा
णदंडांप्रसस्पृष्कारांसा तत्र प्रायश्चित्तिस्तदाहुर्यस्याहवनीये हाग्निर्विध्येताथगार्हप
त्यउपशाम्येत्का तत्र प्रायश्चित्तिरिति सयदि प्रांचमुद्धरेदायतनाच्यवेत यत्प्रसंच
मस्कन्नं वद्य जंतन्नीतयन्नंथे द्वाल्लव्यं यजमानस्य जनयेद्यदनुगमयेत्प्राणाय जमा
नंजस्यात्सर्वमेवैनंसहभस्मानंसमोप्य गार्हपत्यायतनेनिधाय प्रांचमाहव
नीयमुद्धरेत्सा तत्र प्रायश्चित्तिः ॥ ५ ॥ तदाहुर्यस्याग्नावग्निमुद्धरेयुः कातत्र ॥ ५ ॥
प्रायश्चित्तिरितिसयद्यनुपश्येदुदूत्स्य पूर्वमपरं निदध्याद्यद्यनानुपश्ये- राम्

त्सोऽग्नयेग्निवते अष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये ऽग्निनाग्निः समिध्य
ते त्वं ह्यग्ने ऽग्निनेत्याहुतिं वाहवनीये जुहुयादग्नयेग्निवते स्वाहेति सा तत्र प्रायश्चि
त्तिस्तदाहुर्यस्य गार्हपत्याहवनीयौ मिथः संसृज्येयातां कातत्र प्रायश्चित्तिरिति
सोऽग्नये वीतये अष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये ऽग्न आया
हि वीतये यो अग्निं देववीतय इत्याहुतिं वाहवनीये जुहुयादग्नये वीतये स्वाहेति सा
तत्र प्रायश्चित्तिस्तदाहुर्यस्य सर्व एवाग्नयो मिथः संसृज्येरन्का तत्र प्रायश्चित्ति
रिति सोऽग्नये विविचये अष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये स्वर्णवस्तो
रुषसामरोचि त्वामग्ने मानुषीरीळते विश इत्याहुतिं वाहवनीये जुहुयाद
ग्नये विविचये स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नयो न्यैरग्नि

श्रा० ७ ॥
॥ ५ ॥

ग्निः संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये क्षामवते ष्टाकपालं पुरोडाशं निर्वपेत्तस्य
याज्यानुवाक्ये ऽअक्रंददग्निस्तनयन्निव द्यौर धायथा नः पितरः परास ऽइ साहुतिं वा
हवनीये जुहुयादग्नये क्षामवते स्वाहेति सा तत्र प्रायश्चित्तिः ॥ ५ ॥ तदाहुर्यस्याग्न
योर्ग्राम्येणाग्निना संदह्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये संवर्गाया ष्टाकपालं
पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये कुवित्सु नो गविष्टये मा नो अस्मिन्महाधन इ
त्याहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुर्यस्या
ग्नयो दिव्येनाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्नये प्सुमते ष्टाक
पालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये अप्स्वग्ने सधिष्टव यमोयोद ध्येमेधिरः ॥
पूतदक्ष इत्याहुतिं वाहवनीये जुहुयादग्नये प्सुमते स्वाहेति सा तत्र प्राय

५
रामः

श्चित्तिस्तदाहुर्यस्याग्नयः शवाग्निना संसृज्येरन्का तत्र प्रायश्चित्तिरिति सोऽग्न
ये शुचये ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये ऽअग्निः शुचिव्रत
तम उदग्ने शुचयस्तवेत्याहुतिं वाहवनीये जुहुयादग्नये शुचये स्वाहेति सा
तत्र प्रायश्चित्तिस्तदाहुर्यस्याग्नय ऽआरण्येनाग्निना संदह्येरन्का तत्र प्रायश्चित्ति
रिति समेवारोपयेदरणी वोल्मुकं वा मोक्षयेद्व्याहवनीयाच्चाद्विगार्हपत्यात्स्याद्यदि न
शक्नुयात्सोऽग्नये संवर्गायाष्टाकपालं पुरोडाशं निर्वपेत्तस्योक्ते याज्यानुवाक्ये
ऽआहुतिं वाहवनीये जुहुयादग्नये संवर्गाय स्वाहेति सा तत्र प्रायश्चित्तिः ॥ ७ ॥
तदाहुर्य ऽआहिताग्निरुपवसथे शुकुर्वरेत का तत्र प्रायश्चित्तिरिति सोऽग्न

श्रा० ७ ॥ येव्रतभृतेऽष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वमग्नेव्रतभृच्छुचिर्व्रतानि
७ ॥ बिभ्रद्धूतपा अदब्धइत्याहुतिंवाहवनीयेजुहुयादग्नयेव्रतभृतेस्वाहेतिसात
त्रप्रायश्चित्तिस्तदाहुर्यऽआहिताग्निरुपवसथेव्रतंसमापयेत्कातत्रप्रायश्चित्ति
रितिसोऽग्नयेव्रतपतयेऽष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येत्वम
ग्नेव्रतपाअसियद्धोवयंप्रमिनामव्रतानीत्याहुतिंवाहवनीयेजुहुयादग्नयेव्र
तपतयेस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यऽआहिताग्निरमावास्यांपौर्णमा
सींवातीयात्कातत्रप्रायश्चित्तिरितिसोऽग्नयेपथिकृतेऽष्टाकपालंपुरोळा
शंनिर्वपेत्तस्ययाज्यानुवाक्येवेत्थाहिवेधोऽअध्वनःऽआदेवानामपिपं ॥ ७ ॥ राम
थामगन्मेत्याहुतिंवाहवनीयेजुहुयादग्नयेपथिकृतेस्वाहेतिसातत्रप्रा

यश्चित्तिस्तदाहुर्यस्यसर्वएवाग्नयउपशाम्येरन्कातत्रप्रायश्चित्तिरितिसोऽग्नयेत
पस्वतेजनद्वतेपावकवतेऽष्टाकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येऽ
आयाहितपसाजनेष्वानोयाहितपसाजनेष्वित्याहुतिंवाहवनीयेजुहुयाद
ग्नयेतपस्वतेजनद्वतेपावकवतेस्वाहेतिसातत्रप्रायश्चित्तिः ॥ ८ ॥ तदाहु
र्यऽआहिताग्निराग्नयणेनानिष्ट्वानवान्नंप्राश्नीयात्कातत्रप्रायश्चित्तिरितिसोऽग्न
श येवैश्वानरायद्वादशकपालंपुरोळाशंनिर्वपेत्तस्ययाज्यानुवाक्येवैश्वानरोऽअ नु×
जीजनत्स्पृष्टोदिविपृष्टोऽअग्निःपृथिव्यामित्याहुतिंवाहवनीयेजुहुयादग्नये
वैश्वानरायस्वाहेतिसातत्रप्रायश्चित्तिस्तदाहुर्यऽआहिताग्निर्यदिकपालं
नश्येत्कातत्रप्रायश्चित्तिरितिसोऽश्विभ्यांद्विकपालंपुरोळाशंनिर्वपेत्तस्य

प्रा० ७॥ याज्यानुवाक्येऽअश्विनावर्तिरस्मदागोमता नासत्या रथेने त्याहुतिं वाहवनीये जु
९ ॥ हुयादश्विभ्यां स्वाहेति सा तत्र प्रायश्चित्तिस्तदा कुर्येऽआहिताग्निर्यदि पवित्रं नश्ये
त्का तत्र प्रायश्चित्तिरिति सोऽग्नये पवित्रवते ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्या
वि नुवाक्ये पवित्रं ते विततं ब्रह्मणस्पते तपोष्पवित्रं विततं दिवस्पदऽइत्याहुतिं वाह
वनीये जुहुयादग्नये पवित्रवते स्वाहेति सा तत्र प्रायश्चित्तिस्तदा कुर्येऽआहिता
ग्निर्यदि हिरण्यं नश्येत्का तत्र प्रायश्चित्तिरिति सोऽग्नये हिरण्यवते ष्टाकपालं
पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये हिरण्यकेशो रजसो विसारऽआते ॥ गजा ॥
सुपर्णा अमिनंतऽएवैरित्याहुतिं वाहवनीये जुहुयादग्नये हिरण्यवते स्वा ॥
हेति सा तत्र प्रायश्चित्तिस्तदा कुर्येऽआहिताग्निर्यदि प्रातरस्नातोऽग्निहोत्रं

जुहुयात्का तत्र प्रायश्चित्तिरिति सोऽग्नये वरुणाय ष्टाकपालं पुरोडाशं निर्वपेत्त
स्य याज्यानुवाक्ये त्वं नोऽअग्ने वरुणस्य विद्वान्स त्वं नोऽअग्ने वमो भवोतीत्याहुतिं
वाहवनीये जुहुयादग्नये वरुणाय स्वाहेति सा तत्र प्रायश्चित्तिस्तदा कुर्येऽआ
हिताग्निर्यदि सूतकान्नं प्राश्नीयात्का तत्र प्रायश्चित्तिरिति सोऽग्नये तंतुम
ते ष्टाकपालं पुरोडाशं निर्वपेत्तस्य याज्यानुवाक्ये तंतुं तन्वन्रजसो भानु
मन्विह्यक्षान होनह्यत नोत सोम्या इत्याहुतिं वाहवनीये जुहुयादग्नये तंतु
मते स्वाहेति सा तत्र प्रायश्चित्तिस्तदा कुर्यआहिताग्निर्जरैवम्रत शब्दं श्रु
त्वा का तत्र प्रायश्चित्तिरिति सोऽग्नये सुरभिमते ष्टाकपालं पुरोडाशं
निर्वपेत्तस्य याज्यानुवाक्ये अग्निर्होता न्यसीदद्यजीयान्त्साध्वीमक

श्री० ७ ॥ ईवबीतिंनो अद्येत्याहुतिं वाहवनीये जुहुयादग्नये सुरभिमते स्वाहेति सा तत्र प्रा
॥ १० ॥ यश्चित्तिस्तदाहुर्यऽआहिताग्नेर्यस्य भार्या गौर्वा यमौ जनयेत्का तत्र प्रायश्चि
त्तिरिति साग्नये मरुत्वते त्रयोदशकपालं पुरोडाशं निर्वपेत्तस्य याज्यानु
वाक्ये मरुतो यस्य हि क्षये राऽ इवेद चरमाऽअहेवे त्याहुतिं वाहवनीये जुहुया
दग्नये मरुत्वते स्वाहेति सा तत्र प्रायश्चित्तिस्तदाहुः पत्नीकोऽप्यग्निहोत्र
माहरे ३ त्र ॥ नाहरे ३ दृइति ॥ आहरेदित्याहुर्यदि नाहरेदनद्धा पुरुषः को
नद्धा पुरुष इति न देवान्न पितॄन्न मनुष्यानिति तस्मादपत्नीकोऽप्यग्निहोत्रमाहरे ॥ गजा० ॥
तदेषाभियज्ञगाथा गीयते ॥ यजेत सौत्रामण्यामपत्नीकोऽप्य सोमपः ॥ माता ॥ १ ॥
पितृभ्यामनृणाथीद्यजेति वचनाच्छ्रुतिरिति तस्मात्सोम्यं याजयेत् ॥ १ ॥

×नचैत्रा

तदाहुर्वाचापत्नीकोऽग्निहोत्रं कथमेव जुहोतीति विश्लिष्टतापत्नी नष्टा वाग्निहोत्रं क
थमग्निहोत्रं जुहोति पुत्रान्नप्तॄनित्याहुरस्मिंश्च लोकेऽमुष्मिंश्चास्मिंल्लोके यं स्व
र्गो स्वर्गेण स्वर्गं लोकमारोहयत्यमुष्मैवलोकस्य संततिं धारयतीति यस्यैषापत
त्नीनैच्छेत्तस्मादपत्नीकस्याधानं कुर्वीत्यपत्नीकोऽग्निहोत्रं कथमग्निहोत्रं जु
होति श्रद्धा पत्नी सत्यं यजमानः श्रद्धा सत्यं तदित्युत्तमं मिथुनं श्रद्धया सत्ये
न मिथुनेन स्वर्गांल्लोकाञ्जयतीति ॥ १० ॥ तदाहुर्यद्दर्शपूर्णमासयोरुपवसति
न ह वा अव्रतस्य देवा हविरश्नन्ति तस्मादुपवसत्युत मे देवा हविरश्नीयुरिति पूर्वां
पौर्णमासीमुपवसेदिति पैंग्यमुत्तरामिति कौषीतकं या पूर्वा पौर्णमासी सानु
मतिर्योत्तरा सा राका या पूर्वामावास्या सा सिनीवाली योत्तरा सा कुहूर्योपर्य

ब्रा० ७ ॥ स्तमियादभ्युदियादितिसातिथिः पूर्वांपौर्णमासीमुपवसेदनिर्ज्ञायपुरस्तादमावास्या
११ ॥ यांचंद्रमसंयदुपैतियष्वजतेतेनसोमंक्रीणंतितिनोत्तरामुत्तरामुपवसेदुत्तराणिह
वैसोमायजनतेसोममनुदैवतमेतद्धैदेवसोमंयच्चंद्रमास्तस्मादुत्तरामुपवसेत् ॥ ११ ॥
तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदियाद्वाभ्यस्तमियाद्वाप्रणीतोवाप्राग्घो
मादुपशाम्येत्कातत्रप्रायश्चित्तिरितिहिरण्यंपुरस्कृत्यसायमुद्धरेज्ज्योतिर्वैशु
क्रंहिरण्यंज्योतिःशुक्रमसौतदेवतज्ज्योतिःशुक्रंपश्यन्नुद्धरतिरजतमंतर्धाय ॥ गजा०
प्रातरुद्धरेदेतद्रात्रिरूपंपुरासंभेदाच्छायानामाहवनीयमुद्धरेन्मृत्युर्वैतम
श्छायातेनैवतज्ज्योतिषामृत्युंतमश्छायांतरतिसातत्रप्रायश्चित्तिस्तदाहु ॥ १२ ॥
र्यस्यगार्हपत्याहवनीयावंतरेणानोवारथोवाश्वावाप्रतिपद्येतकातत्रप्रा

यश्चित्तिरितिनैतन्मनसिकुर्यादित्याहुरात्मन्यस्यहिताभवंतीतितच्चेन्मनसिकु
र्वीतगार्हपत्यादविच्छिन्नामुदकधारांहरेत्तंतुंतन्वन्रजसोभानुमन्विहीत्याह
वनीयात्सातत्रप्रायश्चित्तिस्तदाहुःकथमग्नीनन्वादध्यानोन्वाहार्यपचनमाहार
ये३त् ॥ नाहारये३दिति ॥ आहारयेदित्याहुःप्राणान्वाएषोभ्यात्मंधत्तेयो
ग्नीनाधत्तेतेषामेषोन्नादतमोभवतियदन्वाहार्यपचनस्तस्मिन्नेतामाहुतिं
जुहोत्यग्नयेन्नादायान्नपतयेस्वाहेत्यन्नादोहान्नपतिर्भवत्यश्नुतेप्रजयां
नाद्यंयएवंवेदांतरेणगार्हपत्याहवनीयौहाप्युत्संचरेतैतेनहवाऽएनंसं
चरमाणमग्नयोविदुरयमस्मासुहोष्यतीतितेनहवाअस्यसंचरमाणस्य
गार्हपत्याहवनीयौपाप्मानमपहतःसोपहतपाप्मोर्ध्वःस्वर्गंलोकमेतीति

ब्रा० ७ ॥ वैब्राह्मणमुदाहरंतीति तदाहुः कथमग्नीनन्ववत्स्यंनुपतिष्ठेतप्राप्यवाप्रसेत्याहरहर्वै

११ ॥ तितूष्णीमित्याहुस्तूष्णींवैश्रेयसऽआकांक्षंतेथाप्याहुरहर्वाएतेयजमानस्या रह २

श्रेस्येयोद्वासनात्प्रप्लावनाद्बिभ्यति तानुपतिष्ठेतैवाभयंवोऽभयंमेस्त्विति सभ

४ वास्मै यंहैवास्मैभवत्यभयंहैभवति ११ ॥१२॥ इतिसप्त० द्वितीयोध्यायः ॥ हरि

श्चंद्रोहवैधसऽऐक्ष्वाकोराजापुत्रआसतस्यहशतंजायाबभूवुस्तासुपुत्रं

नलेभेतस्यहपर्वतनारदौगृहऊषतुःसहनारदंपप्रछयन्विमंपुत्रमिच्छंति

येविजानंतियेचन ॥ किंस्वित्पुत्रेणविंदतेतन्मऽआचक्ष्वनारदेतिसएकयापृष्टो ॥ गजा० ॥

दशभिःप्रत्युवाच ॥ ऋणमस्मिन्संनयत्यमृतत्वंचगच्छति ॥ पितापुत्रस्यजात ॥ ११ ॥

स्यपश्येच्चेज्जीवतोमुखं ॥ यावंतःपृथिव्यांभोगायावंतोजातवेदसि ॥ या

वंतोऽअप्सुप्राणिनांभूयान्पुत्रेपितुस्ततः ॥ शश्वत्पुत्रेणपितरोत्यायन्बहुलंतमः ॥ आ

त्माहिजज्ञऽआत्मनःसइरावत्यतितारिणी ॥ किंनुमलंकिमजिनंकिमुश्मश्रूणिकिं

तपः ॥ पुत्रंब्रह्माणइच्छध्वंसवैलोकोवदावदः ॥ अन्नंहप्राणःशरणंहवासोरूपं

हिरण्यंपशवोविवाहाः ॥ सखाहजायाकृपणंहदुहिताज्योतिर्हपुत्रःपरमेव्योम

न् ॥ पतिर्जायांप्रविशतिगर्भोभूत्वासमातरं ॥ तस्यांपुनर्नवोभूत्वादशमेमासिजा

यते ॥ तज्जायाजायाभवतियदस्यांजायतेपुनः ॥ आभूतिरेषाभूतिर्बीजमेतन्नि

धीयते ॥ देवाश्चैतामृषयश्चतेजःसमभरन्महत् ॥ देवामनुष्यानब्रुवन्नेषावो

जननीपुनः ॥ नापुत्रस्यलोकोस्तीतितत्सर्वेपशवोविदुः ॥ तस्माच्चुपुत्रोमा

स्वसारं तरंचाधिरोहति ॥ एषपंथाऽउरुगायःसुशेवोयंपुत्रिणऽआक्रमंतेविशोकाः ॥

ब्रा० ७ ॥ तंपश्यंतिपशवोवयांसिचतस्मात्तेमात्रापिमिथुनीभवंतीतिहस्माऽआख्याय
॥१२ ॥ ॥१ ॥ १३ ॥ अथैनमुवाचवरुणंराजानमुपधावपुत्रोमेजायतांतेनत्वायजाइ
तितथेतिसवरुणंराजानमुपससारपुत्रोमेजायतांतेनत्वायजाइतितथेतितस्य
हपुत्रोजज्ञेरोहितोनामतंहोवाचाजनिवैतेपुत्रोयजस्वमानेनेतिसहोवाच
यदावैपशुर्निर्दशोभवत्यथसमेध्योभवतिनिर्दशोन्वस्त्वथत्वायजाइ
२ तथेति तिसहनिर्दशऽआसतंहोवाचनिर्दशोन्वभूद्यजस्वमानेनेतिसहोवाच ॥ राजा०
यदावैपशोर्दंताजायंतेथसमेध्योभवतिदंतान्वस्यजायंतामथत्वायजा ॥ १२ ॥
इतितथेतितस्यहदंताजज्ञिरेतंहोवाचाज्ञतवाऽअस्यदंतायजस्वमा

नेनेतिसहोवाचयदावैपशोर्दंताःपद्यंतेथसमेध्योभवतिदंतान्वस्यपद्यंता
मथत्वायजाइतितथेतितस्यहदंताःपेदिरेतंहोवाचापत्सतवाऽअस्यदंता
यजस्वमानेनेतिसहोवाचयदावैपशोर्दंताःपुनर्जायंतेथसमेध्योभवति
दंतान्वस्यपुनर्जायंतामथत्वायजाइतितथेतितस्यहदंताःपुनर्जज्ञिरेतं
होवाचाज्ञतवाऽअस्यपुनर्दंतायजस्वमानेनेतिसहोवाचयदावैक्षत्रियः
सान्नाहुकोभवत्यथसमेध्योभवतिसंनाहंनुप्राप्नोत्वथत्वायजाइतितथे
तिसहसंनाहंप्रापत्तंहोवाचसंनाहंनुप्रापद्यजस्वमानेनेतिसतथेत्यु
क्त्वापुत्रमामंत्रयामासततायंवैमह्यंत्वामददाद्धंतत्वयाहमिमंयजाऽइति
सहनेत्युक्त्वाधनुरादायारण्यमपातस्थौससंवत्सरमरण्येचचार ॥ १४ ॥

ब्रा० ७ ॥ अथ हैक्ष्वाकं वरुणो जग्राह तस्य होदरं जज्ञे तदु ह रोहितः शुश्राव सोऽरण्याद्ग्रा
॥ १३ ॥ ममेयाय तमिंद्रः पुरुषरूपेण पर्येत्योवाच ॥ नानाश्रांताय श्रीरस्तीति रोहित
शुश्रुम ॥ पापो नृषद्वरो जन इंद्र इच्चरतः सखा चरैवेति वै मा ब्राह्मणो वोच चरैवेति
दिति ह ॥ द्वितीयं संवत्सरमरण्ये चचार सोऽरण्याद्ग्राममेयाय तमिंद्रः पुरुषरू
पेण पर्येत्योवाच ॥ पुष्पिण्यौ चरतो जंघे भूष्णुरात्मा फलग्रहिः ॥ शेरेऽस्य स
र्वे पाप्मानः श्रमेण प्रपथे हताश्चरैवेति चरैवेति वै मा ब्राह्मणो वाचदिति ह ॥
तृतीयं संवत्सरमरण्ये चचार सोऽरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण ॥ राजा० ॥
पर्येत्योवाच ॥ आस्ते भग आसीनस्योर्ध्वस्तिष्ठति तिष्ठतः ॥ शेते निपद्य ॥ १३ ॥
मानस्य चराति चरतो भग श्चरैवेति चरैवेति वै मा ब्राह्मणो वाचदिति

ह ॥ चतुर्थं संवत्सरमरण्ये चचार सोऽरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण पर्ये
त्योवाच ॥ कलिः शयानो भवति संजिहानस्तु द्वापरः ॥ उत्तिष्ठंस्त्रेता भव
ति कृतं संपद्यते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो वोचदिति ह ॥ पं
चमं संवत्सरमरण्ये चचार सोऽरण्याद्ग्राममेयाय तमिंद्रः पुरुषरूपेण प
र्येत्योवाच ॥ चरन्वै मधु विंदति चरन्स्वादुमुदुंबरं ॥ सूर्यस्य पश्य श्रेमा
णं यो न तंद्रयते चरंश्चरैवेति चरैवेति वै मा ब्राह्मणो वाचदिति ह ॥ ष
ष्ठं संवत्सरमरण्ये चचार सोऽजीगर्तं सौयवसिमृषिमशनया परीतम
रण्य उपेयाय तस्य ह त्रयः पुत्रा आसुः शुनःपुच्छः शुनःशेपः शुनोलां
गूल इति तं होवाचर्षेऽहं ते शतं ददाम्यहमेषामेकेनात्मानं निष्क्रीणा

ब्रा० ७ ॥ इतिसज्येष्ठंपुत्रंनिगृह्णानउवाचनन्विममितिनोऽएवेममितिकनिष्ठंमाता
॥ १४ ॥ तौहमध्यमेसंपादयांचक्रतुःशुनःशेपेतस्यहशतंदत्वासतमादायसोरण्या
द्ग्राममेयायसपितरमेत्योवाचततहंताहमनेनात्मानंनिष्क्रीणाइतिस
वरुणंराजानमुपससारानेनत्वायजाइतितथेतिभूयान्वैब्राह्मणःक्ष
त्रियादितिवरुणउवाचतस्माएतंराजसूयंयज्ञक्रतुंप्रोवाचतमेतम
भिषेचनीयेपुरुषंपशुमालेभे ॥ १५ ॥ तस्यहविश्वामित्रोहोतासीज्जम
दग्निरध्वर्युर्वसिष्ठोब्रह्मायास्यउद्गातातस्माऽउपाकृतायनियोक्ता
रंनविविदुःसहोवाचाजीगर्तःसौयवसिर्मह्यमपरंशतंदत्ताहमेनं ॥ गजा० ॥
नियोक्ष्यामीतितस्माऽअपरंशतंददुस्तंसनिनियोजतस्माऽउपा ॥ १४ ॥

कृतायनियुक्तायाप्रीतायपर्यग्निकृतायविशसितारंनविविदुःसहोवाचा
जीगर्तःसौयवसिर्मह्यमपरंशतंदत्ताहमेनंविशसिष्यामीतितस्माअपरं
शतंददुःसोसिंनिःशानएयायाथहशुनःशेपईक्षांचक्रेमानुषमिववै
माविशसिष्यंतिहंताहंदेवताऽउपधावामीतिसप्रजापतिमेवप्रथमंदेवता
नामुपससारकस्यनूनंकतमस्यामृतानामित्येतयर्चातंप्रजापतिरुवा
चाग्निर्वैदेवानांनेदिष्ठस्तमेवोपधावेतिसोग्निमुपससाराग्नेर्वयंप्रथ
मस्यामृतानामित्येतयर्चातमग्निरुवाचसवितावैप्रसवानामीशेतमेवोपधा
वेतिससवितारमुपससाराभित्वादेवसवितरित्येतेनतृचेनतंसवितोवाच
वरुणायवैराज्ञेनियुक्तोसितमेवोपधावेतिसवरुणंराजानमुपससार।

श्री०७॥
॥१९॥

म उत्तराभिरेकत्रिंशतातंवरुणउवाचाग्निर्वैदेवानांमुखंसुहृदयतमस्तंनुस्तु
ह्यथत्वोत्स्रक्ष्यामइतिसोग्निंतुष्टावतउत्तराभिर्द्वाविंशत्यातमग्निरुवाचवि
श्वान्नुदेवान्स्तुह्यथत्वोत्स्रक्ष्यामइतिसविश्वांदेवांस्तुष्टावनमोमहद्भ्योनमो
अर्भकेभ्यइत्येतयर्चातंविश्वेदेवाऊचुरिंद्रोवैदेवानामोजिष्ठोबलिष्ठःसहि
ष्ठःसत्तमःपारयिष्णुतमस्तंनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसइंद्रंतुष्टाव
यच्चिद्धिसत्यसोमपाइतिचैतेनसूक्तेनोत्तरस्यचपंचदशभिस्तस्माइं
द्रस्तूयमानःप्रीतोमनसाहिरण्यरथंददौतमेतयाप्रतीयायशश्वदिंद्र
इतितमिंद्रउवाचाश्विनौनुस्तुह्यथत्वोत्स्रक्ष्यामइतिसोश्विनौतुष्टा ॥गजा
वातउत्तरेणतृचेनतमाश्विनाऊचतुरुषसंनुस्तुह्यथत्वोत्स्रक्ष्या ॥१९॥

मइतिसउषसंतुष्टावतउत्तरेणतृचेनतस्यहस्मर्च्यृच्युक्तायांविपाशोमु
मुचेकनीयऐक्ष्वाकस्योदरंभवत्युत्तमस्यामेवर्च्युक्तायांविपाशोमुमुचे
गदऐक्ष्वाकआस॥१६॥तमृत्विजऊचुस्त्वमेवनोस्याह्नःसंस्थामधिग
च्छेत्यथहैतंशुनःशेपोंजःसवंददर्शतमेताभिश्चतसृभिरभिसुषा
वयच्चिद्धित्वंगृहेगृहइत्यथैनंद्रोणकलशमभ्यवनिनायोच्छिष्टंच
म्वोर्भरेत्येतयर्चाथहास्मिन्नन्वारब्धेपूर्वाभिश्चतसृभिःसस्वाहाका
राभिर्जुहवांचकाराथैनमवभृथमभ्यवनिनायत्वंनोअग्नेवरुणस्यविद्वानि
त्येताभ्यामथैनमतऊर्ध्वमग्निमाहवनीयमुपस्थापयांचकारशुनश्चिच्छे
पंनिहितंसहस्रादित्यथहशुनःशेपोविश्वामित्रस्यांकमाससादसहोवाचा

ब्रा० ७ ।
१६ ।

जीगर्तस्सौयवसिः शुनःशेपपुनर्मे पुत्रं देहीति नेति होवाच विश्वामित्रो देवा वा इमं मह्यम
रासतेति स ह देवरातो वैश्वामित्र आस तस्यैते कापिलेयबाभ्रवाः स होवाचाजी
गर्तः सौयवसिस्त्वं वेहि विह्वयावहा इति स होवाचाजीगर्तः सौयवसिराङ्गिरसो ज
न्मनास्याजीगर्तिः श्रुतः कविः । शुनःशेप पैतामहात्तन्तोर्मापगाः पुनरेहि मामिति स
होवाच शुनःशेपोऽदर्शुस्त्वा शासहस्तं न यच्छूद्रेष्वलप्सत । गवां त्रीणि शता
नि त्वमवृणीथा मदङ्गिर इति स होवाचाजीगर्तः सौयवसिस्तद्वै मा तात तपति पापं
कर्म मया कृतं । तदहं निह्नवे तुभ्यं प्रतियन्तु शता गवामिति स होवाच शुनःशेपो यः
सकृत्पापकं कुर्यात्कुर्यादेनत्ततोऽपरं । नापागाः शौद्रान्न्यायादसंधेयं त्वया कृ
तमिति असंधेयमिति ह विश्वामित्र उपपपाद स होवाच विश्वामित्रो भीम एव सौयव
सिः शासेन विशिशासिषुः । अस्थान्मैतस्य पुत्रोभूर्ममैवोपेहि पुत्रतामिति

।।ग जा०।।
।। १६ ।।

स होवाच शुनःशेपः स वै यथा नो ज्ञपया राजपुत्र तथा वद । यथैवाङ्गिरसः सन्नुपे
यां तव पुत्रतामिति स होवाच विश्वामित्रो ज्येष्ठो मे त्वं पुत्राणां स्यास्तव श्रेष्ठा प्र
जा स्यात् । उपेया दैवं मे दायं तेन वै त्वोपमन्त्रय इति स होवाच शुनःशेपः संज्ञाना
नेषु वै ब्रूयात्सौहार्दाय मे श्रियै । यथाहं भरतऋषभोपेयां तव पुत्रतामि
त्यथ ह विश्वामित्रः पुत्रानामन्त्रयामास मधुच्छन्दाः शृणोतन ऋषभो रेणुरष्ट
कः । ये के च भ्रातरः स्थनास्मै ज्यैष्ठ्याय कल्पध्वमिति । १७ । तस्य ह विश्वामित्रस्यै
कशतं पुत्रा आसुः पञ्चाशदेव ज्यायांसो मधुच्छन्दसः पञ्चाशत्कनीयांसस्तद्ये
ज्यायांसो न ते कुशलं मेनिरे तानन्व्याजहारान्तान्वः प्रजा भक्षीष्टेति त एतेऽन्ध्राः
पुण्ड्राः शबराः पुलिन्दा मूतिबा इत्युदन्त्या बहवो भवन्ति वैश्वामित्रा दस्यूनां भू
यिष्ठाः स होवाच मधुच्छन्दाः पञ्चाशता सार्धं यन्नः पिता संजानीते तस्मिं

ब्रा०७ ॥
१७ ॥

स्तिष्ठामहे वयं ॥ पुरस्त्वा सर्वे कुर्महे त्वामन्वंचो वयं स्मसीत्यथ ह विश्वामित्रः प्रती
तः पुत्रांस्तुष्टाव ते वै पुत्राः पशुमंतो वीरवंतो भविष्यथ ॥ ये मानं मे नुगृह्णंतो वीरवंतमकर्त
मा ॥ पुरऽएत्रा वीरवंतो देवरातेन गाथिनाः ॥ सर्वे राध्याः स्थ पुत्रा एष वः सद्विवाचनं
॥ एष वः कुशिका वीरो देवरातस्तमन्वित ॥ युष्मांश्च दायं मऽउपेता विद्यां यामु च विद्म
सि ॥ ते सम्यंचो वै विश्वामित्राः सर्वे साकं सरातयः ॥ देवराताय तस्थिरे धृत्यै श्रैष्ठ्या
य गाथिनाः ॥ अधीयत देवरातो रिक्थयोरुभयोर्ऋषिः ॥ जह्नूनां चाधिपत्ये दैवे वे
दे च गाथिनां ॥ तदेतत्परऋक्शतगाथं शौनःशेपमाख्यानं तत्होता राज्ञेऽभिषि
क्ताया चष्टे हिरण्यकशिपावासीनऽआचष्टे हिरण्यकशिपावासीनः प्रति
गृणाति यशो वै हिरण्यं यशसैवैनं तत्समर्धयत्योमित्यृचः प्रतिगरऽएवं तथे
ति गाथायाऽओमिति वै दैवं तथेति मानुषं दैवेन चैवैनं तन्मानुषेण च पापा

या
त२

॥ ग जा० ॥
१७ ॥

देनसः प्रमुंचति तस्माद्यो राजा विजिती स्यादप्ययजमानऽआख्यापयेतैवेत
च्छौनःशेपमाख्यानं न हास्मिन्नल्पं चनैनः परिशिष्यते सहस्रमाख्यात्रे दद्यात्छ
तं प्रतिगरित्रऽएते चैवासने श्वेतश्चाश्वतरीरथो होतुः पुत्रकामा हाप्याख्यापये
रँल्लभंते ह पुत्रांल्लभंते ह पुत्रान् ॥ १८ ॥ इति तृतीयो ध्यायः ॥ प्रजापतिर्यज्ञ
मसृजत यज्ञं सृष्टमनु ब्रह्मक्षत्रे असृज्येतां ब्रह्मक्षत्रे अनु द्वय्यः प्रजा असृज्यं
नहुतादश्चाहुतादश्च ब्रह्मैवानु हुतादः क्षत्रमन्वहुताद एता वै प्रजा हुता
दो यद्ब्राह्मणा अथैता अहुतादो यद्राजन्यो वैश्यः शूद्रस्ताभ्यो यज्ञ उदक्रा
मत्तं ब्रह्मक्षत्रे अन्वैतां यान्येव ब्रह्मण आयुधानि तैर्ब्रह्मान्वैद्यानि
क्षत्रस्य तैः क्षत्रमेतानि वै ब्रह्मण आयुधानि यद्यज्ञायुधान्यथैतानि

ऐ०ब्रा०७ ॥१८॥

क्षत्रस्यायुधानि यदश्वरथः कवचइषुधन्व तं क्षत्रमनन्वाभज्य न्यावर्ततायुधेभ्यो ह्यस्माद्
विजमानः पराङिवैत्सथैनं ब्रह्मान्वैत्तमाप्नोत्तमाप्त्वा परस्तान्निरुध्यातिष्ठत्सऽ
आप्तः परस्तान्निरुद्धस्तिष्ठञ्ज्ञात्वा स्वान्यायुधानि ब्रह्मोपावर्तत तस्माद्ध्याप्ये
तर्हि यज्ञो ब्रह्मण्येव ब्राह्मणेषु प्रतिष्ठितोऽथैनत्क्षत्रमन्वागच्छत्तदब्रवीदुप
मास्मिन्ह्वयस्वेति तत्तथेत्यब्रवीत्तद्वै निधाय स्वान्यायुधानि ब्रह्मण एवायु
धैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तस्वेति तथेति तत्क्षत्रं निधाय स्वान्या
युधानि ब्रह्मण एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तत तस्माद्ध्या
प्येतर्हि क्षत्रियो यजमानो निधायैव स्वान्यायुधानि ब्रह्मण एवायुधैर्ब्रह्म ॥१८॥
णो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तते ॥१॥१९॥ अथातो देवयज

राम

नस्यैव याच्ञा ब्रह्मणो राजन्यो वैश्यो दीक्षिष्यमाणः क्षत्रियं देवयजनं
याचति कं क्षत्रियो याचेदिति दैवं क्षत्रं याचेदित्याहुरादित्यो वै दैवं क्षत्रमादित्य ए
षां भूतानामधिपतिः स यदहर्दीक्षिष्यमाणो भवति तदहः पूर्वाह्ण एवोद्यन्त
मादित्यमुपतिष्ठेतेदं श्रेष्ठं ज्योतिषां ज्योतिरुत्तमं ॥ देव सवितर्देवयजनं मे देहि
देवयज्याया इति देवयजनं याचति स यत्तत्र याचित उत्तरां सर्पत्यों तथा ददामीति है
व तदाह तस्य ह न काचन रिष्टिर्भवति देवेन सवित्रा प्रसूतस्योत्तरोत्तरिणी ह श्रीर्यम
श्नुतेऽश्नुते ह प्रजानामैश्वर्यमाधिपत्यं य एवमुपस्थाय याचित्वा देवयजनमध्यवसाय
दीक्षते क्षत्रियः सन् ॥२॥२०॥ अथात इष्टापूर्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य
स पुरस्ताद्दीक्षाया आहुतिं जुहुयाच्चतुर्गृहीतमाज्यमाहवनीयेऽष्टापूर्तस्यापरिज्यान्यै पुनर्न

वि

२

श्री० ७ ॥
॥ १० ॥

इंद्रो मघवा ददातु ॥ ब्रह्म पुनरिष्टं पूर्तं दात्स्वाहेत्यथानूबंध्यायै समिष्टयजुषामु
परिष्टाज्जुहुयादग्निर्जातवेदा ददातु ॥ क्षत्रं पुनरिष्टं पूर्तं दात्स्वाहेति सैषेष्टा
पूर्तस्यापरिज्यानिः क्षत्रियस्य यजमानस्य यदेते आहुती तस्मादेते होतव्ये ॥ ३ ॥
॥ २१ ॥ तदु स्माह सौजात आराळ्हिरजीतपुनर्वण्यं वा एतद्यदेते आहुती इति यथा
ह कामयेत तथैते कुर्याद्य इतो नुशासनं कुर्यादितीमे त्वेव जुहुयाद्ब्रह्म प्रपद्ये ब्रह्म
मा क्षत्राद्गोपायतु ब्रह्मणे स्वाहेति तत्तदिति ॥ ब्रह्म वा एष प्रपद्यते यो यज्ञं प्र
पद्यते ब्रह्म वै यज्ञो यज्ञाद्ध वा एष पुनर्जायते यो दीक्षते तं ब्रह्म प्रपन्नं क्षत्रं न प
रिजिनाति ब्रह्म मा क्षत्राद्गोपायत्वित्याह यथैनं ब्रह्म क्षत्राद्गोपायेद्ब्रह्मणे स्वा
हेति तदेनत्प्रीणाति तदेनत्प्रीतं क्षत्राद्गोपायत्यथानूबंध्यायै समिष्टयजुषा

ह दे ४ ॥ रा जा ० त २९

मुपरिष्टात्क्षत्रं प्रपद्ये क्षत्रं मा ब्रह्मणो गोपायतु क्षत्राय स्वाहेति तत्तदिति ॥ क्षत्रं
वा एष प्रपद्यते यो राष्ट्रं प्रपद्यते क्षत्रं हि राष्ट्रं तं क्षत्रं प्रपन्नं ब्रह्म न परिजिनाति क्ष
त्रं मा ब्रह्मणो गोपायत्वित्याह यथैनं क्षत्रं ब्रह्मणो गोपायेत्क्षत्राय स्वाहेति तदेन
त्प्रीणाति तदेनत्प्रीतं ब्रह्मणो गोपायति सैषेष्टापूर्तस्यैवापरिज्यानिः क्षत्रियस्य
यजमानस्य यदेते आहुती तस्मादेते एव होतव्ये ॥ ४ ॥ २२ ॥ अथैंद्रो वै देवतया
क्षत्रियो भवति त्रैष्टुभश्छंदसा पंचदशस्तोमेन सोमो राज्येन राजन्यो बंधुना
स ह दीक्षमाण एव ब्राह्मणतामभ्युपैति यत्कृष्णाजिनमध्यूहति यद्दीक्षि
तव्रतं चरति यदेनं ब्राह्मणा अभिसंगच्छंते तस्य ह दीक्षमाणस्येंद्र एवेंद्रि
यमादत्ते त्रिष्टुब्वीर्यं पंचदशस्तोम आयुः सोमो राज्यं पितरो यशस्कीर्तिं

श्री० ७॥
॥ २० ॥

मन्यो वा अयमस्मद्भवति ब्रह्म वा अयं भवति ब्रह्म वा अयमुपावर्तन्त इति वदंतः स
पुरस्ताद्दीक्षाया आहुतिं हुत्वाहवनीयमुपतिष्ठेत नेंद्राद्देवताया एमि न त्रिष्टुभ
श्छंदसो न पंचदशात्स्तोमान्न सोमाद्राज्ञो न पित्र्याद्बंधोर्मा म इंद्र इंद्रियमादित्तेमा
त्रिष्टुप्वीर्यं मा पंचदशस्तोम आयुर्मा सोमो राज्यं मा पितरो यशस्कीर्तिं सहेंद्रि
येण वीर्येणायुषा राज्येन यशसा बंधुनाग्निं देवतामुपैमि गायत्रीं छंदस्त्रिवृ
तं स्तोमं सोमं राजानं ब्रह्म प्रपद्ये ब्राह्मणो भवामीति तस्य हेनेंद्र इंद्रिय
मादत्ते न त्रिष्टुप्वीर्यं न पंचदशस्तोम आयुर्न सोमो राज्यं न पितरो यशस्की
र्तिं य एवमेता आहुतिं हुत्वाहवनीयमुपस्थाय दीक्षते क्षत्रियः सन् ॥ ५ ॥
॥ २३ ॥ आथाग्नेयो वै देवतया क्षत्रियो दीक्षितो भवति गायत्रश्छंदसा

॥ २० ॥
रामः

त्रिवृत्स्तोमेन ब्राह्मणो बंधुना स होदवस्यं नेयुः क्षत्रियतामभ्युपैति तस्य
होद्वस्य तोग्निरेव तेज आदत्ते गायत्री वीर्यं त्रिवृत्स्तोम आयुर्ब्राह्म
णो ब्रह्म यशस्कीर्तिं मन्यो वा अयमस्मद्भवति क्षत्रं वा अयं भवति
क्षत्रं वा अयमुपावर्तत इति वदंतः सो नूबंध्याये सामिष्टयजुषामु
परिष्टाद्धुत्वाहुतिमाहवनीयमुपतिष्ठेत नाग्नेर्देवताया एमि न गा
यत्र्याश्छंदसो न त्रिवृतस्तोमान्न ब्राह्मणो बंधोर्मा मेग्निस्तेज आ
दित न मा गायत्री वीर्यं मा त्रिवृत्स्तोम आयुर्मा ब्राह्मणो ब्रह्म यश
स्कीर्तिं सह तेजसा वीर्येणायुषा ब्रह्मणा यशसा कीर्त्येंद्रं देवतामुपै
मि त्रिष्टुभं छंदः पंचदशं स्तोमं सोमं राजानं क्षत्रं प्रपद्ये क्षत्रियो भवामि ॥

ऐ॰ब्रा॰स॰
॥२३॥

देवाः पितरः पितरो देवा योऽस्मि स सन्यजे ॥ स्वं म इदमिष्टं स्वं पूर्तं स्वं श्रान्तं स्वं हुतं ॥ तस्य मेयमग्निरुपद्रष्टायं वायुरुपश्रोतासावादित्योऽनुख्याते दमहं य एवास्मि सोऽस्मीति तस्य ह नाग्निस्तेऽआदत्ते न गायत्री वीर्येन त्रिवृत्स्तोम आयुर्न ब्राह्मणा ब्रह्म यशस्कीर्तिं य एवमेतामाहुतिं हुत्वाहवनीयमुपस्थायोदवस्यति क्षत्रियः सन् ॥ ॥२४॥ अथातो दीक्षायाऽ आवेदनस्यैव तदाहुर्यद्ब्राह्मणस्य दीक्षितस्य ब्राह्मणो दीक्षिष्टेति दीक्षामावेदयन्ति कथं क्षत्रियस्यावेदयेदिति यथैवैतद्ब्राह्मणस्य दीक्षितस्य ब्राह्मणो दीक्षिष्टेति दीक्षामावेदयन्त्येवमेवैतत्क्षत्रियस्यावेदयेत्पुरोहितस्यार्षे

राम
॥२४॥

+ दीक्षामावेदयेयुः पुरोहितस्यार्षेयेणं + ३

येणेति तत्तदितीदं ॥ निधाय वाऽ एषः स्वान्यायुधानि ब्रह्मणऽ एवायुधैर्ब्रह्मणो रूपेण ब्रह्म भूत्वा यज्ञमुपावर्तते तस्मात्तस्य पुरोहितस्यार्षेयेण प्रवरं प्रवृणीरन् ॥ २५ ॥ अथातो यजमानभागस्यैव तदाहुः प्राश्नीयात्क्षत्रियो यजमानभागा३म् ॥ न प्राश्नीया३त् इति ॥ यत्प्राश्नीयादहुताद्युतं प्राश्य पापीयान्स्याद्यन्न प्राश्नीयाद्यज्ञाद्‌आत्मानमंतरियाद्यज्ञो वै यजमानभागः स ब्रह्मणे परिहृत्यः पुरोहितायतनं वाऽ एतत्क्षत्रियस्य यद्ब्रह्मार्धात्मो ह वाऽ एष क्षत्रियस्य यत्पुरोहितऽ उपाह परोक्षेणैव प्राशितरूपमाप्नोति नास्य प्रत्यक्षं भक्षितो भवति यज्ञऽ उ ह वाऽ एष प्रत्यक्षं यद्ब्रह्मा ब्रह्माणि हि

प्रा. स.
॥२२॥

सर्वो यज्ञः प्रतिष्ठितो यत्र यजमानो यज्ञः एवं तद्यज्ञमप्यर्जंतीति यथाप्सु वा
पो यथाग्नावग्निं तद्धैनान्न रिष्यति तद्देनं न हिनस्ति तस्मात्स ब्राह्मणे
परिहृत्याग्नौ हैके जुह्वति प्रजापतेर्वै भागो नाम लोकस्तस्मिंस्त्वादधामि
सह यजमानेन स्वाहेति न तथा न कुर्याद्यजमानो वै यजमानभागोय
जमानं ह सोग्नौ प्रवृणक्ति यऽ एनं तत्र ब्रूयाद्यजमानमग्नौ प्रावाक्षीः
प्राणस्याग्निः प्राणं धक्ष्यति मरिष्यति यजमानऽ इति शश्वत्तथा स्या
त्तस्मात्तस्याशां नेयादाशान्नेयात् ॥ २६ ॥ ॥ इति चतुर्थोऽध्यायः ॥
विश्वंतरो ह सौषद्मनः श्यापर्णान्परिचक्षाणो विश्यापर्णं यज्ञमा
जह्रे तद्धानुबुध्य श्यापर्णास्तं यज्ञमाजग्मुस्ते ह तदंतर्वेद्यासांच

प
रामः
॥२२॥

क्रिरे तान्ह दृष्ट्वोवाच पापस्य वाऽ इमे कर्मणः कर्तारऽ आसते पूतायै वा
चो वदितारो यच्छ्यापर्णाऽ इमानुत्थापयतेमे मेंऽतर्वेदि मासिषतेति तथे
ति तानुत्थापयांचक्रुस्ते होत्थाप्यमाना रुरुविरे ये तेभ्यो भूतवीरेभ्यो
सितमृगाः कश्यपानां सोमपीथमभिजिग्युः पारिक्षितस्य जनमे
जयस्य विकश्यपे यज्ञे तैस्ते तत्र वीरवंतऽ आसुः कस्वित्सोस्माका
स्ति वीरो यऽ इमं सोमपीथमभिजेष्यतीत्ययमहमस्मि वो वीरऽ इति हो
वाच रामो मार्गवेयो रामो हास मार्गवेयोनूचानः श्यापर्णीयस्तेषां हो
त्तिष्ठतामुवाचापि नु राजन्नित्थंविदं वेदेरुत्थापयंतीति यस्त्वं कथं वे
त्थ ब्रह्मबंधाविति ॥ २७ ॥ यत्रेंद्रं देवताः पर्यवृंजन्विश्वरूपं त्वाष्ट्र

ब्रा॰स॰ ॥२३॥

मभ्यमंस्त वृत्रमस्तृत यतीन्त्सालावृकेभ्यः प्रादादरुर्मघानवधीद्बृ
हस्पतेः प्रत्यवधीदिति तत्रेंद्रः सोमपीथेन व्यार्ध्यतेंद्रस्यानु व्यृद्धिं
क्षत्रं सोमपीथेन व्यार्ध्यतापींद्रः सोमपीथे भवन्त्वष्टुरामुष्य सोमं
तद्व्यृद्धमेवाद्यापि क्षत्रं सोमपीथेन स य एतं भक्षं विद्याद्यः क्षत्रस्य
सोमपीथेन व्यृद्धस्य येन क्षत्रं समृध्यते कथं तं वेदेरुथापृयंतीति
वेथ ब्राह्मणखं तं भक्षां३म॥ वेद हीति तं वैनो ब्राह्मण ब्रूहीति त
स्मै वै ते राजन्निति होवाच ॥२८॥ त्रयाणां भक्षाणामेकमाह
रिष्यंति सोमं वा दधि वापो वा स यदि सोमं ब्राह्मणानां स भक्षो
ब्राह्मणांस्तेन भक्षेण जिन्विष्यसि ब्राह्मणकल्पस्ते प्रजाया

राम ॥२३॥

माजनिष्यतऽआदाय्यापाय्यावसायी यथाकामप्रयाप्यो यदा वै क्ष
त्रियाय पापं भवति ब्राह्मणकल्पोस्य प्रजायामाजायतऽईश्वरो हा
स्माद्द्वितीयो वा तृतीयो वा ब्राह्मणतामभ्युपेतोः स ब्रह्मबंधवेन
जिज्यूषितोथ यदि दधि वैश्यानां स भक्षो वैश्यांस्तेन भक्षेण जिन्वि
ष्यसि वैश्यकल्पस्ते प्रजायामाजनिष्यतेन्यस्य बलिकृदन्यस्याद्यो
यथाकामज्येयो यदा वै क्षत्रियाय पापं भवति वैश्यकल्पोस्य प्रजाया
माजायतऽईश्वरो हास्माद्द्वितीयो वा तृतीयो वा वैश्यतामभ्युपेतोः
स वैश्यतया जिज्यूषितोथ यद्यपः शूद्राणां स भक्षः शूद्रांस्तेन भ
क्षेण जिन्विष्यसि शूद्रकल्पस्ते प्रजायामाजनिष्यतेन्यस्य प्रेष्यः

कामोत्थाप्यो यथाकामप्रयाप्यो यदा वै क्षत्रियाय पापं भवति शूद्रकल्पो
स्य प्रजायामाजायत ऽईश्वरो हास्माद्द्वितीयो वा तृतीयो वा शूद्रताम
भ्युपेतोः स शूद्रतया जिज्यूषितः ॥ २९ ॥ एते वै ते त्रयो भक्षा राजन्नि
ति होवाच तेषामाशां नेयात्क्षत्रियो यजमानो ऽथास्य स्वो भक्षो न्य
ग्रोधस्यावरोधांश्च फलानि चौदुंबराण्याश्वत्थानि प्लाक्षाण्यभिषुणु
यात्तानि भक्षयेत्सोस्य स्वो भक्षो यतो वा ऽअधि देवा यज्ञेनेष्ट्वा स्वर्गं
लोकमायंस्तत्रैतांश्चमसान्न्युब्जंस्ते न्यग्रोधा अभवन्न्युब्जा ऽइति हा
प्येनानेतर्ह्याचक्षते कुरुक्षेत्रे ते ह प्रथमजा न्यग्रोधानां तेभ्यो हा
न्ये ऽधिजातास्ते यन्न्यंचो रोहंस्तस्मान्न्यङ् रोहति न्यग्रोहो न्यग्रोहो वै

नाम तं न्यग्रोहं संतं न्यग्रोध ऽइत्याचक्षते परोक्षेण परोक्षप्रिया ऽइव हि
देवाः ॥ ३० ॥ तेषां यश्चमसानां रसो ऽवाङैत्ते ऽवरोधा ऽअभवन्नथ य ऽऊर्ध्व
स्तानि फलानि स यदेव क्षत्रियः स्वाद्भक्षान्नेति यो न्यग्रोधस्यावरोधांश्च
फलानि च भक्षयत्युपाह परोक्षेणैव सोमपीथमाप्नोति नास्य प्रत्यक्षं भ
क्षितो भवति परोक्षमिव ह वा ऽएष सोमो राजा यन्न्यग्रोधः परोक्षमिवैष
ब्रह्मणो रूपमुपनिगच्छति यत्क्षत्रियः पुरोधयैव दीक्षयैव प्रवरेणैव क्ष
त्रं वा ऽएतद्वनस्पतीनां यन्न्यग्रोधः क्षत्रं राजन्यो नितत ऽइव हीह क्षत्रि
यो राष्ट्रे वसन्भवति प्रतिष्ठित ऽइव नितत ऽइव न्यग्रोधो ऽवरोधैर्भूम्यां प्र
तिष्ठित ऽइव तद्यत्क्षत्रियो यजमानो न्यग्रोधस्यावरोधांश्च फलानि च

×क्षत्रं ऽआत्मानं क्षत्रे ह वै स ऽआत्मनि क्षत्रं वनस्पतीनां प्रतिष्ठापयति ×१

श्री·स·
॥२५॥

भक्षयंस्त्वास्मिन्नेव तत्क्षत्रं वनस्पतीनां प्रतिष्ठापयति न्यग्रोध ऽइवावरोधै
र्भूम्यां प्रतिराष्ट्रे तिष्ठत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति य ऽएवमेतं भक्षं भ
क्षयति क्षत्रियो यजमानः ॥ ३१ ॥ अथ यदौदुंबराण्यूर्जो वा ऽएषो ऽन्नाद्या
द्वनस्पतिरजायत यदुदुंबरो भौज्यं वा ऽएतद्वनस्पतीनामूर्जमेवास्मिंस्त
दन्नाद्यं भौज्यं च वनस्पतीनां क्षत्रे दधात्यथ यदाश्वत्थानि तेजसो वा ऽए
ष वनस्पतिरजायत यदश्वत्थः साम्राज्यं वा ऽएतद्वनस्पतीनां तेज ऽएवा
स्मिंस्तत्साम्राज्यं च वनस्पतीनां क्षत्रे दधात्यथ यत्प्लाक्षाणि यशसो वा
ऽएष वनस्पतिरजायत यत्प्लक्षः स्वाराज्यं च ह वा ऽएतद्वैराज्यं च वनस्प
तीनां यश ऽएवास्मिंस्तत्स्वाराज्यं वैराज्यं च वनस्पतीनां क्षत्रे दधात्येता

राम
॥२५॥

न्यस्य पुरस्तादुपक्लृप्तानि भवंत्यथ सोमं राजानं क्रीणंति ते राज्ञ ऽएवावृतो
पवसथात्प्रतिवेशो ऽश्वरंत्यथौपवसथ्यमहरेतान्यध्वर्युः पुरस्तादुप
कल्पयेताधिषवणं चर्माधिषवणे फलके द्रोणकलशं दशापवित्रम
द्रीन्पूतभृतं चाधवनीयं च स्थालीमुदंचनं चमसं च तद्यदेतद्राजानं प्रा
तरभिषुण्वंति तदेनानि द्वेधा विगृह्णीयादभ्यन्यानि सुनुयान्माध्यंदि
नायान्यानि परिशिंष्यात् ॥ ३२ ॥ तद्यत्रैतांश्चमसानुन्नयेयुस्तदेतं य
जमानचमसमुन्नयेत्तस्मिन्द्वे दर्भतरुणके प्रास्ते स्यातां तयोर्वषट्कृ
ते तः परिधि पूर्वे प्रास्येद्दधिक्राव्णो ऽअकारिषमित्येतयर्चा स्तः स्वा
हाकारयानुवषट्कृते परमादधिक्राः शवसा पंचकृष्टीरित्येतय

श्रा·स·
२६

त्रै तांश्चमसानाहरेयुस्तदेतं यजमानचमसमाहरेन्नान्यत्रोदुम्बरीयस्तदेनमु
पोद्गृह्णीयात्तद्यदेनं होतोपह्वयेतयदा चमसं भक्षयेदथैनमेतयाभक्षयेद्य
दत्रशिष्टं रसिनः सुतस्य यदिन्द्रोऽअपिबच्छचीभिः॥ इदं तदस्य मनसा शि
वेन सोमं राजानमिह भक्षयामीति शिवो ह वाऽअस्माऽएष वानस्पत्यः शि
वेन मनसा भक्षितो भवत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति यऽएवमेतं भक्षं
भक्षयति क्षत्रियो यजमानः शंनऽएधि हृदे पीतः प्रणऽआयुर्जीवसे सो
मतारीरित्यात्मनः प्रत्यभिमर्शऽईश्वरो ह वाऽएषोऽप्रत्यभिमृष्टो मनु
ष्यस्यायुः प्रत्यवहर्तोरनर्हन्माभक्षयतीति तद्यदेतेनात्मानमभि
मृशत्यायुरेव तत्प्रतिरतऽआप्यायस्व समेतु ते सं ते पयांसि समुयं

रामः
।२६।

× स्तदेतं यजमानचमसं सादयेन्नान्यत्रप्रकंपयेयु × २
न्तु वाजाऽइति चमसमाप्यायत्यभिरूपाभ्यां यद्यज्ञेऽभिरूपं तत्समृद्धं ॥३३॥
तद्यत्रैतांश्चमसान्सादयेयुस्तदेनमनुप्रकंपयेदथैनमोहृतं भक्षयेन्नारा
शंसपीतस्य देव सोम ते मतिविदऽऊमैः पितृभिर्भक्षितस्य भक्षयामीति
प्रातःसवने नाराशंसो भक्षऽऊर्वैरिति माध्यंदिने काव्यैरिति तृतीयसव
नऽऊमा वै पितरः प्रातःसवनऽऊर्वा माध्यंदिने काव्यास्तृतीयसवने तदे
तान्पितृनेवामृतान्सवनभाजः करोति सर्वो हैव सोमृतऽइति ह स्माह प्रि
यव्रतः सोमापीयः कश्च सवनभागित्यमृता ह वाऽअस्य पितरः सवन
भाजो भवंत्युग्रं हास्य राष्ट्रमव्यथ्यं भवति यऽएवमेतं भक्षं भक्षयति
क्षत्रियो यजमानः समानऽआत्मनः प्रत्यभिमर्शः समानमाप्यायनं च

ब्रा॰ स॰
।।२७।।

मसस्यंप्रातःसवनस्येवाद्यत्तोप्रातःसवनेचरेयुर्माध्यंदिनस्यमाध्यंदि
नेतृतीयसवनस्यतृतीयसवनेतमेवमेतंभक्षंप्रोवाचरामोमार्गवेयो
~~[illegible]~~ विश्वंतरायसौषद्मनायतस्मिन्होवाचप्रोक्तेस
हस्रमुहआलणतुभ्यंददामःसश्यापर्णाऽउमेयज्ञेऽइत्येतमुहैवप्रोवाच
तुरःकावषेयोजनमेजयायपारिक्षितायैतमुहैवप्रोचतुःपर्वतनार
दौसोमकायसाहदेव्यायसहदेवायसार्ञ्जयायबभ्रवेदैवावृधा
यभीमायवैदर्भायनग्नजितेगांधारायैतमुहैवप्रोवाचाग्निःसनश्रु
तायारिंदमायक्रतुविदेजानकयऽएतमुहैवप्रोवाचवसिष्ठःसु
दासेपैजवनायतेहतेसर्वएवमहज्जग्मुरेतंभक्षंभक्षयित्वासर्वे

राम
।२७।।

हैवमहाराजाऽआसुरादित्यऽइवहस्मश्रियांप्रतिष्ठितास्तपंतिसर्वा
भ्योदिग्भ्योबलिमावहंतेऽआदित्यऽइवहवैश्रियांप्रतिष्ठितस्तप
तिसर्वाभ्योदिग्भ्योबलिमावहत्युग्रंहास्यराष्ट्रमव्यथ्यंभवतियऽए
वमेतंभक्षंभक्षयतिक्षत्रियोयजमानोयजमानः।। ३४ ।। ।।इतिस
प्तमपंचिकायांसमाप्तः।।श्रीकृष्णार्पणमस्तु।।शाकेसत्राशे १३।।
शुक्लनामसंवत्सरेकार्तिककृष्ण २ रविवासरेतद्दिनेदंपुस्तकं
बर्वेत्युपनामकमहादेवेनलिखितसमाप्तिकृतं।। छ ।। छ ।।
हरिःॐम् ।।अथातस्तुतशस्त्रयोरेवैकाहिकं।। श्री ।। दत्त ।।

श्री·स·
॥२८॥

॥इतिश्रीलग्नसप्तमपंचिकासमाप्तः॥

राम
॥२८॥

॥अथअष्टमपंचिकाप्रारंभः॥

श्रीगणेशायनमः॥ हरिः ओम्॥ अथातस्तुतशस्त्रयोरेवैकाहिकं प्रातःसवनमैकाहिकंतृ
तीयसवनमेतेवैशांतेक्लृप्ते प्रतिष्ठितेसवनेयदैकाहिकेशांत्यैक्लृप्त्यैप्रतिष्ठित्याअप्रच्युत्यै
ऽउक्तोमाध्यंदिनःपवमानोयऽउभयसाम्नोबृहत्पृष्ठस्याभिहिसामनीक्रियेतेऽआत्वारथंयथो
तयऽइदंवसोसुतमंधऽइतिराथंतरीप्रतिपद्राथंतरोनुचरःपवमानोक्थंवाऽएतद्यन्मरुत्वती
यंपवमाने वाऽअत्ररथंतरंकुर्वंतिबृहत्पृष्ठंसवीवधतायैतदिदंरथंतरंस्तुतमाभ्यांप्रतिपद
नुचराभ्यामनुशंसत्यथोब्रह्मवैरथंतरंक्षत्रंबृहद्ब्रह्मखलुवैक्षत्रात्पूर्वंब्रह्मपुरस्तान्मऽउ
ग्रंराष्ट्रमव्यथ्यमसदित्यथानैवैरथंतरमनमेवास्मैतत्पुरस्तात्कल्पयत्यथेयंवैपृथिवीरथंतर
मियंखलुवैप्रतिष्ठाप्रतिष्ठामेवास्मैतत्पुरस्तात्कल्पयतिसमानऽइंद्रनिहवोविभक्तः सोह्या
मुह्यान्ब्राह्मणस्पत्यउभयसाम्नोरूपमुभेहिसामनीक्रियेतेसमान्योधाय्याऽअविभक्ताऽ
स्ताऽअह्नामैकाहिकोमरुत्वतीयःप्रगाथः॥१॥जनिष्ठाऽउग्रःसहसेतुरायेतिसूक्तंमु
ग्रवत्सहस्वत्तत्क्षत्रस्यस्यरूपंमंद्रऽओजिष्ठऽइत्योजस्वत्तत्क्षत्रस्यरूपंबहुलाभिमानऽ
इत्यभिवद्भिभ्रूत्यैरूपंतदेकादशर्चंभवत्येकादशाक्षरावैत्रिष्टु
प्त्रैष्टुभोवैराजन्यऽओजोवाऽइंद्रियंवीर्यंत्रिष्टुबोजः क्षत्रंवीर्यं

राजन्यस्तदेनमोजसाक्षत्रेणवीर्येणसमर्धयतितद्गौरिवीतंभवत्येतद्वैमरु
त्वतीयंसमृद्धंयद्गौरिवीतंतस्योक्तंब्राह्मणंत्वामिद्धिहवामहइतिबृहत्पृ
ष्ठंभवतिक्षत्रंवैबृहत्क्षत्रेणैवतत्क्षत्रंसमर्धयत्यथोक्षत्रंवैबृहदात्मायज
मानस्यनिष्केवल्यंतद्यद्बृहत्पृष्ठंभवतिक्षत्रंवैबृहत्क्षत्रेणैवैनंतत्समर्धय
त्यथोज्यैष्ठ्यंवैबृहज्ज्यैष्ठ्येनैवैनंतत्समर्धयत्यथोश्रैष्ठ्यंवैबृहच्छ्रैष्ठ्येनैवै
नंतत्समर्धयत्यभित्वाशूरनोनुमइतिरथंतरमनुरूपंकुर्वंत्ययंवैलोकोरथं
तरमसौलोकोबृहदस्यवैलोकस्यासौलोकोनुरूपोमुष्यलोकस्यायंलो
कोनुरूपस्तद्यद्रथंतरमनुरूपंकुर्वंत्युभावेवतल्लोकौयजमानायसंभो
गिनौकुर्वंत्यथोब्रह्मवैरथंतरंक्षत्रंबृहद्ब्रह्माणिखलुवैक्षत्रंप्रतिष्ठितंक्ष
त्रेब्रह्माथोसाम्नःएवसयोनितायैयद्वावानेतिधाय्यातस्याउक्तंब्राह्म

स्य

श्रौ०अ ॥२॥

णमुभयं श्रृण्वञ्चनऽ इति साम प्रगाथऽ उभयसाम्नो रूपमुभे हि सामनी क्रियेते ॥ २ ॥ तमु ष्टुहि योऽ अभिभूत्योजाऽ इति सूक्तमभिवदभिभूत्यै रूपमषाढमुग्रं सहमानमाभिरित्युग्रवत्सहमानवत्तद्धि क्षत्रस्य रूपं तत्पञ्चदशार्चं भवत्योजो वा इन्द्रियं वीर्यं पञ्चदशऽ ओजः क्षत्रं वीर्यं राजन्यस्तदेनमोजसा क्षत्रेण वीर्येण समर्धयति तद्भारद्वाजं भवति भारद्वाजं वै बृहदैर्येण सलोमैषद्वा वक्षात्रिययज्ञः समृद्धो यो बृहत्पृष्ठस्तस्माद्यत्र क्व च क्षत्रियो यजेत बृहदेव तत्र पृष्ठं स्यात्तत्समृद्धं ॥ ३ ॥ ऐकाहिका होत्राःऽ एता वै शान्ताः क्लृप्ताः प्रतिष्ठिता होत्रा यदैकाहिकाः शान्त्यै क्लृप्त्यै प्रतिष्ठित्याः अप्रच्युत्यै ता सर्वरूपा भवन्ति सर्वसमृद्धाः सर्वरूपताये सर्वसमृध्यै सर्वरूपाभिर्होत्राभिः सर्वसमृद्धाभिः सर्वान्कामानवाप्नवामेति तस्माद्य ॥ २ ॥

राम

त्रक्व चैकाहाऽ असर्वस्तोमाऽ असर्वपृष्ठाऽ ऐकाहिका एव तत्र होत्राः स्युस्तत्समृद्धमुक्थ्यःऽ एवायं पञ्चदशः स्यादित्याहुरोजो वाऽ इन्द्रियं वीर्यं पञ्चदशऽ ओजः क्षत्रं वीर्यं राजन्यस्तदेनमोजसा क्षत्रेण वीर्येण समर्धयति तस्य त्रिंशत्स्तुतशस्त्राणि भवन्ति त्रिंशदक्षरा वै विराड्विराळन्नाद्यं विराज्यैवैनं तदन्नाद्ये प्रतिष्ठापयति तस्मात्तदुक्थ्यः पञ्चदशः स्यादित्याहुर्ज्योतिष्टोमःऽ एवाग्निष्टोमः स्यादित्येव स्तोमानां त्रिवृत्क्षत्रं च दशो ब्रह्म स्वकुवेक्षत्रात्पूर्वं ब्रह्म पुरस्तान्मःऽ उग्रं राष्ट्रमव्यथ्यमसदिति विशः सप्तदशः शौद्रो वर्णःऽ एकविंशो विशं चैवास्मै तच्छौद्रं च वर्णमनुवर्त्मानौ कुर्वन्त्यथो तेजो वै स्तोमानां त्रिवृद्वीर्यं पञ्चदशः प्रजातिः सप्तदशः प्रतिष्ठैकविंशस्तदेनं तेजसा वी

पं

श्री०अ
॥३॥

र्येणप्रजात्याप्रतिष्ठयांततःसमर्धयतितस्माज्ज्योतिष्टोमस्यात्तस्यचतुर्विंशा
तिस्तुतशस्त्राणिभवंतिचतुर्विंशत्यर्धमासोवैसंवत्सरःसंवत्सरेकृत्स्नम
न्नाद्यंकृत्स्नएवैनंतदन्नाद्येप्रतिष्ठापयतितस्माज्ज्योतिष्टोमएवाग्निष्टो
मस्यादग्निष्टोमस्यात्॥ ४॥ इतिअष्टमपंचिकायांप्रथमोध्यायः॥ ॥
अथातःपुनरभिषेकस्यैवसूयतेहवाऽअस्यक्षत्रंयोदीक्षतेक्षत्रियः
सत्सयदावभृथादुदेत्यानूबंध्ययेष्ट्वोदवस्य त्यथैनमुदवसानीया
यांसंस्थितायांपुनरभिषिंचंतितस्यैतेपुरस्तादेवसंभाराऽउपक्लृप्ता
भवंत्यौदुंबर्यासंदीतस्यैप्रादेशमात्राःपादाःस्युररत्निमात्राणिशी
र्षण्यानूच्यानिमौंजंविवयनंव्याघ्रचर्मास्तरणमौदुंबरश्चमसःऽ

राम
॥३॥

उदुंबरशाखातस्मिन्नेतस्मिंश्चमसेष्टातयानिनिषुतानिभवंतिदधिमधुस
र्पिरातपवर्ष्याऽअपःशष्पाणिचतोक्मानिचसुरादूर्वातद्येषादक्षिणास्फ्या
वर्तनिर्वेदेर्भवतितत्रैतांप्राचीमासंदीप्रतिष्ठापयतितस्याऽअंतर्वेदिद्वौपा
दौभवतोबहिर्वेदिद्वावियंवैश्रीस्तस्याएतत्परिमितंरूपंयदंतर्वेद्यथैष
भूमापरिमितोयोबहिर्वेदितद्यदस्याऽअंतर्वेदिद्वौपादौभवतोबहिर्वे
दिद्वाऽउभयोःकामयोरुपाप्त्यैयश्चांतर्वेदियश्चबहिर्वेदि॥ ५॥ व्या
घ्रचर्मणास्तृणात्युत्तरलोम्नाप्राचीनग्रीवेणक्षत्रंवाऽएतदारण्यानां
पशूनांयद्व्याघ्रःक्षत्रंराजन्यःक्षत्रेणैवतत्क्षत्रंसमर्धयतितांपश्चात्प्राङु

प्रविश्याच्यजानु दक्षिणमभिमंत्रयत ऽउभाभ्यां पाणिभ्यामालभ्या
ग्निष्ट्वा गायत्र्या सयुक् छंदसारोहतु सविता ष्णिहा सोमोनुष्टुभा बृहस्प
तिर्बृहत्या मित्रावरुणौ पंक्त्येंद्रस्त्रिष्टुभा विश्वेदेवा जगत्या तानहमनुरा
ज्याय साम्राज्याय भौज्याय स्वाराज्याय वैराज्याय पारमेष्ठ्याय राज्या
य माहाराज्यायाधिपत्याय स्वावश्यायातिष्ठायारोहामीत्येतामासं
दीमारोहेद्दक्षिणेनाग्रे जानुनाथ सव्येन तत्तद्दितीयं ॥ चतुरुत्तरैर्वै दे
वाश्छंदोभिः सयुग्भूत्वैतां श्रियमारोहन्यस्यामेत ऽएतर्हि प्रतिष्ठिता ऽ
अग्निर्गायत्र्या सविता ष्णिहा सोमोनुष्टुभा बृहस्पतिर्बृहत्या मित्रा
वरुणौ पंक्त्येंद्रस्त्रिष्टुभा विश्वेदेवा जगत्यैते ऽ एते ऽअभ्यनूच्यंते ऽअग्ने

र्गायत्र्यभवत्सयुग्वेति कल्पते हवा ऽ अस्मै योगक्षेमः ऽ उत्तरोत्तारिणीह श्रियमश्नु
ते श्नुते ह प्रजानामैश्वर्यमाधिपत्यं य ऽ एवमेता अनुदेवता ऽ एतामासंदीमारोहति
क्षत्रियः संनथैनमभिषेक्ष्यं नपात्र्यांतिं वाचयति शिवेन मा चक्षुषा पश्यतापः शि
वया तन्वोपस्पृशत त्वचं मे ॥ सर्वां अग्नी रप्सुषदो हुवे वो मयि वर्चो बलमो
जो निधत्तेति नैतस्याभिषिषिचानस्यात्र्यांतो ऽ आपो वीर्यं निर्हणंनिति ॥ ६ ॥ अ
थैनमुदुंबरशाखामंतर्धायाभिषिंचतीमा ऽ आपः शिवतमा ऽ इमाः सर्वस्य भे
षजीः ॥ इमा राष्ट्रस्य वर्धनीरिमा राष्ट्रभृतो मृताः ॥ याभिरिंद्रमभ्यषिंचत्प्र
जापतिः सोमं राजानं वरुणं यमं मनुं ॥ ताभिरद्भिरभिषिंचामि त्वामहं रा ज्ञां
त्वमधिराजो भवेह ॥ महांतं त्वा महीनां सम्राजं चर्षणीनां देवी जनित्र्यजी
जनद्भद्रा जनित्र्यजीजनद्देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो

श्री ॥५॥

अ हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि ॥ बलाय श्रियै यशसे
सेनाद्यायभूरिति य इच्छेदिममेव प्रत्यंनमद्यादित्यथ य इच्छेद्विपुरुषं भूर्भुव इत्यथ
य इच्छेत्त्रिपुरुषं वाप्रतिमं वा भूर्भुवस्वरिति तद्धैक आहुः सर्वाभिर्वा एषा यदेता
व्याहृतयोभिसर्वेण हास्य परस्मैकृतं भवतीति तमेतेनाभिषिंचेद्देवस्य त्वा सवि
तुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रिये
णाभिषिंचामि ॥ बलाय श्रियै यशसेन्नाद्यायेति तद्यु पुनः परिचक्षते यदस
र्वेण वाचाभिषिक्तो भवतीश्वरो ह तु पुरायुषः प्रेतोरिति ह स्माह सत्यकामो जा
बालो यमेताभिर्व्याहृतिभिर्नाभिषिंचंतीतीश्वरो ह सर्वमायुरेतोः सर्व
माप्नो द्विजयेनेत्यफ ह स्माहोद्दालक आरुणिर्यमेताभिर्व्याहृतिभिरभि ८॥

षिंचंतीति तमेतेनैवाभिषिंचेद्देवस्य त्वा सवितुः प्रसवेश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यामग्नेस्तेजसा सूर्यस्य वर्चसेंद्रस्येंद्रियेणाभिषिंचामि ॥ बलाय श्रियै
यशसेन्नाद्याय भूर्भुवस्वरित्यथैतानि ह वै क्षत्रियादीजानाद्व्युत्क्रांतानि भ
वंति ब्रह्मक्षत्रे ऊर्गन्नाद्यमपामोषधीनां रसो ब्रह्मवर्चसमिरा पुष्टिः प्रजातिः
क्षत्ररूपं तदथो अन्नस्य रस ओषधीनां क्षत्रं प्रतिष्ठा तद्य द्वेवामूपुरस्ता
द्धाहुतीर्जुहोति तदस्मिन्ब्रह्मक्षत्रे दधाति ॥ ७ ॥ अथ यदौदुंबर्यासंदी भवत्यौ
दुंबरश्चमस उदुंबरशाखोर्ग्वा अन्नाद्यमुदुंबर ऊर्जमेवास्मिंस्तदन्नाद्यं दधात्य
थ यद्दधि मधु घृतं भवत्यपां स ओषधीनां रसोपामेवास्मिंस्तदोषधीनां
रसं दधात्यथ यदातपवर्ष्या आपो भवंति तेजश्च ह वै ब्रह्मवर्चसं चातप
वर्ष्या आपस्तेज एवास्मिंस्तद्ब्रह्मवर्चसं च दधात्यथ यच्छष्पाणि च तोक्मा

श्री॰ज
॥६॥

निचभवंतीरायैतत्पुष्ट्यैरूपमथोप्रजात्याइरामेवास्मिंस्तत्पुष्टिंदधात्यथोप्र
जातिमथयत्सुराभवतिक्षत्ररूपंतदथोऽअंनस्यरसःक्षत्ररूपमेवास्मिंस्तद्द
धात्यथोऽअंनस्यरसमथयद्दूर्वाभवतिक्षत्रंवाऽएतदोषधीनांयद्दूर्वाक्षत्रं
राजन्योनितलऽइवहीहक्षात्रियोराष्ट्रेवसन्भवतिप्रतिष्ठितइवनितलेवद
र्वावरोधैर्भूम्यांप्रतिष्ठितेवतद्यद्दूर्वाभवत्योषधीनामेवास्मिंस्तक्षत्रंदधा
त्यथोप्रतिष्ठामेतानिहवैयान्यस्मादीजानाद्व्युत्क्रांतानिभवंतितान्येवा
स्मिंस्तद्दधातितैरेवैनंतत्समर्धयत्यथास्मैसुरांकंसंहस्तऽआदधाति
स्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥इंद्रायपातवेसुतइत्याधायशां
तिंवाचयतिनानाहिवांदेवहितंसदस्कृतंमासंसृक्षाथांपरमेव्योमनि॥सु
रात्वमसिशुष्मिणीसोमऽएषराजामेनंहिंसिष्टंस्वांयोनिमाविशंताविति

राम॰
॥६॥

सोमपीथस्यचैषासुरापीथस्यचव्यावृत्तिःपीत्वायंरातिंमन्येततस्माऽएनांप्रय
च्छेत्तद्धिमित्रस्यरूपंमित्रऽएवैनांतदंततःप्रतिष्ठापयतितथाहिमित्रेप्रतितिष्ठति
प्रतितिष्ठतियऽएवंवेद॥८॥अथोदुंबरशाखामभिप्रत्यवरोहत्यूर्ग्वाअंनाद्य
मुदुंबरऊर्जमेवतदंनाद्यमभिप्रत्यवरोहत्युपर्येवासीनोभूमौपादौप्रतिष्ठा
प्यप्रत्यवरोहमाहप्रतितिष्ठामिद्यावापृथिव्योःप्रतितिष्ठामिप्राणापानयोः

रा४

प्रतितिष्ठाम्यहोरात्रयोःप्रतितिष्ठाम्यंनपानयोःप्रतिब्रह्मन्प्रतिक्षत्रेप्रत्येषुत्रि
षुलोकेषुतिष्ठामीत्यंततःसर्वेणात्मनाप्रतितिष्ठतिसर्वस्मिन्हवाएतस्मिन्प्र
तितिष्ठत्युत्तरोत्तरिणींहश्रियमश्नुतेश्नुतेहप्रजानामैश्वर्यमाधिपत्यंयऽए
वमेतेनपुनरभिषेकेणाभिषिक्तःक्षत्रियःप्रत्यवरोहत्येतेनप्रत्यवरोहेणप्रत्य
वरुह्योपस्थंकृत्वाप्राङासीनोनमोब्रह्मणेनमोब्रह्मणेनमोब्रह्मणइतित्रि

८ ॥ यद्वरं ददामि जित्या अभिजित्यै विजित्यै संजित्याइ ति वाचं विसृजते स यं नमो ब्रह्मणे नमो ब्रह्मणे नमो ब्रह्मण इति त्रिष्कृत्वो ब्रह्मणे नम ३ ×

श्री·अ ॥८॥

ष्कृत्वो ब्रह्मणे नमस्करोति ब्रह्मण ऽ एव तत्क्षत्रं वशमेति तद्यत्र वै ब्रह्मणः क्षत्रं वशमेति तद्राष्ट्रं समृद्धं तद्वीरवदाहास्मिन्वीरो जायते थ यद्वरं ददामि जित्या ऽ अभिजित्यै विजित्यै संजित्या ऽ इति वाचं विसृजत ऽ एतद्ध वाचो जितं यद्ददामीत्याह यदेव वाचो जितं तन्म इदमनु कर्म संतिष्ठाता इति विसृज्य वाचमुपोत्थायाहवनीये समिधमभ्यादधाति समिदसि समिन्धे श्वेन्द्रियेण वीर्येण स्वाहेतीन्द्रियेणैव तद्वीर्येणात्मानमंततः समर्धयत्याधाय समिधं त्रीणि पदानि प्राङुदङ् अभ्युत्क्रामति कृप्तिरसि सिद्धिरसि गां मायि देवेभ्यः कल्पत ॥ कल्पतां मे योगक्षेमो भयं मेस्त्वित्यपराजितां दिशमुपतिष्ठते जितस्य चापुनः पराजयाय तत्तद्दिती २ ॥ ९ ॥ देवासुरा वा एषु लोकेषु संयेतिरे त ऽ एतस्यां प्राच्यां दिशि येतिरे तांस्ततो सुरा ऽ अजयंस्ते दक्षिणस्यां दिशि येतिरे तांस्ततो सुरा अजयंस्ते प्रतीच्यां दिशि येतिरे तांस्ततो सुरा अजयंस्त उदीच्यां दिशि येतिरे तांस्ततो सु

राम॰ ॥८॥

रा अजयंस्त एतस्मिन्नवांतरदेशे येतिरे य ऽ एष प्राङुदङ् ते ह ततो जिग्युस्तद्यदि क्षत्रिय उपधावेत्सेनयोः समायत्योस्तथा मे कुरु यथाहमिमां सेनां जयानीति स यदि तथेति ब्रूयाद्वनस्पते वीड्वंगो हि भूया ऽ इत्यस्य रथोपस्थमभिमृश्याथैनं ब्रूयाहातिष्ठस्वैतां तद्दिशमभिमुखः संनद्धो रथो भिप्रवर्तता सि उदङ्स प्रत्यङ् स दक्षिणा स प्राङ् सो भ्यमित्रमित्यभीवर्तेन हा विषेत्येवैनमावर्तयेदथैनमन्वीक्षेताप्रतिरथेन शासेन सौपर्णेनेति जयति हतां सेनां यद्यु वा ऽ एनमुपधावेत्संग्रामं संयतिष्यमाणस्तथा मे कुरु यथाहमिमं संग्रामं संजयानीत्येतस्यामेवैनं दिशि यातयेज्जयति हतं संग्रामं यद्यु वा एनमुपधावेद्राष्ट्रादपरुध्यमानस्तथा मे कुरु यथाहमिदं राष्ट्रं पुनरवगच्छानीत्येतामेवैनं दिशमुपनिष्क्रमयेत्तथाहराष्ट्रं पुनरवगच्छेत्युपस्थाया नि

ऐ·ब्रा· ८

त्राणांव्यपनुत्तिंभ्रातृव्यानांहानमभ्येत्युपप्राचइंद्रोविश्वाअमित्रानितिसर्वतोह
स्माअनमित्रमभयंभवत्युत्तरोत्तरिणींहश्रियमश्नुतेश्नुतेहप्रजानामैश्वर्य
माधिपत्यंयएवमेतामभित्राणांव्यपनुत्तिंभ्रातृव्यहानमभ्येत्येत्यग्रहान्यथाह्वय
स्याग्नेरूपविष्टायान्वारब्धायऋत्विग्लतःकंसेन चतुर्गृहीतास्तिस्रआ
ज्याहुतीरैंद्रीःप्रपदंजुहोत्यनार्त्याअरिष्ट्याअज्यान्याअभयाय॥१०॥ पर्यूषुप्र
धन्ववाजसातयेपरिवृत्राभूर्ब्रह्मप्राणममृतंप्रपद्यतेयमसौशर्मवर्माभय
स्वस्तये॥सहप्रजयासहपशुभिर्णिसक्षणि द्विषस्तरध्याऋणयानईयसे
स्वाहा॥अनुहित्वासुतंसोममदामसिमहेसमभुवोब्रह्मप्राणममृतंप्रप
द्यतेयमसौशर्मवर्माभयंस्वस्तये॥सहप्रजयासहपशुभिर्यराज्येवाजां
अभिपवमानप्रगाहसेस्वाहा॥अजीजनोहिपवमानसूर्यंविधारेशक्म ॥८

ब्रह्मप्राणममृतंप्रपद्यतेयमसौशर्मवर्माभयंस्वस्तये॥सहप्रजयासहपशुभिःक्मना
पयोगोजीरयारंहमाणःपुरंध्यास्वाहेत्यनार्त्तोहवाअरिष्टोऽजीतःसर्वतोगुप्तस्त्रय्यै
विद्यायैरूपेणसर्वादिशोऽनुसंचरत्यैंद्रेलोकेप्रतिष्ठितोयस्माएताऋत्विग्लतः
कंसेनचतुर्गृहीतास्तिस्रआज्याहुतीरैंद्रीःप्रपदंजुहोत्यथांततःप्रजातिमाशा
स्तेगवामश्वानांपुरुषाणामिहगावःप्रजायध्वमिहाश्वाइहपूरुषाः॥इहोसहस्र
दक्षिणोवीरस्त्रातानिषीददित्यतिबहुर्हवैप्रजयापशुभिर्भवतियएवमेतामं
ततःप्रजातिमाशास्तेगवामश्वानांपुरुषाणामिषंहवावक्षत्रियोविरुष्टोयमेवं
विदोयाजयत्यथहतंव्येवकर्षतेयथाहवाइदंनिषादावासेलगावापापकृतो
वावित्तवंतंपुरुषमरण्येगृहीत्वाकर्त्तमन्वस्यवित्तमादायद्रवत्येवमेवतऋ
त्विजोयजमानंकर्त्तमन्वस्यवित्तमादायद्रवंतियमनेवंविदोयाजयंत्येतद्ध
स्मवैतद्विद्वानाहजनमेजयःपारिक्षितएवंविदंहिवैमामेवंविदोयाजयंति

ब्रा॰अ
॥ ९ ॥

तस्मादहंजयाम्यभीत्वरींसेनांजयाम्यभीत्वर्यासेनयानमादिव्यानमानुष्यइषव
ऋच्छंत्येष्याभिसर्वमायुःसर्वभूमिर्भविष्यामीतिनहवाएनंदिव्यानमानुष्यइ
षवऋच्छंत्येतिसर्वमायुःसर्वभूमिर्भवतियएवंविद्वान्याजयतियाजयति ॥११॥
इतिअष्टमपंचिकायांद्वितीयोध्यायः ॥ ॥ अथातऽऐंद्रोमहाभिषेकस्तेदेवा
अब्रुवन्त्सप्रजापतिकाअयंवैदेवानामोजिष्ठोबलिष्ठःसहिष्ठःसत्तमःपा
रयिष्णुतमइममेवाभिषिंचामहाइतितथेतितद्वैतदिंद्रमेवतस्माएतामासं
दींसमभरन्नृचंनामतस्यैबृहच्चरथंतरंचपूर्वौपादावकुर्वन्वैरूपंचवैराजंचा
परौशाक्वररैवतेशीर्षण्येनौधसंचकालेयंचानूच्येऽऋचःप्राचीनातानानिसा
मानितिरश्चीनवायानियजूंष्यतीकाशान्यत्राआस्तरणंश्रियमुपबर्हणंतस्यै
सविताचबृहस्पतिश्चपूर्वौपादावधारयतांवायुश्चपूषाचापरौमित्रावरु
णौशीर्षण्येअश्विनावनूच्येसएतामासंदीमारोहद्वसवस्त्वागायत्रेणछंदसात्रि

गुरु
॥ ९ ॥

वृतास्तोमेनरथंतरेणसाम्नारोहंतुतानन्वारोहामिसाम्राज्यायरुद्रास्त्वात्रैष्टुभेन
छंदसापंचदशेनस्तोमेनबृहतासाम्नारोहंतुतानन्वारोहामिभौज्यायादित्या
स्त्वाजागतेनछंदसासप्तदशेनस्तोमेनवैरूपेणसाम्नारोहंतुतानन्वारोहामि
स्वाराज्यायविश्वेत्वादेवाआनुष्टुभेनछंदसैकविंशेनस्तोमेनवैराजेनसाम्नारो
हंतुतानन्वारोहामिवैराज्यायसाध्याश्चत्वाप्त्याश्चदेवाःपांक्तेनछंदसात्रि
वेनस्तोमेनशाक्वरेणसाम्नारोहंतुतानन्वारौँमिराज्यायमरुतश्चत्वांगिरस
श्चदेवाअतिछंदसाछंदसात्रयस्त्रिंशेनस्तोमेनरैवतेनसाम्नारोहंतुतानन्वा
रोहामिपारमेष्ठ्यायमाहाराज्यायाधिपत्यायस्वावश्यायातिष्ठायारोहा
मीत्येतामासंदीमारोहत्तमेतस्यामासंद्यामासीनंविश्वेदेवाअब्रुवन्नवाअ
नभ्युत्क्रुष्टइंद्रोवीर्यंकर्तुमर्हत्यभ्येनमुत्क्रोशामेतितथेतितंविश्वेदेवाअ
भ्युदक्रोशन्निमंदेवाअभ्युत्क्रोशतसम्राजंसाम्राज्यंभोजंभोजपितरंस्वराजं

१ हा

श्रा·७ ॥१०॥

स्वाराज्यंविराजंवैराज्यंराजानंराजपितरंपरमेष्ठिनंपारमेष्ठ्यंक्षत्रमजनिक्षत्रियोजनि
विश्वस्यभूतस्याधिपतिरजनिविशामत्ताजनिपुरांभेत्ताजन्यसुराणांहंताजनि
ब्रह्मणोगोप्ताजनिधर्मस्यगोप्ताजनीतितमभ्युत्क्रुष्टंप्रजापतिरभिषेक्ष्यन्नेत
यर्चाभ्यमंत्रयत॥१२॥निषसादधृतव्रतोवरुणःपस्त्यास्वा॥साम्राज्यायभौ
ज्यायस्वाराज्यायवैराज्यायपारमेष्ठ्यायराज्यायमाहाराज्यायाधिपत्या
यस्वावश्यायातिष्ठायसुक्रतुरितितमेतस्यामासंद्यामासीनंप्रजापति
रस्तात्तिष्ठन्प्रत्यङ्मुखऽऔदुंबर्याद्रयाशाखयासपलाशयाजातरूपमये
चपवित्रेणांतर्धायाभ्यषिंचदिमाआपःशिवतमाऽइत्येतेनतृचेनदेव
स्यत्वेतिचयजुषाभूर्भुवस्वरित्येताभिश्चव्याहृतिभिः॥१३॥अथैनंप्रा
च्यांदिशिवसवोदेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचन्नेतेनचतृचेनैते
नचयजुषैताभिश्चव्याहृतिभिःसाम्राज्यायतस्मादेतस्यांप्राच्यांदिशिये

केचप्राच्यानांराजानःसाम्राज्यायैवतेभिषिच्यंतेसम्राडित्येनानभिषिक्ता
नाचक्षतएतामेवदेवानांविहितिमन्वथैनंदक्षिणस्यांदिशिरुद्रादेवाःषड्भिश्चैव
पंचविंशैरहोभिरभ्यषिंचन्नेतेनचतृचेनैतेनचयजुषैताभिश्चव्याहृतिभिर्भौज्याय
तस्मादेतस्यांदक्षिणस्यांदिशियेकेचसत्वतांराजानोभौज्यायैवतेभिषिच्यंतेभो
जेत्येनानभिषिक्तानाचक्षतएतामेवदेवानांविहितिमन्वथैनंप्रतीच्यांदिश्या
दित्यादेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचन्नेतेनचतृचेनैतेनचयजुषैताभिश्च
व्याहृतिभिःस्वाराज्यायतस्मादेतस्यांप्रतीच्यांदिशियेकेचनीच्यानांराजानो
येपाच्यानांस्वाराज्यायैवतेभिषिच्यंतेस्वराडित्येनानभिषिक्तानाचक्षतए
तामेवदेवानांविहितिमन्वथैनमुदीच्यांदिशिविश्वेदेवाःषड्भिश्चैवपंचविंशै
रहोभिरभ्यषिंचन्नेतेनचतृचेनैतेनचयजुषैताभिश्चव्याहृतिभिर्वैराज्याय
तस्मादेतस्यामुदीच्यांदिशियेकेचपरेणहिमवंतंजनपदाःउत्तरकुरवउत्तरम
द्राइतिवैराज्यायैवतेभिषिच्यंतेविराडित्येनानभिषिक्तानाचक्षतएतामेवदे

श्रा० देवानांविहितिमन्वथैनमस्यांध्रुवायांमध्यमायांप्रतिष्ठायांदिशिसाध्याश्चाप्त्या
११ श्चदेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचंनेतेनचतृचेनैतेनचयजुषैताभिश्च
व्याहृतिभीराज्यायतस्मादस्यांध्रुवायांमध्यमायांप्रतिष्ठायांदिशि येकेचकु
रुपंचालानांराजानःसवशोशीनराणांराज्यायैवतेभिषिच्यंतेराजेत्येनान
भिषिक्तानाचक्षतएतामेवदेवानांविहितिमन्वथैनमूर्ध्वायांदिशिमरुत
श्चांगिरसश्चदेवाःषड्भिश्चैवपंचविंशैरहोभिरभ्यषिंचंनेतेनचतृचेनैतेनच
यजुषैताभिश्चव्याहृतिभिःपारमेष्ठ्यायमाहाराज्यायाधिपत्यायस्वाव
श्यायातिष्ठायेतिसपरमेष्ठीप्राजापत्योभवत्सएतेनमहाभिषेकेणाभि
ये षिक्तइंद्रःसर्वाजितीरजत्सर्वान्लोकानविंदत्सर्वेषांदेवानांश्रैष्ठ्यमति
ष्ठांपरमतामगछत्साम्राज्यंभौज्यंस्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहारा
ज्यमाधिपत्यंजित्वास्मिंलोकेस्वयंभूःस्वराळमृतोमुष्मिंत्स्वर्गेलोगेस ११

र्वान्कामानाप्त्वामृतःसमभवत्समभवत् ॥ १४ ॥ ॥ इतिअष्टमपंचिकायांतृ
तीयोध्यायः ॥ ३ ॥ ॥ सयइछेदेवंवित्क्षत्रियमयंसर्वाजितीर्जयेतायंसर्वान्लोका
न्विंदेतायंसर्वेषांराज्ञांश्रैष्ठ्यमतिष्ठांपरमतांगछेतसाम्राज्यंभौज्यंस्वाराज्यं
वैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमयंसमंतपर्यायीस्यात्सार्व
भौमःसार्वायुषऽआंतादापरार्धात्पृथिव्यैसमुद्रपर्यंतायाऽएकराळितित
मेतेनैंद्रेणमहाभिषेकेणक्षत्रियंशापयित्वाभिषिंचेद्यांचरात्रीमजायेथा
यांचप्रेतासितदुभयमंतरेणेष्टापूर्तंतेलोकंसुकृतमायुःप्रजांवृंजीययदि
मेद्रुह्येरितिसयइछेदेवंवित्क्षत्रियोहंसर्वाजितीर्जयेयमहंसर्वान्लोका
न्विंदेयमहंसर्वेषांराज्ञांश्रैष्ठ्यमतिष्ठांपरमतांगछेयंसाम्राज्यंभौज्यंस्वारा
ज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमहंसमंतपर्यायीस्यांसा
र्वभौमःसार्वायुषआंतादापरार्धात्पृथिव्यैसमुद्रपर्यंतायाऽएकराळिति
सनविचिकित्सेत्सब्रूयात्सहश्रद्धयायांचरात्रीमजायेहंयांचप्रेतास्मितदुभ

श्रा·अ· यमंतरेणेष्टापूर्तमिलोकं सुकृतमायुः प्रजां वंजीधायदितेढ्ढुह्येयमिति ॥१५॥
॥१२॥ अथततो ब्रूयाश्चतुष्ट्यानिवानस्पत्यानि संभरतनय्यग्रोधान्यौदुंबराण्या
श्वत्थानिप्लाक्षाणीतिक्षत्रंवा ऽएतद्वनस्पतीनांयन्न्यग्रोधोयंनय्यग्रोधानि
संभरंतिक्षत्रमेवास्मिंस्तद्दधातिभौज्यंवा ऽएतद्वनस्पतीनांयदुदुंबरोय
दौदुंबराणिसंभरंतिभौज्यमेवास्मिंस्तद्दधाति साम्राज्यंवा ऽएतद्वनस्पती
नांयदश्वत्थोयदाश्वत्थानिसंभरंतिसाम्राज्यमेवास्मिंस्तद्दधातिस्वारा
ज्यंचहवाएतद्वैराज्यंचवनस्पतीनांयत्प्लक्षोयत्प्लाक्षाणिसंभरंतिस्वा
राज्यवैराज्येऽएवास्मिंस्तद्दधात्यथततोब्रूयाच्चतुष्ट्यान्यौषधानिसंभर
ततोक्मकृतानिव्रीहीणांमहाव्रीहीणांप्रियंगूनांमवानामितिक्षत्रंवाए
तदोषधीनांयद्व्रीहयोयद्व्रीहीणांतोक्मसंभरंतिक्षत्रमेवास्मिंस्तद्दधातिसा
म्राज्यंवाऽएतदोषधीनांयन्महाव्रीहयोयन्महाव्रीहीणांतोक्मसंभरंतिसा
म्राज्यमेवास्मिंस्तद्दधातिभौज्यंवाएतदोषधीनांयत्प्रियंगवोयत्प्रियंगूनां ॥१२॥

तोक्मसंभरंतिभौज्यमेवास्मिंस्तद्दधातिसैनान्यंवाऽएतदोषधीनांयद्यवा
यद्यवानांतोक्मसंभरंतिसैनान्यमेवास्मिंस्तद्दधाति ॥१६॥ अथास्माऽ
औदुंबरीमासंदींसंभरंतितस्याउक्तंब्राह्मणमौदुंबरश्चमसोवापात्रीवौ
दुंबरश्शाखातानितान्त्संभारान्त्संभृत्यौदुंबर्यांपात्र्यांवाचमसेवासमावप
युस्तेषुसमोप्तेषुदधिमधुसर्पिरातपवर्ष्याऽआपोभ्यानीयप्रतिष्ठाप्ये
तामासंदीमभिमंत्रयतेबृहच्चतेरथंतरंचपूर्वौपादौभवतांवैरूपंचवैराजंचा
परौशाक्करंरैवतंत्रशीर्षण्येनौधसंचकालेयंचानूच्येऋचःप्राचीनातानाः
सामानितिरश्चीनवायायजूंष्यतीकाशा यशः आस्तरणंश्रीरुपबर्हणंस
वितावचतबृहस्पतिश्चपूर्वौपादौधारयतांवायुश्चपूषाचापरौमित्रावरु
णौशीर्षण्येअश्विनावनूच्येइत्यथैनमेतामासंदीमारोहयतिवसवस्त्वा
गायत्रेणछंदसा त्रिवृतास्तोमेनरथंतरेणसाम्नारोहंतुतानन्वारोहसा
म्राज्यायरुद्रास्त्वात्रैष्टुभेनछंदसापंचदशेनस्तोमेनबृहतासाम्नारोहंतुता

ब्रा० ॥१३॥

ऽनन्वारोहभौज्यायादित्यास्त्वाजागतेनछंदसासप्तदशेनस्तोमेनवैरूपेण
साम्नारोहंतुताननन्वारोहस्वाराज्यायविश्वेत्वादेवाआनुष्टुभेनछंदसैकविं
शेनस्तोमेनवैराजेनसाम्नारोहंतुताननन्वारोहवैराज्यायमरुतश्चत्वांगिर
सश्चदेवाअतिछंदसाछंदसात्रयस्त्रिंशेनस्तोमेनरैवतेनसाम्नारोहंतुता
नन्वारोहपारमेष्ठ्यायसाध्याश्चत्वाप्त्याश्चदेवाःपांक्तेनछंदसात्रिणवेनस्तो
मेनशाक्वरेणसाम्नारोहंतुताननन्वारोहराज्यायमाहाराज्यायाधिपत्याय
स्वावश्यायातिष्ठायारोहेत्येतामासंदीमारोहयेत्तमेतस्यामासंद्यामासी
नंराजकर्तारोब्रूयुर्नवाअनभ्युत्क्रुष्टःक्षत्रियोवीर्यंकर्तुमर्हत्यभ्येनमुत्क्रोशामे
तितथेतितंराजकर्तारोऽभ्युत्क्रोशंतीमंजनाऽअभ्युत्क्रोशतसम्राजंसाम्राज्यं
भोजंभोजपितरंस्वराजंस्वाराज्यंविराजंवैराज्यंपरमेष्ठिनंपारमेष्ठ्यंराजानंराज
पितरंक्षत्रमजनिक्षत्रियोजनिविश्वस्यभूतस्याधिपतिरजनिविशामत्ता
जन्यमित्राणांहंताजनिब्राह्मणानांगोप्ताजनिधर्मस्यगोप्ताजनीतित

राम ॥१३॥

मभ्युत्क्रुष्टमेवंविदभिषेक्ष्यन्नेतयर्चाभिमंत्रयेत॥१७॥निषसादधृतव्रतोवरुणःपस्त्या
स्वा॥साम्राज्यायभौज्यायस्वाराज्यायवैराज्यायपारमेष्ठ्यायराज्यायमाहाराज्या
याधिपत्यायस्वावश्यायातिष्ठायसुक्रतुरितितमेतस्यामासंद्यामासीनमेवंवि
त्पुरस्तात्तिष्ठन्प्रत्यङ्मुखऽऔदुंबर्याद्रयाशाखयासपलाशयाजातरूपमयेनच
पवित्रेणांतर्धायाभिषिंचतीमाऽआपःशिवतमाऽइत्येतेनतृचेनदेवस्यत्वेतिचयजु
षाभूर्भुवस्स्वरित्येताभिश्चव्याहृतिभिः॥१८॥प्राच्यांत्वादिशिवसवोदेवाःषड्भि
श्चैवपंचविंशैरहोभिरभिषिंचंत्वेतेनचतृचेनैतेनचयजुषैताभिश्चव्याहृतिभिःसा
म्राज्यायदक्षिणस्यांत्वादिशिरुद्रादेवाःषड्भिश्चैवपंचविंशैरहोभिरभिषिंचंत्वेत
नचतृचेनैतेनचयजुषैताभिश्चव्याहृतिभिर्भौज्यायप्रतीच्यांत्वादिश्यादित्यादे
वाःषड्भिश्चैवपंचविंशैरहोभिरभिषिंचंत्वेतेनचतृचेनैतेनचयजुषैताभिश्चव्याहृ
तिभिःस्वाराज्यायोदीच्यांत्वादिशिविश्वेदेवाःषड्भिश्चैवपंचविंशैरहोभिरभिषिं
चंत्वेतेनचतृचेनैतेनचयजुषैताभिश्चव्याहृतिभिर्वैराज्यायोर्ध्वायांत्वादिशिम

मध्यमायां

ऋा·
१४

एतश्चांगिरसश्चदेवाः षड्भिश्चैव पंचविंशैरहोभिरभिषिंचन्नेतेन च तृचेनैतेन
च यजुषैताभिश्च व्याहृतिभिः पारमेष्ठ्यायास्यां ध्रुवायां प्रतिष्ठा
यां दिशि साध्याश्चाप्त्याश्च देवाः षड्भिश्चैव पंचविंशैरहोभिरभिरभि
षिंचन्नेतेन च तृचेनैतेन च यजुषैताभिश्च व्याहृतिभी राज्याय माहा
राज्यायाधिपत्याय स्वावश्यायातिष्ठायेति स परमेष्ठी प्राजा
पत्योभवत् स य एतेनैंद्रेण महाभिषेकेणाभिषिक्तः क्षत्रियः सर्वा
जितीर्जयति सर्वान्लोकान्विंदति सर्वेषां राज्ञां श्रैष्ठ्यमतिष्ठां प
रमतां गछति साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठ्यं रा
ज्यं माहाराज्यमाधिपत्यं जित्वास्मिंल्लोके स्वयंभूः स्वराळमृतो ॥१४॥
मुष्मिन्स्वर्गे लोके सर्वान्कामानाप्त्वामृतः संभवति य एतेनैंद्रेण महाभिषेकेण क्ष

त्रियं शापयित्वाभिषिंचति ॥१९॥ इंद्रियं वा एतदस्मिंल्लोके यद्दधि यद्दध्नाभिषिंच
तींद्रियमेवास्मिंस्तद्दधाति रसो वा एष ओषधिवनस्पतिषु यन्मधु यन्मध्वाभिषिं
चति रसमेवास्मिंस्तद्दधाति तेजो वा एतत्पशूनां यद्घृतं यद्घृतेनाभिषिंचति तेज
एवास्मिंस्तद्दधात्यमृतं वा एतदस्मिंल्लोके यदापो यदद्भिरभिषिंचत्यमृतत्वमेवा त्य
स्मिंस्तद्दधाति सोभिषिक्तोभिषेक्त्रे ब्राह्मणाय हिरण्यं दद्यात्सहस्रं दद्यात्क्षेत्रं
चतुष्पाद्दद्यादथाप्याहुरसंख्यातमेवापरिमितं दद्यादपरिमितो वै क्षत्रियोपरि
मितस्यावरुध्या इत्यथास्मै सुराकंसं हस्त आदधाति स्वादिष्ठया मदिष्ठया पव
स्व सोम धारया ॥ इंद्राय पातवे सुत इति तां पिबेद्यदत्र शिष्टं रसिनः सुतस्य यदिंद्रो
अपिबच्छचीभिः ॥ इदं तदस्य मनसा शिवेन सोमं राजानमिह भक्षयामि ॥ अभि

त्वावृषभास्फुतेसुतंसृजामिपीतये॥ तृंपाव्यम्नुहीमदमितियोहवावसोमपी
थःस्रुरायांप्रविष्टःसेहैवैतेनैंद्रेणमहाभिषेकेणाभिषिक्तस्यक्षत्रियस्यभ
क्षितोभवतिनस्रुरातांपीत्वाभिमंत्रयेतापामसोममंशंनोभवतितद्यथेवादः
प्रियःपुत्रःपितरंप्रियावाजायापतिंस्रुखंशिवमुपस्पृशत्याविस्रसएवंहे
वैतेनैंद्रेणमहाभिषेकेणाभिषिक्तस्यक्षत्रियस्यसुरावासोमोवान्यद्वान्नो
द्यंस्रुखंशिवमुपस्पृशत्याविस्रसः॥ २०॥ एतेनहवाऐंद्रेणमहाभिषेकेण
तुरःकावषेयोजनमेजयंपारिक्षितमभिषिषेचतस्मादुजनमेजयःपारिक्षि
तःसमंतंसर्वतःपृथिवींजयन्परीयायाश्वेनचमेध्येनेजेतदेषाभियज्ञगाथा
गीयते॥आसंदीवतिधान्यादंरुक्मिणंहरितस्रजं॥अभ्वंबबंधसारंगंदेवे

भ्योजनमेजयइत्येतेनहवाऐंद्रेणमहाभिषेकेणच्यवनोभार्गवःशार्यातंमानव
मभिषिषेचतस्मादुशार्यातोमानवःसमंतंसर्वतःपृथिवींजयन्परीयायाश्वेनच
मेध्येनेजेदेवानांहापिसत्रेगृहपतिरासैतेनहवाऐंद्रेणमहाभिषेकेणसोमशु
ष्मावाजरत्नायनःशतानीकंसात्राजितमभिषिषेचतस्मादुशतानीकःसात्रा
जितःसमंतंसर्वतःपृथिवींजयन्परीयायाश्वेनचमेध्येनेजएतेनहवाऐंद्रेण
महाभिषेकेणपर्वतनारदावांबाष्ठ्यमभिषिषिचतुस्तस्मादांबाष्ठ्यःसमंतं
सर्वतःपृथिवींजयन्परीयायाश्वेनचमेध्येनेजएतेनहवाऐंद्रेणमहाभिषेकेण
पर्वतनारदौयुधांश्रौष्टिमौग्रसैन्यमभिषिषिचतुस्तस्मादुयुधांश्रौष्टिरौग्र
सैन्यःसमंतंसर्वतःपृथिवींजयन्परीयायाश्वेनचमेध्येनेजएतेनहवाऐंद्रे

ऐ०ब्रा० ॥ १६ ॥

णमहाभिषेकेण कश्यपो विश्वकर्माणं भौवनमभिषिषेच तस्मादु विश्वकर्मा भौव
नः समंतं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे भूमिर्ह जगावित्युदाह
रंति न मा मर्त्यः कश्चन दातुमर्हति विश्वकर्मन्भौवन मां दिदासिथ ॥ निमंक्ष्ये
हं सलिलस्य मध्ये मोघस्त एष कश्यपायास संगर इत्येतेन ह वा ऐंद्रेण महाभि
षेकेण वसिष्ठः सुदासं पैजवनमभिषिषेच तस्मादु सुदाः पैजवनः समंतं स
र्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे एतेन ह वा ऐंद्रेण महाभिषेके
ण संवर्त आंगिरसो मरुत्तमाविक्षितमभिषिषेच तस्मादु मरुत्त आविक्षितः
समंतं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे तदप्येष श्लोकोऽभिगी ॥ १६ ॥
तो मरुतः परिवेष्टारो मरुत्तस्यावसन्गृहे ॥ आविक्षितस्य कामप्रेर्विश्वे देवाः राम

भासद इति ॥ २१ ॥ एतेन ह वा ऐंद्रेण महाभिषेकेणोदमय आत्रेयोंगमभिषिषेच त
स्मादु अंगः समंतं सर्वतः पृथिवीं जयन्परीयायाश्वेन च मेध्येनेजे स ह होवाचालोपांगो
दश नागसहस्राणि दश दासीसहस्राणि ददामि ते ब्राह्मणोप मास्मिन्यज्ञे ह्वयस्वे
ति तदप्येते श्लोका अभिगीताः ॥ याभिर्गोभिरुदमयं प्रय्यमेधा अयाजयन् ॥
द्वे द्वे सहस्रे बद्धानामात्रेयो मध्यतो ददात् ॥ अष्टाशीतिः सहस्राणि श्वेतान्वैरोच
नो हयान् ॥ प्रष्टीन्निश्चृत्य प्रायच्छद्यजमाने पुरोहिते ॥ देशाद्देशात्समोढानां
सर्वासामा[illegible]ढ्यदुहितॄणां ॥ दशाददात्सहस्राण्यात्रेयो निष्ककंठ्यः ॥ दश ना
गसहस्राणि दत्त्वात्रेयोवचत्नुके ॥ श्रांतः पारिकुरान्प्रैप्सद्दानेनांगस्य ब्राह्म
णः ॥ शतं तुभ्यं शतं तुभ्यमिति स्मैव प्रताम्यति ॥ सहस्रं तुभ्यमित्युक्त्वा प्राणा

ब्रा०अ॰ स्मप्रलिपद्यतइति॥२२॥एतेनहवाऐंद्रेणमहाभिषेकेणदीर्घतमामामतेयोभरतंदौः भ

॥१७॥ ष्यंतिमभिषिषेचतस्मादुभरतोदौःषंतिःसमंतंसर्वतःपृथिवींजयन्परीयायाश्वै
रुचमेध्यैरीजेतदप्येतेश्लोकाअभिगीताः॥हिरण्येनपरीवृतान्कृष्णां
शुक्लदतोमृगान्॥मष्णारेभरतोददाच्छतंबद्धानिसप्तच॥भरतस्यैषदौःषं
तेरग्निःसाचीगुणेचितः॥यस्मिन्सहस्रंब्राह्मणाबद्धशोगाविभेजिरे॥
अष्टासप्ततिंभरतोदौःषंतिर्यमुनामनु॥गंगायांवृत्रघ्नेबध्नात्पंचपंचा
शतंहयान्॥त्रयस्त्रिंशच्छतंराजाश्वान्बध्वायमेध्यान्॥दौःषंतिरत्यगाद्रा
ज्ञोमायांमायवत्तरः॥महाकर्मभरतस्यनपूर्वेनापरेजनाः॥दिवंमर्त्यइव १७
हस्ताभ्यांनोदापुःपंचमानवाइत्येतेनहवाऐंद्रेणमहाभिषेकेणबृहदुक्थऋषि कृष्ण

र्दुर्मुखायपांचालायप्रोवाचतस्मादुदुर्मुखःपांचालोराजासन्विद्ययासमंतंसर्व
तःपृथिवींजयन्परीयायैतेनहवाऐंद्रेणमहाभिषेकेणवासिष्ठःसात्यहव्योऽत्यरातयेजानं
तपयेप्रोवाचतस्मादत्यरातिर्जानंतपिरराजासन्विद्ययासमंतंसर्वतःपृथिवींज
यन्परीयायसहोवाचवासिष्ठःसात्यहव्योजैषीर्वैसमंतंसर्वतःपृथिवींमहन्मा
गमयेतिसहोवाचात्यरातिर्जानंतपिर्यदाब्राह्मणोत्तरकुरूञ्जयेयमथत्वमु
हैवपृथिव्यैराजास्याःसेनापतिरेवतेहंस्यामितिसहोवाचवासिष्ठःसात्य
हव्योदेवक्षेत्रंवैतन्नवैतन्मर्त्योजेतुमर्हत्यद्रुक्षोवैमआनइदंददइतिततोहा
त्यरातिंजानंतपिमात्तवीर्यंनिःशुक्रममित्रतपनःशुष्मिणःशैब्योराजाजघान
तस्मादेवंविदुषेब्राह्मणायैवंचक्रुषेनक्षत्रियोद्रुह्येन्नेद्राष्ट्रादवपद्येयन्नेद्धामाप्र

ब्रा०अ
१८

॥२३॥

णोजहदितिजहदिति॥ इतिचतुर्थोध्यायः॥ अथातःपुरोधायाएवनहवाअपुरोहि
तस्यराज्ञोदेवाअन्नमदंतितस्माद्राजायक्ष्यमाणोब्राह्मणंपुरोदधीतदेवामेन्नम
दन्नित्यग्नीन्वाएषस्वर्ग्यान्राजोत्धरतेयत्पुरोहितंतस्यपुरोहितएवाहवनीयो
भवतिजायागार्हपत्यःपुत्रोन्वाहार्यपचनःसयत्पुरोहितायकरोत्याहवनी
यएवतज्जुहोत्यथयज्जायायैकरोतिगार्हपत्यएवतज्जुहोत्यथयत्पुत्रायकरो
त्यन्वाहार्यपचनएवतज्जुहोतितएनंशांततनवोभिहुताअभिप्रीताःस्वर्गंलोक
मभिवहंतिक्षत्रंचबलंचराष्ट्रंचविशंचतएवैनमशांततनवोनभिहुताअनभि
प्रीताःस्वर्गाल्लोकान्नुदंतेक्षत्राच्चबलाच्चराष्ट्राच्चविशश्चाग्निर्वाएषवैश्वानरःपं
चमेनिर्यत्पुरोहितस्तस्यवाच्येवैकामेनिर्भवतिपादयोरेकात्वच्येकाहृदयए

१८
कृष्ण

कोपस्थएकाताभिर्ज्वलंतीभिर्दीप्यमानाभिरुपोदेतिराजानंसयदाहक्वभगवोवा
त्सीरस्तृणान्यस्मा आहरतेतितेनास्यैतांशमयतियास्यवाचिमेनिर्भवत्यथयदस्माउ
दकमानयंतिपाद्यंतेनास्यतांशमयतियास्यपादयोर्मेनिर्भवत्यथयदेनमलंकु
र्वंतितेनास्यतांशमयतियास्यत्वचिमेनिर्भवत्यथयदेनंतर्पयंतितेनास्यतांशमय
तियास्यहृदयेमेनिर्भवत्यथयदस्यानारुध्दोवेश्मस्ववसतितेनास्यतांशमय
तियास्योपस्थेमेनिर्भवतिसएनंशांततनुरभिहुतोभिप्रीतःस्वर्गंलोकमभिवह
तिक्षत्रंचबलंचराष्ट्रंचविशंचसएवैनमशांततनुरनभिहुतोनभिप्रीतःस्वर्गाल्लो
कान्नुदतेक्षत्राच्चबलाच्चराष्ट्राच्चविशश्च॥२४॥अग्निर्वाएषवैश्वानरःपंच
मेनिर्यत्पुरोहितस्ताभीराजानंपरिगृह्यतिष्ठतिसमुद्रइवभूमिमयुवमार्यस्यरा

तं

ब्रा०अ
॥३१॥

ष्टंभवतिनैनंपुरायुषःप्राणोजहात्याजरसंजीवतिसर्वमायुरेतिनपुनर्म्रियतेय
स्यैवंविद्वान्ब्राह्मणोरा॰ष्ट्रगोपःपुरोहितःक्षत्रेणक्षत्रंजयतिबलेनबलमश्नुते
यस्यैवंविद्वान्ब्राह्मणोराष्ट्रगोपःपुरोहितस्तस्मैविशःसंजानतेसंमुखाएकमनसो
यस्यैवंविद्वान्ब्राह्मणोराष्ट्रगोपःपुरोहितः॥२५॥तदप्येतदृषिणोक्तंसइद्राजा
प्रतिजन्यानिविश्वाशुष्मेणतस्थावभिवीर्येणेतिसपत्नावैद्विषंतोभ्रातृव्याजन्या
नितानेवतच्छुष्मेणवीर्येणाधितिष्ठतिबृहस्पतिंयःसुभृतंबिभर्तीतिबृहस्पतिर्हवै
देवानांपुरोहितस्तमन्वन्येमनुष्यराज्ञांपुरोहिताबृहस्पतिंयःसुभृतंबिभर्तीतिय
दाहपुरोहितंयःसुभृतंबिभर्तीत्येवतदाहवल्गूयतिवंदतेपूर्वभाजमित्यपचि ॥३१॥
तिमेवास्माएतदाहसइत्क्षेतिसुधितओकसिस्वइतिगृहावाओकःस्वेष्वेवत हेरंब

द्गृहेषुसुहितोवसतितस्माइळासपिन्वतेविश्वदानीमित्यन्नंवाइळान्नमेवास्माएत
दूर्जस्वच्छश्वद्भवतितस्मैविशःस्वयमेवानमंतइतिराष्ट्राणिवैविशोराष्ट्राण्येवैनं
तत्स्वयमुपनमंतियस्मिन्ब्रह्माराजनिपूर्वएतीतिपुरोहितमेवैतदाहाप्रतीतोज
यतिसंधनानीतिराष्ट्राणिवैधनानितान्यप्रतीतोजयतिप्रतिजन्यान्युतयासज
न्येतिसपत्नावैद्विषंतोभ्रातृव्याजन्यानितानप्रतीतोजयत्यवस्यवेयोवरिवःकृ
णोतीतियदाहावसीयसेयोवसीयःकरोतीत्येवतदाहब्रह्मणेराजानमवंतिदेवा
इतिपुरोहितमेवैतदभिवदति॥२६॥योहवैत्रीन्पुरोहितांस्त्रीन्पुरोधातॄन्वेद
सब्राह्मणःपुरोहितःसवदेतपुरोधायाअग्निर्वावपुरोहितःपृथिवीपुरोधाता
वायुर्वावपुरोहितोंतरिक्षंपुरोधातादित्योवावपुरोहितोद्यौःपुरोधातैषह

ब्रा०अ

॥२०॥

वैपुरोहितोयएवंवेदाथसतिरोहितोयएवंनवेदतस्यराज्ञामित्रंभवतिद्विषंत
मपबाधतेयस्यैवंविद्वान्ब्राह्मणोराष्ट्रगोपःपुरोहितःक्षत्रेणक्षत्रंजयति
बलेनबलमश्नुतेयस्यैवंविद्वान्ब्राह्मणोराष्ट्रगोपःपुरोहितःतस्मैविशः
संजानतेसंमुखाएकमनसोयस्यैवंविद्वान्ब्राह्मणोराष्ट्रगोपःपुरोहितोभूर्भुवः
स्वरोममोहमस्मिसत्वंसत्वमस्यमोहंद्यौरहंपृथिवीत्वंसामाहमृक्त्वंतावेह
संवहावहै॥पुराण्यस्मान्महाभयात्॥तनूरसितन्वंमेपाहि॥याओषधीः
सोमराज्ञीर्बह्वीःशतविचक्षणाः॥तामह्यमस्मिन्नासनेछिद्रंशर्मयछत॥ ॥२०॥
याओषधीःसोमराज्ञीर्विष्ठिताःपृथिवीमनु॥तामह्यमस्मिन्नासनेछि हेरंब
द्रंशर्मयछत॥अस्मिन्राष्ट्रेश्रियमावेशयाम्यतोदेवीःप्रतिपश्याम्यापः॥

दक्षिणंपादमवनेनिजेस्मिन्राष्ट्रइंद्रियंदधामि॥सव्यंपादमवनेनिजेस्मिन्राष्ट्रइंद्रि
यंवर्धयामि॥पूर्वमन्यमपरमन्यंपादाववनेनिजे॥देवाराष्ट्रस्यगुप्त्याअभयस्या
वरुध्यै॥आपःपादावनेजनीर्द्विषंतंनिर्दहंतुमे॥२७॥अथातोब्रह्मणःपरिम
रोयाहैवैब्रह्मणःपरिमरंवेदपर्येनंद्विषंतोभ्रातृव्याःपरिसपत्नाम्रियंतेयंवैब्रह्म
योयंपवतेतमेताःपंचदेवताःपरिम्रियंतेविद्युद्वृष्टिश्चंद्रमाआदित्योग्निर्वै
द्युद्वैविद्युत्यवृष्टिमनुप्रविशतिसांतर्धीयतेतांननिर्जानंतियदावैम्रियतेथां
तर्धीयतेथैनंननिर्जानंतिसब्रूयाद्विद्युतोमरणे द्विषन्मेम्रियतांसांतर्धीयतां
तंमानिर्ज्ञासिषुरितिक्षिप्रंहैवैनंननिर्जानंतिवृष्टिर्वैवृष्ट्वाचंद्रमसमनुप्रविशति
सांतर्धीयतेतांननिर्जानंतियदावैम्रियतेथांतर्धीयतेथैनंननिर्जानंतिसब्रू

ऐ॰ब्रा॰ अ ॥२१॥

याद्वृष्टेर्मरणे द्विषन्मे म्रियतां सोंतर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न नि
र्जानंति चंद्रमा वा अमावास्यायामादित्यमनु प्रविशति सोंतर्धीयते तं न निर्जा
नंति यदा वै म्रियतेथांतर्धीयतेथैनं न निर्जानंति स ब्रूयाच्चंद्रमसो मरणे द्विष
न्मे म्रियतां सोंतर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानंत्यादि
त्यो वा अस्तं यन्नग्निमनुप्रविशति सोंतर्धीयते तं न निर्जानंति यदा वै म्रिय
तेथांतर्धीयतेथैनं न निर्जानंति स ब्रूयादादित्यस्य मरणे द्विषन्मे म्रियतां
सोंतर्धीयतां तं मा निर्ज्ञासिषुरिति क्षिप्रं हैवैनं न निर्जानंत्यग्निर्वा उद्वान्वायु
मनुप्रविशति सोंतर्धीयते तं न निर्जानंति यदा वै म्रियतेथांतर्धीयतेथैनं न

॥२१॥ हेरब

निर्ज्ञानंति स ब्रूयादग्नेर्मरणे द्विषन्मे म्रियतां सोंतर्धीयतां तं मा निर्ज्ञासिषुरिति
क्षिप्रं हैवैनं न निर्जानंति ता वा एता देवता अत एव पुनर्जायंते वायोरग्निर्ज्जा
यते प्राणाद्धि बलान्मथ्यमानोधिजायते तं दृष्ट्वा ब्रूयादग्निर्जायतां मा मे
द्विषं जन्यत एव पराङ् प्रजिघ्यत्विल्युतो हैव पराङ् प्रजिघ्यत्यग्नेर्वा आदित्यो
जायते तं दृष्ट्वा ब्रूयादादित्यो जायतां मा मे द्विषं जन्यत एव पराङ् प्रजिघ्य ॥
त्विल्युतो हैव पराङ् प्रजिघ्यत्यादित्याद्धै चंद्रमा जायते तं दृष्ट्वा ब्रूयाच्चंद्रमा
जायतां मा मे द्विषं जन्यत एव पराङ् प्रजिघ्यत्विल्युतो हैव पराङ् प्रजिघ्यति
चंद्रमसो वै वृष्टिर्जायते तां दृष्ट्वा ब्रूयाद्वृष्टिर्जायतां मा मे द्विषं जन्यत एव प
राङ् प्रजिघ्यत्विल्युतो हैव पराङ् प्रजिघ्यति वृष्टेर्वै विद्युज्जायते तां दृष्ट्वा ब्रूया

न

ब्रा०अ ॥२२॥ तः

द्विषद्युञ्जानो मामेद्विषं जन्यत एव पराङ् प्रजिघ्यत्विल्यतो हैव पराङ् प्रजिघ्य
ति स एष ब्रह्मणः परिमरस्तमेतं ब्रह्मणः परिमरं मैत्रेयः कौषारवः सुत्वने
केरिशाये भार्गायणाय राज्ञे प्रोवाच तं ह पंच राजानः परिमम्रुः स्ततः स
त्वा महज्जगाम तस्य व्रतं न द्विषः पूर्व उपविशेद्यदि तिष्ठंतं मन्येत तिष्ठे
तैव न द्विषतः पूर्वः संविशेद्यद्यासीनं मन्येतासीतैव न द्विषतः पूर्वः प्रस्व
प्याद्यदि जाग्रतं मन्येत जागृयादेवापि ह यद्यस्याश्ममूर्धा द्विषन्भव
ति ॥ क्षिप्रं हैवैनं स्तृणुते स्तृणुते ॥ २८ ॥ इत्यष्टमपंचिकायां पं
चमोऽध्यायः ॥ श्री गजाननार्पणमस्तु ॥ शके १७६० विलंबीनामसंव

२२ हेरंब

त्सरे सांन्योपनामक बल्लाळेन लिखितं स्वार्थं परार्थं च ॥ तैलाद्रक्षेज्ज
लाद्रक्षेद्रक्षेच्छिथिलबंधनात् ॥ मूर्खहस्ते न दातव्यं एवं वदति पुस्तके ॥ ॥
श्री गजाननादिदेवतार्पणमस्तु ॥ ६ ॥ ६ ॥ ६ ॥

ब्रा·अ·
२३

॥इति अष्टमपंचिका समाप्तः॥

राम
२३

श्रीगणेशाय नमः॥

॥ब्राह्मणाचेपुस्तकाचे मकपृष्ठ ॥२॥

[OrderDescription]
,CREATED=23.08.19 09:58
,TRANSFERRED=2019/08/23 at 11:27:28
,PAGES=265
,TYPE=STD
,NAME=S0001524
,Book Name=M-751-BRAHMAN GRANTH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF

FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF

FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF

FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF

FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF

FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF

FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF
,FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,